॥ कोबातीर्थमंडन श्री महावीरस्वामिने नमः ॥

॥ अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ॥

॥ गणधर भगवंत श्री सुधर्मास्वामिने नमः ॥

॥ योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ॥

॥ चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ॥

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

### जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १


**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

## ॥ अथ वेदांतचिंतामणि प्रारंभः ॥

anmandir@kobatirth.org

श्रीगणेशायनमः ॥ शुद्धाद्वैतंसर्वशक्तिजडजीवादिकारणं ॥ साकारंसच्चिदानंदंवंदेश्रीपुरुषोत्तमं ॥ १ ॥ मायावादतमो
नाशभक्तिमार्गप्रकाशयोः ॥ सूर्याचंद्रमसौस्तौमिश्रीमद्वल्लभविठ्ठलौ ॥ २ ॥ भक्तोगुरुश्रीव्रजवल्लभस्यपितुर्घनश्यामतआ
प्तविद्यः ॥ गोवर्द्धनोबालनिबोधनायवेदांतचिंतामणिमातनोति ॥ ३ ॥ अथैतद्विश्वमखिलंनानारूपंनिरीक्ष्यते ॥ अतीव
चित्रमेतस्यकारणंपरिचिंत्यतां ॥ ४ ॥ यत्पूर्ववृत्तिनियतंयदुत्पत्तावपेक्ष्यते ॥ तत्तस्यकारणंप्रोक्तंकार्यमुत्पाद्यमस्ययत् ॥
॥ ५ ॥ यथामृत्साकुलालश्चदंडादिर्घटकारणं ॥ तथेदंकिमुपादायकेनवानिर्मितंभवेत् ॥ ६ ॥ चेतनस्यमनुष्यादेःपितरौतं
त्तथाविधौ ॥ जडस्याप्यथवृक्षादेर्बीजाद्यंयद्यपिस्फुटं ॥ ७ ॥ पित्रोःपितामहौमातामहौतेषांतथेतरे ॥ एवंविचारेकोवा
दौकिश्चसर्गोस्तिमैथुनात् ॥ ८ ॥ किमादौपुरुषःस्त्रीवोभयंवेत्यपिसंशयः ॥ एवंजडेपिवृक्षस्यबीजंतत्फलतःफलं ॥ ९ ॥ वृ
क्षाद्वृक्षांकुरंबीजात्तरुर्वाबीजमादिमं ॥ नाध्यवस्यतिधीःकिंचिदंततःपरिचिंतने ॥ १० ॥ तस्मात्सर्वप्रपंचस्यनिदानंब्रह्म
केवलं ॥ आदित्वादद्वितीयत्वात्सर्वरूपत्वशक्तितः ॥ ११ ॥ सर्वधर्मविशिष्टत्वादैश्वर्य्यात्तत्प्रसिद्धितः ॥ स्वयमेवस्वेच्छयेदं
स्वरूपादुदपादयत् ॥ १२ ॥ यथोर्णनाभिर्लीलातआलयंसृजतीच्छया ॥ पात्यत्त्येवंत्वस्यसृष्टिस्थितिसंहृतयस्ततः ॥ १३ ॥
पंचभूतात्मकंसर्वंकिंनतान्येवकारणं ॥ निरास्पदत्वंनैषांचोचितोयोगःस्वतोयतः ॥ १४ ॥ कालजीवादयोनैतन्मयास्ते
षांकुतोभवः ॥ किंचपंचैवतान्येवंस्वभवान्येववाकुतः ॥ १५ ॥ अतोवश्यंसर्वबीजंस्वतंत्रश्चैककईशिता ॥ प्रवर्त्तकोनियं

---

१ कारणं २ कार्यानुरूपौ ३ सर्वज्ञःसवशक्तिमान्कश्चिदेकएवास्यजगतःकर्तेतिसर्वमतेषुप्रसिद्धं

नाचयोहेतुःस्थितिनाशयोः ॥ १६ ॥ तद्ब्रह्मक्कास्तिसर्वत्रव्याप्तंव्योमेवत्द्दयपि ॥ कस्मान्नदृश्यतेऽस्माभिस्तिरोभूययतःस्थि
तं ॥ १७ ॥ घर्म्मंननाशयेद्वायुस्सन्नप्यारुद्धकंदरे ॥ व्यजनेनाऽनुभूयेततथाज्ञानेनदृश्यते ॥ १८ ॥ घटादिनविलोक्येतति
रस्करणिकावृतं ॥ मायाजवनिकाच्छन्नंतथाब्रह्मनलक्ष्यते ॥ १९ ॥ अस्त्येवतत्पिकाःकाकाःशुकाहंसाःकलापिनः ॥ अ
सिताहरिताःश्वेताःकृतायेनचचित्रिताः ॥ २० ॥ परस्परविरुद्धस्याऽतिविचित्रस्वरूपिणः ॥ यद्विश्वस्योद्भवेहेतुर्नियमेनय
थोचितं ॥ २१ ॥ सूर्य्यादीनांसुदुर्ज्ञेययाथात्म्यानांप्रकाशनं ॥ निराधारेस्थितिर्याति[1]र्नियतानित्यतायतः ॥ २२ ॥ एवंवि
धैःश्रुतैर्दृष्टैःप्रकारैर्बहुभिःस्फुटैः ॥ स्थिरेणमनसास्पष्टंब्रह्मनिश्चीयतांदृढं ॥ २३ ॥ कुसुमांजलिमुख्येषुग्रंथेष्वीशेऽनुमाशत
म् ॥ अदर्श्युदयनाचार्यादिभिस्तेनोदितंयथा ॥ २४ ॥ कार्याऽऽयोजनधृत्यादेःपदात्प्रत्ययतःश्रुतेः ॥ वाक्यात्संख्याविशे
षाच्चसाध्योविश्वविदव्ययः ॥ २५ ॥ जडंभूतादिकंजीवान्[2]स्सृष्ट्वान्यदपिभूततः ॥ न्यूना[3]धिकत्वतोदेहाश्चित्रानानाविधाः
कृताः ॥ २६ ॥ तेषुजीवा[4]दिसंस्थाप्यमाययामोहयत्स्वया ॥ मोहितानविजानीमोब्रह्मा[5]किंकीदृशोवयं ॥ २७ ॥ श्रुतिष्व
पिपुराणेषुब्रह्मादीनांभवस्ततः ॥ बहुधामानवादीनांसर्गोस्तीत्यवधार्यतां ॥ २८ ॥ एवंसृष्ट्वाप्रवृत्त्यर्थंमर्यादांपापपुण्ययोः॥
सर्वाञ्ज्ञापयितुंचान्य[6]द्वेदाआविष्कृताःस्वतः॥२९॥सोपायासफलाकर्ममर्य्यादातत्ररूपिता ॥ ज्ञानार्थंस्वस्वरूपंचमुक्तिर्भक्ति

१ गतिः २ अंतर्यामिप्रभृति ३ पार्थिवानांशरीराणामर्द्धंनपृथिवीमतेत्यादिवचनैः ४ आदिशब्देनप्राणेंद्रियादिसंग्रहः ५ स्वस्वरूपज्ञानभक्त्यादि
कं ६ मायश्चित्तादिरुपायः

श्वदर्शिता ॥ ३० ॥ इदंयःसुकृतंकुर्य्यात्सइदंसुखमाप्नुयात् ॥ इदंचदुष्कृतंकृत्वेदंभुंजीतसदुष्फलम् ॥ ३१ ॥ वेदेषुविद्यमानेषुविविच्योपदिशत्स्वपि ॥ यथायथायःकुरुतेददात्यस्मैतथातथा ॥३२॥ कर्मानुसारतोवंशोदेहोविद्याचवैभवः ॥ इत्यादिप्राप्यतेसर्वंप्राप्तदेहादिसंभवैः॥३३॥कर्मभिश्चापरंसर्वंतज्जैस्तैश्चान्यदाप्यते ॥ बहुपापास्तुनरकंबहुपुण्याःसुरालयं ॥३४॥ गच्छंतियातनादेहंपुण्यदेहंचसंश्रिताः ॥ तत्रभुक्त्वाभुवंयाताःप्राप्नुवंतितथाखिलं॥३५॥अखंडो[1]नंतएतादृक्प्रवाहोऽयंप्रवर्त्तते॥ यथाप्रावृड्जलैर्नद्याःप्रवाहोप्यपराहतः॥३६॥जगदीशस्यलीलायंप्रपंचोनिखिलोमतः॥मृत्पुत्तलेषुराजानममात्यमनुगादिकं॥३७॥यथाबालःकरोत्येवमत्रेशोपिनिजेच्छया॥क्वचित्सख्यंक्वचिद्वैरमित्याद्यप्यखिलंतथा ॥३८॥बहुप्रपंचादृश्यंतेक्रीडाबुद्धिबलादयः॥सोश्चर्याअपिजीवानांयद्यल्पविषयाअपि॥३९॥विश्वंत्वनंतविषयमीशक्रीडात्मकंतदा॥अकुंचितप्रपंचंचसाश्चर्य्यंनकुतोभवेत्॥४०॥केषांचिद्दारुखंडानांनामभूपादिकथ्यते ॥ निर्धारिताश्चगतयस्तत्षट्कस्यैवकाश्चन॥४१॥आधारोपिचतुःषष्टिनिलयोऽकारिनागरैः ॥ विधीयतेयुद्धमात्रंयदितत्राप्यनंतता॥४२॥तदात्रकिमुवक्तव्यंप्रपंचेभगवत्कृते॥तद्वदत्राप्यथाधारोब्रह्माण्डानिबहूनितु॥४३॥पांचभौतिकपिंडानांसंज्ञानानाविधाःकृताः ॥ अनेकेषामिद्रियतःकृतानानाप्रवृत्तयः॥४४॥प्रवृत्तिजन्यकार्याणिमानसान्यपिभूरिशः॥सदसत्कर्मभिर्बंधभोगतयोपिविनिश्चिताः॥४५॥लीलार्थमीश्वरत्वार्थमचिंत्यानंतशक्तिना ॥ स्वरूपात्स्वेच्छयातेनप्रपंचःप्रकटीकृतः ॥ ४६ ॥ अहंताममताबद्धामायायांधास्तदिच्छया ॥ सर्वएवप्र

---

१ अविच्छिन्नः २ समाप्तिशून्यः

वर्ततेऽत्रपरंपरयोक्तया ॥ ४७ ॥ तदंशाअखिलादेवाःसकामाआश्रयंतितान् ॥ तत्तद्ददातितद्वारातेभ्योमाहात्म्यबुद्धये ॥
॥ ४८ ॥ यस्तुसम्यग्विजानीयात्ससंसाराद्विमुच्यते ॥ सर्वात्मनाभजेद्योऽस्यनकिंचिदपिदुर्लभं ॥ ४९ ॥ गर्भेवनान्मातृदु
ग्धादिनाचोपकृतंबहु ॥ येनेशःसदयांभोधिर्हरिःकस्मान्नसेव्यते ॥ ५० ॥ सचस्वल्पेनसंतुष्येत्स्वस्यापिस्यात्सुखंयतः ॥ ऐ
हिकामुष्मिकंमोक्षःसुलभोयदिवांछ्यते ॥ ५१ ॥ यतंतेमनुजालोकेराज्ञोऽपिहिसमागमे ॥ समागमेऽखिलेशस्ययतितव्यं
कुतोनवा ॥ ५२ ॥ समागमोऽस्यज्ञानेनतज्ज्ञानंवेदशास्त्रतः ॥ समीपस्थगिराराज्ञोपिप्रकृत्त्यादिबुत्ध्यते ॥ ५३ ॥ वेदस्यदु
र्विबोधत्वाल्लोकानुग्रहकारिभिः ॥ ईश्वरानुज्ञयोक्तानिसच्छास्त्राणिमुनीश्वरैः ॥ ५४ ॥ वेदार्थएवबोधार्थंसच्छास्त्रेषुविवि
च्यते ॥ मंतव्यासावधानैर्वाग्वेदशास्त्रमयीशितुः ॥ ५५ ॥ ऋतेगुरुंतयोरर्थोमननार्होनबुध्यते ॥ परंपराप्राप्तविद्योऽतःकश्चि
त्सद्गुरुर्गतिः ॥ ५६ ॥ वेदज्ञानाद्गुरुप्राप्तादुपदेशपुरःसरात् ॥ केवलाद्वोपदेशाच्चेद्भजेत्तुष्येत्सनान्यथा ॥ ५७॥ शीघ्रतद्दर्शका
न्प्राप्यमहामंत्रान्सतोगुरोः ॥ वेदार्थैथपरिश्राम्येच्छक्त्यासक्तोहरिंभजेत् ॥ ५८ ॥ गुर्वाज्ञयासानुरागंसश्रद्धंपुरुषोत्तमं ॥ शु
द्धभावोभजेन्नित्यंयथाशक्त्युपचारतः ॥ ५९ ॥ लोकेपिशरणायातान्सर्वस्वविनिवेदकान् ॥ यदितुच्छोपिबलवान्कथंचि
दपिनत्यजेत् ॥ ६० ॥ तर्हियःसद्गुरुद्वारातमेकंशरणंव्रजेत् ॥ सर्वंसमर्पयेत्तस्मैकथंत्यक्ष्यतितंप्रभुः ॥ ६१ ॥ योगिनामपिदु
र्दर्शःसाक्षाद्यावन्नदृश्यते ॥ शुद्धरूपादिबुत्ध्यर्थंतावत्तत्प्रतिमार्चनं ॥ ६२ ॥ तत्राविश्यस्थितोमंत्रवशोगृह्णातिसोर्पितं ॥ भ
क्तानांत्वथतत्रैवसाक्षादनुभवोऽखिलः ॥ ६३ ॥ गोपीचंदनमुद्राभिस्तुलसीमालयागले ॥ गुरूपदिष्टाःशुद्धोर्ध्वपुंड्रास्तस्या

तिवल्लभाः ॥ ६४ ॥ यथावश्यकवस्त्रादिनधृत्वानृपमंदिरं ॥ तदीयानैवयांत्येवमत्राप्येतत्त्रयंविना ॥ ६५ ॥ वैष्णवानांचिन्ह
मूर्ध्वपुंड्रंमालाचकंठगा ॥ लोकानांलक्षणंकिंचिद्राजसंबंधिनामिव ॥६६ ॥ गुरूपदेशमादायतस्माद्भूत्वासुवैष्णवाः ॥ धृत्वा
चस्वामिचिन्हानिसेवंतांसंततंहरिं ॥ ६७ ॥ पूर्णानंदमयंयद्ब्रह्मपरंसर्वदैवसेवध्वं ॥ बुध्यध्वंस्थिरमनसातद्वेदादिमनिरंतराभ्या
सात् ॥ ६८ ॥ इतिश्रीमद्वल्लभाचार्यमतवर्तिश्रीव्रजवल्लभचरणानुचरपंचनदीघनश्यामभट्टात्मजगोवर्द्धनशीघ्रकविविरचि
तेवेदांतचिंतामणौनास्तिक्योच्छेदकशास्त्रार्थसंग्रहाख्यंप्रथमंप्रकरणं ॥ १ ॥ ॥ॐ॥ ॥ॐ॥ ॥ॐ॥

शाब्दमेवप्रमाणंस्यात्परोक्षब्रह्मनिश्चये ॥ अलौकिकंस्वतंत्रंचसाक्षात्तत्प्रतिपादकम् ॥ १ ॥ वेदाःश्रीकृष्णवाक्यानिव्यास
सूत्राणिचैवहि ॥ समाधिभाषाव्यासस्यप्रमाणंतच्चतुष्टयं ॥ २ ॥ उत्तरंपूर्वसंदेहवारकंपरिकीर्त्तितं ॥ अविरुद्धंतुयत्त्वस्यप्र
माणंतच्चनान्यथा ॥ ३ ॥ एतद्विरुद्धंयत्सर्वंनतन्मानंकथंचन ॥ इत्युक्तमाचार्य्यपादैःप्रमाणानांविनिर्णये ॥ ४ ॥ स्वस्वरू
पंहिबोधार्थंवेदेष्वेवनिरूपितं ॥ सर्गादीनांप्रकाराश्चभक्तिर्मुक्तिश्चवर्णिता ॥ ५॥ परोक्षांचित्यरूपंयद्विस्पष्टंसाधनंफलं ॥ अ
तस्तैरेवजानीयुर्मायामोहितबुद्धयः ॥६॥ वेदास्तेस्वात्मकास्तेनोपदिष्टाब्रह्मणेपुरा ॥ तेनर्षिभ्यःस्वशिष्येभ्यस्तैस्तैःस्वेभ्यश्चद
र्शिताः ॥ ७ ॥ एवंपरंपराप्राप्ताआम्नायाभगवन्मयाः ॥ (स्कंध६) वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुम ॥८ ॥ श्वेताश्व
तरे॥योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै॥ तंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्ये॥ ९॥(स्कंध११)का

---

१ श्रीभागवतं

लेननष्टाप्रलयेवाणीयंवेदसंज्ञिता ॥ मयादौब्रह्मणेप्रोक्ताधर्म्मोयस्यांमदात्मकः ॥१० ॥ श्रुतिभागवतादौतत्स्पष्टमेवावगम्य
ते ॥ बहुप्रकारैर्बोधार्थंतत्रब्रह्मैवरूप्यते ॥ ११ ॥ नारायणपरावेदाइतिभागवतादिषु ॥ वेदैश्चसर्वैरहमेववेद्यइतिहिस्मृतिः ॥
॥ १२ ॥ तत्रावशिष्टंहरिणाविरक्तायार्जुनायतत् ॥ तथातदधिकारेणस्मृतिरूपेणरूपितं ॥ १३ ॥ सूत्रेषूभयरूपत्वंवाक्यं
२ शेषत्वमुच्यते ॥ वेदोऽपिब्रह्मवाक्साक्षात्तत्रस्यादेववेदता ॥१४॥ पाद्मेगीतामाहात्म्ये ॥ गीतासुगीताकर्त्तव्याकिमन्यैःशास्त्र
विस्तरैः ॥ यास्वयंपद्मनाभस्यमुखपद्माद्विनिर्गता ॥ १५ ॥ वेदस्यदुर्ज्ञेयार्थत्वाच्छास्त्रंसंदेहवारकं ॥ व्यासेनाविष्कृतंसूत्र
मयंब्रह्मनिरूपकं ॥ १६ ॥ तच्छिष्योजैमिनिरपिवेदैर्धर्मव्यचारयत् ॥ एवंकृत्स्नोहिवेदार्थोमीमांसातोवसीयते ॥ १७ ॥व्या
सोनिर्णीतवान्ब्रह्मस्वरूपंसाधनंफलं ॥ श्रुतितःस्मृतितःशास्त्रेन्यथैर्धत्तदसंमतं॥ १८ ॥ ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः ॥
प्रामाण्यमितिगीतासुतस्यभागवतेऽपिच ॥ १९ ॥ ( स्कंध १ ) जिज्ञासितंसुसंपन्नमपितेमहदद्भुतम् ॥ जिज्ञासितमधीतंच
यत्तद्ब्रह्मसनातनम् ॥ २० ॥ भारतेऽदर्शिवेदार्थःपुराणैरपिकैश्चन ॥ सूत्रकर्त्तुस्तथाप्यात्मानात्यतुष्यद्यदातदा ॥ २१ ॥ त
स्मैनारदवाग्द्वारोपदिष्टायसमाधितः ॥ भगवान्दर्शयामासरूपंभागवतात्मकं ॥ २२ ॥ यथापश्यत्तथैवाविश्वकाराक्षरशो
ऽखिलं ॥ श्रीभागवतरूपस्त्वंप्रत्यक्षःकृष्णएवहि ॥ २३ ॥ इतिपाद्मेस्फुटंज्ञानावतारोबादरायणः ॥ समतुष्यत्तदाकृष्णदर्शं २

१ श्रुतिस्मृतिरूपत्वं २ वेदवाक्यशेषत्वंगीतायाः ३ ईश्वरवाचि ४ अथातोब्रह्मजिज्ञासेत्यादिचतुरध्यायं ५ प्रथमेध्याये ६ तृतीयेध्याये ७ चतुर्थे ८ द्वितीये ९ श्रुतिस्मृत्यसंमतंसांख्यादिमतं १० अत्रसर्गोविसर्गश्चस्थानंपोषणमूतयइत्याद्यादश आदिशब्दादधिकारोज्ञानंच

लीलादिकीर्त्तनात् ॥ २४ ॥ भगवान्ब्रह्मणेदेवर्षयेसमुनयेचसः ॥ प्राकाशयदिदंव्यासःप्रादुश्चक्रेशुकादिभिः ॥ २५ ॥ कं स्मैयेनेत्यादितत्रानेकत्त्रैतत्प्रदृश्यते ॥ अन्यत्स्मृतिपुराणाद्यप्यासीत्तादृग्घरीच्छया ॥ २६॥ एवमेतानिचत्वारिसंशयघ्नानिच क्रमात् ॥ प्रकाशितानिहरिणाजीवानुग्रहकारिणा ॥ २७ ॥ अनादित्त्वाच्चभगवद्रूपत्त्वात्सर्वनिर्णये ॥ सर्वथैवप्रमाणं स्यादेषामरक्षमक्षरं ॥ २८ ॥ अन्यदेभ्योबहुतरमविरुद्धंप्रमापकं ॥ विरोधीन्यप्रमाणानिमोहशास्त्राणिसृष्टये ॥ २९ ॥ विरुद्धधर्माचित्यंतत्परोक्षंमहदद्भुतं ॥ अलौकिकेनशाब्देनज्ञातुमेतेनशक्यते ॥ ३० ॥ यद्यदिष्टंतुतत्सर्वंयद्वशेमृत्युरप्यसौ॥ अवश्यमेवज्ञातव्यंतद्दुःखातिनिवृत्तये ॥ ३१॥ ( स्कंध ११) लब्ध्वासुदुर्लभमिदंबहुसंभवान्तेमानुष्यमर्थदमनित्यमपीहधी रः ॥ तूर्णंयतेतनपतेदनुमृत्युयावन्निःश्रेयसायविषयःखलुसर्वतःस्यात् ॥ ३२ ॥ नजन्मनःप्राक्पितरौनापत्यंमृत्यनंतरं ॥ न स्त्रीस्वीयाविवाहात्प्राक्कस्मात्तन्ममतावृथा ॥ ३३ ॥ विक्रीतगृहभूषादौनष्टेदुःखंनजायते ॥ अविक्रीततुजायेतममतातत्रका रणं ॥ ३४ ॥ देवदत्ताभिधेदेहेमध्येऽहमितिमन्यते ॥ क्षणांतरेमृतौदेहःक्ववाजीवःक्वगच्छति ॥ ३५ ॥ करोत्यघंकुटुंबार्थं मृतेतद्रोदितिक्षणं ॥ नसहायस्तदादूतैर्यदानीयेतयातनां ॥ ३६ ॥ प्रियास्त्रीतनयागेहंधनाद्यत्रैवतिष्ठति ॥ देहोऽपिकितुयात्येकःपापपुण्यसहायवान् ॥ ३७ ॥ मुनिभिःसर्वगतिभिःखंस्थानांग्रहणादिकं ॥ यथातथाऽधोलोकस्यगतयोऽपिविनिश्चिताः ॥ ३८ ॥ देहेऽहंताचगेहाद्यौममतामाययातुया ॥ तेसंसारोवृथैतज्जंरागवैरादिकंत्यज ॥ ३९ ॥ सदासंबंधिनंसर्वदुःखघ्नं

---

१ द्वादशस्कंधे कस्मैयेनविभासितोयमतुलोज्ञानप्रदीपःपुरेत्यादि २ ब्रह्म

नित्यमीश्वरं ॥ स्नेहाद्व्रजमहानंदोऽमृतदेहोभविष्यसि ॥ ४० ॥ असेवनेमहान्दोषःपाद्मेयज्जीवलक्षणे ॥ दासभूतोहरेरेवनान्यस्यैवकदाचन ॥ ४१ ॥ इत्यसौसहजोदासोजीवःसृष्टःस्वभक्तये ॥ अभजंस्तंतुतद्दत्तंयोभुंक्तेस्तेनएवसः ॥ ४२ ॥ (भागवते) नृदेहमाद्यंसुलभंसुदुर्लभंप्लवंसुकल्पंगुरुकर्णधारं ॥ मयानुकूलेननभस्वतेरितंपुमान्भवाब्धिंनतरेत्सआत्महा ॥ ४३ ॥ अतोऽवश्यंसेवनीयोनिरपेक्षोपकारकृत् ॥ ज्ञातव्यश्चयथार्थास्याद्भक्तिर्ज्ञानंविनानयत् ॥ ४४ ॥ वेदादिनिष्ठामुनयोबहवोज्ञानचक्षुषः ॥ अपश्यन्भक्तियोगेनसंप्रापुस्तंपुराविदः ॥४५॥ यतमानोविदंर्वेदः[1]शक्त्यादीनोभजेद्रतः ॥ माहात्म्यज्ञोऽस्यकृपयासुलभंस्यात्सुदुर्लभम ॥ ४६॥ सर्वैरनन्यशरणैःप्रवर्ण्यमानंप्रमाणबंदिगणैः ॥ महतःफलांतरंगंभजामिबीजंप्रपंचतरोः॥४७॥ इतिश्रीमद्वल्लभाचार्यमतवर्तिश्रीव्रजवल्लभचरणानुचरपंचनदीघनश्यामभट्टात्मजगोवर्धनशीघ्रकविविरचितेवेदांतचिंतामणौप्रमाणनिरूपणंनामद्वितीयंप्रकरणं ॥ २ ॥ ॥ ७ ॥ शुद्धाद्वैतैकरूपायशुद्धद्वैतप्रदर्शिने ॥ शक्त्यासर्गादिलीलायनमोऽस्त्वद्भुतकर्मणे ॥ १ ॥ सविश्वंलीलयैवेदंसृजत्यवतिहंत्यजः ॥ तथायतोवाइमानिभूतानीतिप्रपठ्यते ॥ २ ॥ तैत्तिरीयेषुतस्माद्वाएतस्मादितिचस्फुटं ॥ तदस्यब्रह्मरूपत्वंब्रह्मकार्यस्ययुज्यते ॥ ३॥ मृदुद्भूतघटादीनांमृन्मयत्वंनिरीक्ष्यते ॥ यत्सर्वंखल्विदंब्रह्मतज्जलानितिहिश्रुतिः ॥ ४ ॥ सर्वंपुरुषएवेदंभूतंभव्यंभवच्चसत् ॥ इतिभागवतेसूक्तंपौरुषंसमनूदितम् ॥[2] ५ ॥ यथाघटशरावाद्याऽऽकृतिमात्रेणभिद्यते ॥ नभिद्यतेमृन्मयत्वात्तथैवात्रचराचरं ॥ ६ ॥ मृद्रूपाप्रथमावस्थामध्येभिद्येतकारणात् ॥ घ



१ ज्ञानाय २ द्वितीयस्कंधे

टाद्याकारभेदेनमृत्सातद्वदपिवस्तुतः ॥ ७ ॥ लयेऽपिशकलाःसूक्ष्माःसूक्ष्माजायंतएवहि ॥ तेमृद्येवप्रलीयंतइत्यन्तेऽप्यस्यमृत्ति
का ॥ ८ ॥ तथाब्रह्मैवात्रपूर्वमंतेब्रह्मैवशिष्यते ॥ मध्येक्रीडार्थभेदार्थंनानातेनेच्छयाकृतं ॥ ९ ॥ सर्वाकारंसर्वशक्तिसर्वध
र्माश्रयोहितत् ॥ सच्चिदानंदरूपंचतस्मादाविरभूज्जगत् ॥ १० ॥ जडजीवांतरात्मानःपूर्वमाविष्कृताइमे ॥ एकंद्वयंत्रयंतत्र
भेदायास्थापयद्विभुः ॥ ११ ॥ जडेसदंशःप्रकटश्चिदानंदौतिरोहितौ ॥ जीवेचसच्चितावंतर्यामिण्येतत्त्रयंस्फुटं ॥ १२ ॥ स
न्नामविद्यतेचिच्चचैतन्येनप्रकाशते ॥ आनंदःप्रियतातीवेत्येषांप्रत्यक्षलक्षणम् ॥ १३ ॥ जडंसर्वंमृदश्मादिक्रि[1]याशून्यंस्वे[2]तो
हियत् ॥ सत्तामात्रंजडस्यास्तिनप्रीतिर्नप्रका[3]शनम् ॥ १४ ॥ तनोर्यत्संबंधएवश्वासादिर्नशवेऽन्यथा ॥ सोऽणुमात्रश्चत्द
त्स्थानोजीवोजीवनकारणं ॥ १५ ॥ सविद्यतेऽखिलेदेहेचैतन्येनप्रकाशते ॥ जीवेनविषयानंदोयद्यप्येषोऽनुभूयते ॥ १६ ॥
न्यूनाधिकःसक्षणिकोनपूर्णानंदउच्यते ॥ तस्यैवानंदस्यमात्रामुपजीवंतिहिश्रुतिः ॥ १७ ॥ भिन्नःप्रतिशरीरंयोऽणुर्हृत्स्थो
हंसशब्दभाक् ॥ साक्षीसोंऽ[4]तःस्थितःस्पष्टंतत्रतत्त्र[5]यमेवहि ॥ १८ ॥ भू[6]तैर्नानातनूःसृष्ट्वाजीवांतर्यामिणावुभौ ॥ प्रत्येकंसं
स्थाप्यजीवान्माययामोहयत्प्रभुः ॥ १९ ॥ जडेष्वपीच्छयाधर्मांस्तिरोभाव्याखिलान्निजान् ॥ केचित्क्वचित्क्वचित्केचि
च्छेषिताभेदसिद्धये ॥ २० ॥ प्ररोहोमार्दवंकिंचिद्वृक्षेकाठिन्यमश्मसु ॥ अप्ररोहश्चेतिभेदोमृज्जातेष्वपिगम्यते ॥२१॥ अनु
ष्णाशीतलस्पर्शोभूवाय्वोरप्सुशीतलः ॥ सतेजस्युष्णएवेतिधर्माणामप्यनेकता॥२२॥चिदाद्यभावतोरूपेबव्हाकारप्रकारतः॥

१ चेष्टा २ चेतनासमवधानात् ३ अस्मित्वप्रत्ययः ४ अंतर्यामी ५ सच्चिदानंदाः ६ आकाशादिभिः

परस्परंविभिन्नानांधर्माणामपिदर्शनात् ॥ २३ ॥ सज्ज्ञानानांचजीवानांमाययामोहनाद्दृढम् ॥ महान्प्रदृश्यतेभेदोब्रह्मत्वं 
नैवलक्ष्यते ॥ २४ ॥ वस्तुतस्त्वखिलंब्रह्मत्रिकालेषुतथास्मृतिः ॥ वासुदेवःसर्वमितिसमहात्मासुदुर्लभः ॥२५॥ ( स्कंध८ )
५ त्वय्यग्रआसीत्त्वयिमध्यआसीत्त्वय्यंतआसीदिदमात्मतंत्रे ॥ त्वमादिरंतोजगतोऽस्यमध्यंघटस्यमृत्स्नेवपरःपरस्मात् ॥ २६ ॥
भूतानिविष्णुर्भुवनानिविष्णुः॥इतिभागवतेविष्णुपुराणेऽन्यत्रचोदितम् ॥ तस्मादभिन्नमेवास्तिकारणाद्ब्रह्मणोजगत् ॥ २७ ॥
आविर्भावेचिदादीनांधर्माणामपिसर्वशः ॥ ब्रह्मैवैकंतदापूर्णंसर्वस्यादेवकेवलं ॥ २८ ॥ दृश्यतोकारतोभेदोमुद्रिकाकटका
दिषु ॥ आदिमध्यावसानेषुस्वर्णमेवेतिनिश्चयः ॥ २९ ॥ जीवानांब्रह्मविज्ञानादानंदांशप्रकाशनात् ॥ सर्वत्रलीलयाताद्दृक्
ब्रह्मैवैकंप्रतीयते ॥ ३० ॥ नानात्वमैच्छिकंमध्येऽचिंत्यत्वाद्दृश्यतेमहत् ॥ तमोनाशेशुद्धदृष्टेर्नेहनानास्तिकिंचन ॥ ३१ ॥ ब्र
ह्मरूपःसदासत्यःप्रपंचस्तत्कृतोऽखिलः ॥ निरूप्यतेहिवेदादौशुद्धाद्वैतमतोमतम् ॥ ३२ ॥ सत्यस्वरूपमेतत्स्वस्मादाविष्कृतं
स्वयंयेन ॥ कर्त्तारंभर्त्तारंहर्त्तारंभजसदाललितलीलम् ॥३३॥ ॥इतिश्रीमद्वल्लभाचार्य्यमतवर्त्तिश्रीव्रजवल्लभचरणानुचर
पंचनदीघनश्यामभट्टात्मजगोवर्द्धनशीघ्रकविविरचितेवेदांतचिंतामणौसंक्षेपतस्त्रिविधकार्यनिरूपणंनामतृतीयंप्रकरणं॥३॥
भगवत्समवायित्वात्ताद्रूप्यात्सत्यएवहि ॥ प्रपंचोयादृशंस्वर्णंताद्दृक्स्यादेवकुंडलं ॥ १ ॥ तंतुकार्यंपटस्तंत्वात्मकःस्युस्तंतवो
यथा ॥ सूक्ष्माःसिताश्ववस्त्रेऽपितत्ताद्दृक्षत्वमीक्ष्यते ॥ २ ॥ ऐतदात्म्यमिदंसर्वंतत्सत्यमितिपठ्यते ॥ यदिदंकिंचततसत्यमित्या ५

१ छांदोग्येश्वेतकेतुविद्यायां २ तैत्तिरीयब्रह्मवल्यां

चक्षतइत्यपि ॥ ३ ॥ सर्वशब्देननिर्दिश्यदृष्टंश्रुतमदोऽखिलं ॥ एतस्यब्रह्मरूपत्वंसत्त्यत्वंचनिरूप्यते ॥ ४ ॥ कालत्रये
ऽप्यबाध्यंयत्सत्त्यमित्युच्यतेबुधैः ॥ त्वय्यग्रआसीत्पद्येऽपिसदासत्ताभिधीयते ॥ ५ ॥ तस्मात्सनातनमिदमखंडंवर्त्ततेस
दा ॥ मध्येकार्य्यात्मनापूर्वोत्तरयोःकारणात्मना ॥ ६ ॥ विश्वंहिब्रह्मतन्मात्रंसंस्थितंविष्णुमायया ॥ यथेदानींतथा
चाग्रेपश्चादप्येतदीदृशं ॥ ७ ॥ उक्तंतृतीयस्कंधेऽथसूत्रकर्त्राश्रुतेर्बलात् ॥ कारणानन्यतामस्योक्त्वासत्त्यत्वंप्रपंचितं ॥ ८ ॥
( अ० २ पा० १ सू० ) १४ तदनन्यत्वमारंभणशब्दादिभ्यः ॥ १५ भावेचोपलब्धेः ॥ १६ सत्वाच्चावरस्य ॥ १७
असद्व्यपदेशान्नेतिचेन्नधर्मांतरेणवाक्यशेषात् ॥ १८ युक्तेःशब्दांतराच्च ॥ १९ पटवच्च ॥ ब्रह्मानन्योस्तिसत्योयंभावेसत्यु
पलभ्यते॥अवरस्यप्रपंचस्यसत्त्वमुक्तंश्रुतौश्रुतं ॥ ९॥ असद्वाइदमित्येतदव्याकृतिपरंमतं॥तदात्मानंस्वयमितिवाक्यशेषस्यसं
गतेः ॥१० ॥ समवेतंभवेत्कार्यंयुक्तिर्बीजद्रुमादिवत् ॥ वाक्यान्तराणिसत्यत्वबोधकानिबहूनिहि ॥ ११ ॥ पटोनुभूयतेस
र्वोविस्तीर्णोनानुभूयते ॥ संकोचेल्पतयातद्वत्सृष्टिप्रलययोर्जगत् ॥ १२ ॥ व्याख्यातमित्थंभाष्येसत्कार्यवादोविविच्यते ॥
एवंसर्वत्रवेदादौयुक्तिभिश्चानुभूयते॥ १३ ॥ आविर्भावतिरोभावाभ्यांनैवास्तिह्यनित्यता ॥ आविर्भावेप्रतीयेततिरोभावे
तुनेच्छया ॥ १४ ॥ आविष्कृतानिभूतेभ्यःशरीराणीच्छयास्वयं ॥ ईश्वरोजीवयुक्तानिनिमित्तीकृत्यकेवलं ॥ १५ ॥ भूते
भ्यआविष्कुरुतेतादृशानीतराण्यपि ॥ तानिकर्मानुसारेणजीवान्प्रापयतिप्रभुः ॥ १६ ॥ देहाःसंत्येवभूतेषुभागैःकारणरूप
तः ॥ मध्येकार्य्यात्मनाभिन्नालीयंतेऽन्तेचकारणे ॥ १७ ॥ जीवस्तुनित्यएवास्तियोगोभगवदिच्छया ॥ आविर्भावतिरो

भावशालिनित्त्यमतोऽखिलं ॥ १८ ॥ व्यासेनभारतेयोधोयहतास्तेप्रदर्शिताः ॥ इतिनित्यंतिरोभावेऽपीच्छयादृश्यतेक्वचि
त् ॥ १९ ॥ केचिदाहुर्जगन्मिथ्याभ्रमाद्ब्रह्मणिदृश्यते ॥ यथेहरजतंशुक्तौयथारज्जौभुजंगमः ॥ २० ॥ ब्रह्मादृश्यंसर्वथैवनि
राकारंमतेचते ॥ साकारेदृश्यएवस्यादाश्रयेनिश्चितंभ्रमः ॥ २१ ॥ नधूल्याच्छन्नशुक्तौवावायौवाभ्रांतिरिष्यते ॥ किंचसा
धर्म्म्यमूलोऽयंशुक्तौयच्चाकचक्यतः ॥ २२ ॥ किनान्यथागजभ्रांतिर्मायिकंसगुणंजगत् ॥ निर्धर्मकंविमायंतत्साम्यगंधो
ऽपिनानयोः ॥ २३ ॥ हट्टादौरजतंसत्यंवल्मीकादौचपन्नगः ॥ दृश्यतेतज्जसंस्कारात्कल्पयेद्धीर्मृषाश्रये ॥ २४ ॥ त
थाभिन्नमऽतःसत्त्यंदृष्टंचेदीदृशंक्वचित् ॥ तदाकल्प्येतसंस्काराद्दृश्यतेश्रूयतेननतत् ॥ २५ ॥ नन्वसत्योयथास्वमोगृह
वित्तादिलभ्यते ॥ मिथ्यातंत्रननिद्रांतेतदसत्यमिदंतथा ॥ २६ ॥ इतिचेन्नतदोद्भूतैःपापैःपुण्यैर्नवैभवेत् ॥ दुःखंसुखं
वातत्सर्वंजगज्जाभ्यांतुजायते ॥ २७ ॥ दृष्टंजाग्रदवस्थायांयद्यद्धटपटादिकं ॥ संस्कारात्कल्प्यतेतत्तन्मोहनान्मायया म
तेः ॥ २८ ॥ अस्यजाग्रदवस्थातुमोक्षस्तत्रनकिंचन ॥ क्वत्यंसत्यंतदादृष्ट्वाऽत्राऽसत्यंपरिकल्पितं ॥ २९ ॥ नन्वदृष्टम
पिस्वमेदृश्यतेश्रृंगवाञ्छशः ॥ चलन्वृक्षोगजःपीतइत्याद्यत्राखिलंतथा ॥ ३० ॥ इतिचेन्नशशोवृक्षोहस्तीश्रृंगंगतिक्रिया॥
पीतवर्णइमेदृष्टायोगमात्रंतुकल्प्यते ॥ ३१ ॥ गृहंसत्यंस्वयंसत्योयोगोममतयामुधा ॥ जीवःसत्यस्तनुःसत्याऽहंताराजत्वव
द्वृथा ॥ ३२ ॥ सिद्धांतइतिचेत्तर्हिदृष्टांतउपपद्यते ॥ पुराणेष्वप्येतदर्थंस्वमाभत्वंक्वचित्कृतं ॥ ३३ ॥ अतःसूत्रेषुवैधर्म्या

---

१ स्वमे २ स्वाभिकवस्तु ३ विमादेःस्वमेराजैवाहमितिमतीतिवत्

च्चनस्वप्नादिवत्त्वतः ॥ निषिध्यतेऽधिकरणादसत्यत्वंतुवस्तुतः ॥ ३४ ॥ स्वप्नेभुक्त्यंबुपानाभ्यांक्षुत्तृण्णैवनिवर्त्तते ॥ तदादेहकृतैर्बंधात्कथंमुच्येतसाधनैः ॥ ३५ ॥ तस्मादसत्त्यंनैवेदंताद्रूप्यान्नित्यमेवहि ॥ श्रुतिष्वनेकत्रसत्यत्वमुक्तंनान्यथाक्कचित् ॥ ३६ ॥ ( द्वादशस्कंधे ) एतत्केचिदविद्वांसोमायासंस्तृतिमात्मनः ॥ अनाद्यावर्त्तितंनृणांकादाचित्कंप्रचक्षते ॥ ३७ ॥ असत्त्यमप्रतिष्ठंतेजगदाहुरनीश्वरं ॥ इत्यासुरेषुगणिताअसत्त्यत्वप्रवादिनः ॥ ३८ ॥ दृढाहंतापदंदेहंगेहादिममतास्पदं ॥ यदासत्त्यंविजानीयान्नविरज्येतकश्चन ॥ ३९ ॥ वैराग्यार्थमसत्त्यत्वंपुराणेषुक्कचित्कचित् ॥ अभिप्रेत्यतिरोभावंकुत्रचित्तंस्तृतितथा ॥ ४० क्रीडामयेप्रभोरस्मिन्संयोगविगमास्पदे ॥ तिरोभाविनिनोरागःकर्त्तव्यःक्षणिकेदृथा ॥ ४१ ॥ शेषेणाप्यस्यनित्यत्वंनिश्चितंपस्पशान्हिके ॥ नित्यःकार्य्योऽथवाशब्दइत्याकारविचारणे ॥ ४२ ॥ नित्येशब्दार्थसंबंधइत्येतत्तुविवृण्वता ॥ शब्दश्चार्थश्चसंबंधस्त्रयोनित्यानिरूपिताः॥४३॥ एवंसर्वत्रशास्त्रेषुनित्यमेवनिरूपितं॥आविर्भावतिरोभावाभ्यांमिथ्याभात्यनित्यता ॥ ४४ ॥ असच्छास्त्रेष्वनित्यत्वंन्यायादिषुविविच्यते ॥ सनास्तिक्येषुमोहायमुनिभिर्निर्मितेष्विह ॥४५॥ उत्तरोत्तरसर्गार्थंमोहनायमनीषिणाम् ॥ रुद्रादिदैवतैःकैश्चिन्मतेषुरचितेषुच ॥ ४६ ॥ तादृक्छास्त्राभ्यसनतोभ्रांतचित्ताःस्वकर्मभिः ॥ अप्राप्ततत्वाजायंतेम्रियंतेचमुहुर्मुहुः ॥ ४७ ॥ ( मार्कंडेये अ० ८१ ) ज्ञानिनामपिचेतांसिदेवीभगवतीहिसा ॥ बलादाकृष्यमोहायमहामायाप्रयच्छति ॥ ४८ ॥ केचिदेवतुवेदार्थंप्रसादात्सद्गुरोर्हरेः ॥ विनिश्चित्यभजंतस्तंमुच्यंतेप्राप्नुवन्त्यपि ॥ ४९ ॥ नित्यंस्वरूपमखिलमाविर्भाव्यस्वयंतिरोभाव्य ॥ रममाणमविहतेच्छंतत्पदकेहीरकंविरचयाच्छं ॥

॥ ५० ॥ इतिश्रीवेदांतचिंतामणौप्रपंचसत्यत्वनिरूपणंनामतुर्य्यप्रकरणं ॥ ४ ॥ ॥ ७ ॥ ॥ ७ ॥

ननूत्पत्तिर्घटस्यास्तिध्वंसोप्यस्यविलोक्यते ॥ कथंवाच्याप्रपंचांतःपातिनस्तस्यनित्यता ॥ १॥ अनंतंसत्यनादित्वेनित्यमित्यु
च्यतेकथं ॥ नश्वरंनित्यमितिचेद्यथैतत्कथ्यतेतथा॥ २॥घटेनष्टेतुकिंनष्टंनाकारोऽन्यत्रदृश्यते ॥ नमृत्तिकाप्रस्थमिताचेत्ताव
त्येवलभ्यते॥ ३॥ननष्टाघटसंज्ञापिशब्दानांनित्यतायतः ॥ सृष्ट्यारंभादनेकेस्युर्ध्वस्तास्तेसातुविद्यते॥ ४॥किंत्वाकारमृदोर्यो
ऽभूत्संज्ञायावाचकत्वतः॥तत्राकारतिरोधानेसंयोगःसनवर्त्तते॥ ५॥सर्वाकारोहरिःपूर्णएकैकाकारतःपृथक्॥ बहुत्वमिच्छनूरू
पाणिचकारद्विविधान्यपि॥ ६॥सर्ववर्णानुपूर्वीकैःशब्दैर्वाच्योऽर्थतःस्वयं॥व्यवहारायनामान्यप्यैकैकस्येच्छयाव्यधात् ॥ ७॥
सर्वाणिरूपाणिविचित्यधीरःनामानिकृत्वाभिवदन्यदास्ते ॥ तद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यांव्याक्रियते ॥ नामरूपे
व्याकरवाणीत्याद्याःश्रुतयोऽवदन् ॥ तच्चित्तौबृहदारण्येछांदोग्येन्यत्रचक्रमात् ॥ ८ ॥ कंबुग्रीवादिमांस्तेष्वाकारोयोनियतः
पुरा ॥ योगस्तावन्मृदस्तस्यचोत्पत्तिरितिकथ्यते ॥ ९॥ अयमर्थःपदादस्माद्बोध्यइत्थंस्वनामसु ॥ स्वीयेष्वेकैकरूपेषुसंकेतो
यःपुराकृतः ॥ १० ॥ तस्मात्परंपराप्राप्तात्तथाव्यवहृतेस्तयोः ॥ योगंघटेत्यानुपूर्वीवक्तिवाच्यतयातदा ॥ ११ ॥ व्यवहारा
भवंत्यस्मात्तेजलानयनादयः ॥ यआकारानुसाराद्वास्तप्वानियमिताःपुरा॥ १२॥ अनंतरंतथेच्छातोनिमित्तीकृत्यकिंचन ॥
तिरोभाव्यतआकारःक्रियतेमृल्लयोमृदि ॥ १३ ॥ घटशब्दस्यवाच्यस्तुदृश्योयोगोवियोगतः ॥ तत्राप्रवृत्तेःसंज्ञायानष्टोघ

---

१ घटांतरेषु २ चराचराणि.

टइतीरणा ॥ १४ ॥ पृथूदरत्वाद्याकारःसमपस्तुतिरोहितः ॥ भिन्नभिन्नायआकारादृश्यंतेऽवयवेषुते ॥१५ ॥ पूर्वाकारांश
भूताहिघटस्यशकलाइव ॥ तेषामपितिरोधानंयदाणुत्वंभवेत्तदा ॥ १६ ॥ वस्तुनोविद्यमानस्यजीवानुभवयोग्यता ॥ आ
विर्भावस्तिरोभावोऽतोऽन्यथेतिहिलक्षणं ॥ १७ ॥ आविर्भावतिरोभावावुत्पत्तिर्नाशइत्यपि ॥ शास्त्रविद्भिर्विकल्प्येतेविदु
र्ब्रह्मविदस्तुतौ ॥१८॥ तदेतदक्षयंनित्यंजगन्मुनिवराखिलं ॥ अविर्भावतिरोभावजन्मनाशविकल्पवत् ॥१९( अध्याय२२
श्लो० ५९ ) इतिविष्णुपुराणेपिप्रथमांशेनिरूपितं ॥ उक्तंभागवतेप्येतद्दशमेहरिणास्वयं॥२०॥खंवायुर्ज्योतिरापोभूस्तत्कृते
षुयथाशयं ॥ आविस्तिरोऽल्पोभूर्यैकोनानात्वंयात्यसावपि ॥२१॥ छांदोग्येतस्यैवंविजानतएवंमन्वानस्येत्युपक्रम्य ॥ आ
विर्भावतिरोभावावात्मनोऽन्नमात्मनइतिश्रूयते ॥ २२ ॥ स्पष्टंश्रुत्यंतरेकेनबृहदारण्यकादिमे ॥ मार्कंडेयपुराणेपितुर्येध्याये
निरूप्यते ॥ २३ ॥ ( श्लो० ३९ ) आविर्भावतिरोभावदृष्टादृष्टविलक्षणम् ॥ वदंतियत्सृष्टमिदंतथैवान्तेचसंस्तृतम् ॥ २४ ॥
पुराणेब्रह्मवैवर्तेखंडेश्रीकृष्णजन्मनः ॥ एकविंशेतथाध्यायेनंदादीन्कृष्णआहतत् ॥ २५ ॥ ( श्लो० ९ ) स्थानेस्थानेपृ
थिव्यांचकालेकालेयथोचितम् ॥ ईशेच्छयाविर्भूतंहिनभवेत्प्रतिबंधकं ॥२६॥तथा॥ (श्लो० १२१) ब्रह्मांडंवाकतिविधमा
विर्भूतंतिरोहितम् ॥ विधेयावाकतिविधास्तस्यभ्रूभंगलीलया ॥ २७ ॥ देहोपिपंचभूतेभ्यआविर्भूतस्तदिच्छया ॥ योगो
त्रयोग्यभागानांतेषांतत्तादृगाकृतेः ॥ २८ ॥ कर्मानुसारतोजीवस्तावत्कालंभुनक्तितं ॥ व्यवहारास्तदातस्मिन्स्युर्मनुष्यग
वादयः ॥ २९ ॥ परतंत्रःसतांत्यक्त्वायदादेहांतरंव्रजेत् ॥ वियुज्यंतेदह्यमानेदेहेतान्याकृतिस्तथा ॥ ३० ॥ आकारस्तुतिरो

 धत्तेतेजोऽलीयेततेजसि ॥ श्वासादिरूपोयोवायुःसोऽवशिष्टस्तुतंविशेत् ॥ ३१ ॥ आकारवद्धआकाशस्तत्तिरोधानतोगतः॥ 
जलंतेजसिभूमौवाभूमिर्भस्मादिरूपतः ॥ ३२ ॥ वियुक्तान्यपिविद्यंतेसंज्ञायाअप्रदत्निनतः ॥ संयोगस्याभिधेयत्वान्नष्टोऽसा
८ वितिगद्यते ॥ ३३ ॥ मुक्ताभिर्ग्रथ्यतेमध्येनिधायपदकान्यपि ॥ गुणैस्तेषांससंयोगोहारइत्यभिधीयते ॥ ३४ ॥ मुक्तादीनां
वियोगे नहारसंज्ञाप्रवर्त्तते ॥ संयोगविगमावेवतौनैकस्यापिहिक्षयः ॥ ३५ ॥ यथाक्रीडोपस्कराणांसंयोगविगमाविह ॥
इच्छयाक्रीडितुःस्यातांतथैवेशेच्छयानृणां ॥ ३६ ॥ इत्युक्तंप्रथमेस्कंधेतृतीयेपिविवेचितम् ॥ तन्निरोधोऽस्यशयनमावि
र्भावस्तुसंभवः ॥ ३७ ॥ कार्यकारणरूपेणतिरोभावेतुविद्यते ॥ आविर्भावेतुतद्रूपंतदिच्छातोविभिद्यते ॥ ३८ ॥ सएवप्रोय
तेहारःपुनःप्रोतुंयदीष्यते ॥ आविष्कुर्यात्तमेवैवंदेहमिच्छेद्यदीश्वरः ॥ ३९ ॥ मुद्रिकानिष्ठमाणिक्यंकुंडलेजटितंयथा ॥ पर[1]
वानीशितुर्जीवस्तनूंयातितथेतरां ॥ ४० ॥ वासांसिजीर्णानियथाविहायनवानिगृह्णातिनरोऽपराणि ॥ तथाशरीराणिवि
हायजीर्णान्यन्यानिसंयातिनवानिदेही ॥ ४१ ॥ मुद्रिकायामिद्रमणिस्तस्यांजट्यतइच्छया ॥ परकायप्रवेशादौजीवस्या
वस्थितिस्तथा ॥ ४२ ॥ तस्यांतदेवमाणिक्यंशक्यतेजटितुंपुनः ॥ तथाविर्भाव्यतानेवक्कचिद्दर्शयतिप्रभुः ॥ ४३ ॥ भारते
दर्शिताःसर्वेप्रादुर्भाव्यतएवहि ॥ व्यासद्वारातुतत्स्पष्टंपर्वण्याश्रमवासिके ॥ ४४ ॥ सर्वेभवंतोगच्छंतुनदींभागीरथींप्रति ॥
ततोद्रक्ष्यथसर्वांस्तान्येहताःस्मरणाजिरे ॥ ४५ ॥ ततःसर्वेसदारास्तत्रगत्वावगाह्यरात्रौव्यासाश्रमंजग्मुः ॥ ततोव्यासोमहाते 

---

[1] परतंत्रः

जाःपुण्यंभागीरथीजलं ॥ अवगाह्याजुहावाथसर्वाँल्लोकान्महामुनिः॥ ४६ ॥ पांडवानांचयेयोधाःकौरवाणांचसर्वशः॥ राजानश्चमहाभागानानादेशनिवासिनः ॥ ४७ ॥ ततःसुतुमुलःशब्दोजलांतेजनमेजय ॥ प्रादुरासीद्यथापूर्वंकुरुपांडवसेनयोः ॥ ४८ ॥ ततस्तेपांडवाःसर्वेभीष्मद्रोणपुरोगमाः ॥ ससैन्याःसलिलात्तस्मात्समुत्तस्थुःसहस्रशः ॥ ४९ ॥ इत्यादिनाप्रत्येकंनाम्नानिरूप्योवाच ॥ एकांरात्रिंविहृत्यैवंतेवीरास्ताश्चयोषितः ॥ आमंत्र्यान्योन्यमाश्लिष्यततोजग्मुर्यथागतं ॥ ५० ॥ एतदाकर्ण्यजनमेजयोऽन्वयुंक्त ॥ कथंत्यक्तदेहानांपुनस्तद्रूपदर्शनमिति ॥ तदानींवैशंपायनउवाच ॥अविप्रणाशःसर्वेषांकर्मणामितिनिश्चयः ॥५१ ॥ कर्मजानिशरीराणितथैवाकृतयोनृप ॥ महाभूतानिनित्यानिभूताधिपतिसंश्रयात् ॥५२ ॥ इत्यादि ॥ एतदग्रे ॥ अविनाशीतथानित्यःक्षेत्रज्ञइतिनिश्चयः ॥ भूतानामात्मभावोयोध्रुवोसौसंप्रजानताम ॥ ५३ ॥ इत्यादिभारतेप्रोक्तमन्यत्रापिस्फुटंत्विदं ॥ संगृहीतमिदंविद्वन्मंडनेप्रभुभिःस्वयं ॥ ५४ ॥ संयोगविगमौतस्माद्देहादेर्भाष्यकृत्ततः ॥ व्यधात्कचिच्चसदसत्प्रपंचेगणनामपि ॥ ५५ ॥ क्रीडार्थमाविर्भवतिनानारूपैर्निजेच्छया ॥ सर्वधर्मातिरोधत्तेशक्तिमान्भगवान्स्वयम् ॥ ५६ ॥ आविर्भावतिरोभावौशक्तीवैमुरवैरिणः ॥ इत्याचार्य्यैःसंगृहीताद्वचनाच्छक्तितातयोः ॥ ५७ ॥ परास्यशक्तिर्विविधैवश्रूयतइतिश्रुतिः ॥ यःसर्वज्ञःसर्वशक्तिरितिसर्वास्विमावपि ॥ ५८ ॥ आविर्भावयनीत्येकातिरोभावयतीतरा ॥ तत्कार्य्यमाविर्भवनंतिरोभवनमप्यथ ॥ ५९ ॥ यद्रूपकर्मकमयमाविर्भवनमिच्छति ॥ तयाविर्भावयतितत्तिरोभावेऽप्ययंक्रमः ॥ ६० ॥ नित्येतेभगवच्छक्तीनकार्य्ययुगपत्तयोः ॥ सर्वात्माशक्ति

मान्किंतुयद्यत्कर्मकमिच्छति॥ ६ १ ॥ गमनादानशक्तीतुवर्त्तेतेचरणेकरे ॥ देहीच्छयातयोःकार्यंतदभावेप्रसुप्तता ॥ ६ २ ॥
ब्रह्मनिष्ठमिदंसर्वंतस्याविर्भवतीच्छया ॥ जातउत्पन्नइत्याद्यातस्मिन्व्यवहृतिस्तदा ॥ ६ ३ ॥ आविर्भावोहिजननंप्रादु
१ र्भावेजनिर्यतः॥उत्पूर्वौवापदगतौधातुरुत्पत्तिरुद्गमः॥ ६ ४ ॥ नदृश्यतेतिरोभूतंवस्तुब्रह्मणितन्मयं॥यथाजवनिकाच्छन्नंपटा
दिनविलक्ष्यते॥ ६ ५॥नाशमाप्तोनाशमाप्तइतिव्यवहृतिस्तदा॥वस्तुतोऽदर्शनंनाशोनशधातुरदर्शने॥ ६ ६ ॥चेतनेव्यवहारस्तु
मृतइत्यपिजायते॥प्राणत्यागेहिमृङ्प्राणःसंघातस्थोवियुज्यते॥ ६ ७ जीवोपाधिःससंघातोजीवेनसहगच्छति॥जीवदेहवि
योगोऽतोमृतिरित्यभिधीयते॥ ६ ८॥तौधात्वर्थविचारेतुव्यवहारेपिसिध्यतः॥ नाशोत्पत्तिविकल्पस्त्वपरिनिष्ठधियामयम्॥
॥ ६ ९॥नाशोत्पत्तिविदांशोकोऽप्यनित्यत्वधियाभवेत्॥ नित्यत्वज्ञाब्रह्मनिष्ठानविमुह्यंतिकर्हिचित्॥ ७०॥नित्यत्वंबोधितंस्प
ष्टंगीतासुहरिणास्वयं ॥ अज्ञानस्यविनाशायततोनष्टार्जुनस्यशुक् ॥ ७१ ॥ नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः ॥
नचैवनभविष्यामःसर्वेवयमतःपरं ॥ ७२ ॥ दृश्यमानप्रपंचस्यमिथ्यात्वंसुप्रमाणतः ॥ महतैवप्रपंचेनभाष्यकारोनिरस्तवा
न् ॥ ७३ ॥ विस्तृतंरूपमनयोराचार्यचरणादिभिः ॥ बालबोधोपयोग्येवसंक्षेपेणेहवर्णितं ॥ ७४ ॥ तस्मात्क्रीडास्पदंवि
श्वंनित्यंभगवदात्मकम् ॥ आविर्भावतिरोभावशालिवेदादिषूदितम् ॥ ७५ ॥ तद्ध्यानमानसःस्याएकोप्यविकारएवयोभ ९

---

टी. १ लिंगशरीरं.

वति ॥ रमणेच्छयाबहुविधःकुर्वैश्वर्यांमहाश्वर्याम्॥ ७६ ॥ ॥ इतिवेदांतचिंतामणौआविर्भावतिरोभावनामपंचमंप्रक
रणंसंपूर्त्तिमाप्तम् ॥ ५ ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यआविर्भावयत्यत्तिबाह्यांतररतीच्छया ॥ समवाय्यप्यविकृतस्तस्मैभगवतेनमः ॥ १ ॥ सर्वत्रवादत्रितयंतदत्रसविस्तरंशास्त्रग
णैरवर्णि ॥ आरंभवादोथविवर्तवादस्तथातृतीयःपरिणामवादः ॥ २ ॥ तत्रनित्यंविभुनभोवाय्वादीनांविविच्यते ॥ चतुर्णां
यत्रपरमाणुरूपाणांतुनित्यता ॥ ३ ॥ कार्य्यरूपाण्यनित्यानितेषामारंभतोऽभवन्॥ ईश्वरस्तुनिमित्तंवाब्रह्मभिन्नमिदंजग
त् ॥ ४ ॥ नतदंशोविभुर्जीवःकालोद्रव्यांतरंचसः ॥ इत्यादिरूपआरंभवादस्तार्किकसंमतः ॥ ५ ॥ तदद्वैतश्रुतिशतैःखं
डितंमोहनात्मकं ॥ आचार्यैःप्राक्तनैरत्रनविस्तरभियोच्यते॥ ६॥ असत्यंकल्पितंविश्वंभ्रांत्यारज्जुभुजंगवत् ॥ सशांकराणां
विवर्त्तवादःप्रागिहदूषितः ॥ ७ ॥ प्राचीनाचार्य्यचरणवन्हिवाग्वार्धिवर्द्धिते ॥ खंडितोबहुधाशुद्धाद्वैतचंद्रोदयेमया ॥८॥
सर्वकार्यात्मनायत्रकारणंमृद्घटादिवत् ॥ नानापरिणमत्येषपरिणामःप्रकीर्तितः ॥ ९ ॥ विकृताविकृतत्वाभ्यांपरिणामो
द्विधामतः ॥ विकृतंसत्परिणमेत्कारणंकार्य्यरूपतः ॥ १० ॥ नपुनःकारणात्मत्वंविकृतःसोभिधीयते ॥ दुग्धाद्दधियथा
जातंपुनर्दुग्धंनजायते ॥ ११ ॥ कार्य्यात्मनापरिणमेत्कारणंत्वविकारिसत् ॥ पुनःकारणरूपत्वमेषोऽविकृतउच्यते॥ १२॥
नानाभूषादिरूपेणरजतंपरिणामिहि ॥ मध्येतदेवचांतेऽपितत्पुनःस्याद्विलापने ॥ १३ ॥ असौवेदांतसिद्धांतःशुद्धांत.

१ भ्रमवादः विवर्तोभ्रमः विरुद्धंवर्तनं तदभाववतितत्प्रकारकज्ञानमितियावत.

करणप्रियः ॥ परिणामोह्यविकृतःसाक्षाच्छ्रुत्यादिसंमतः ॥१४ ॥ तदात्मानंस्वयमकुरुतेतिपरिणामिता ॥अतःसूत्रेप्यात्मकृ
तेःपरिणामादितीरणा॥१५॥ सुवर्णमविकार्यैवनानापरिणमत्यदः ॥ शिष्यतेस्वयमेवांतमध्येव्यवहृतिःपरा॥१६ ॥सर्वाका
रैर्ब्रह्मतथैवैकंपरिणमत्यतः ॥ विकारोनिर्विकारस्यकथंचिन्नैवजायते॥ १७ ॥ यथासुवर्णमुक्तंपुरस्तात्पश्चाच्चसर्वस्यहिर
१० ण्मयस्य ॥ मध्येतदेवव्यवहार्यमाणंनानापदेशैरहमस्यतद्वत् ॥ १८ ॥ इत्थंभगवतास्वस्याविकारित्वंसमन्वये ॥ उक्तंस
दृष्टांतमिदमन्यत्रापिबहुस्फुटं ॥ १९ ॥ उभयव्यपदेशात्त्वहिकुंडलवदित्यतः ॥ व्यासोधिकरणंप्राहाविकारायसमन्वये ॥
॥ २० ॥ सनिर्गुणोनंतगुणःपरिणाम्यविकारवान् ॥ विरुद्धमित्याद्युभयंवेदेयद्व्यपदिश्यते ॥ २१ ॥ तस्माद्ब्रह्माखि
लाकारंसरलाकृतिरप्यहिः ॥स्वेच्छयाकुंडलाकारोऽविकार्य्येवप्रजायते॥ २२ ॥ तैजसानांतुसर्वेषांभाष्येभाष्यविकारिता॥
दृष्टांताबहवःस्पष्टाःसुबोधिन्यादिषूदिताः ॥ २३ ॥ चिंतामणेःकल्पतरोःकामधेनोःसमुत्थिताः ॥ पदार्थाःपरिदृश्यंतेवि
क्रियंतेनतेक्कचित् ॥ २४ ॥ विकृतःपरिणामस्तुनसब्रह्मणियुज्यते ॥ वेदाद्यनुपदोक्तस्याविकारित्वस्यबाधनात् ॥ २५ ॥
(स्कंध १०) तथापिभूमन्महिमागुणस्यतेविबोद्धुमर्हत्यमलांतरात्मभिः ॥ अविक्रियात्स्वानुभवादरूपतोह्यनन्यबोध्या
त्मतयानचान्यथा ॥ २६ ॥ ब्रह्मज्योतिर्निर्गुणंनिर्विकारमितिचांतिमे[1] ॥ अनेकत्रापिगीतायामविक्रियमुदीर्य्यते ॥२७॥ १०
प्रलयःकिंचसर्वेषांनस्यात्तत्रतथासति ॥ कार्य्याणांकारणात्मत्वासंभवाद्विकृतौपुनः ॥ २८ ॥ तज्जलान्यत्प्रयंतीत्यादिश्रु

१ भागवताख्येतुर्यप्रमाणे.

तौसतुरूपितः ॥ स्वस्मिन्विलापितेविश्वेब्रह्मैकमवशिष्यते ॥ २९ ॥ (स्कंध १०) नष्टेलोकेद्विपरार्द्धावसानेमहाभूतेष्वा दिभूतंगतेषु ॥ व्यक्तेऽव्यक्तंकालवेगेनयातेभवानेकःशिष्यतेशेषसंज्ञः ॥ ३० ॥ क्रीडार्थमाविष्कृतवान्बहुत्वेच्छुःस्वरूप तः ॥ ऊर्णनाभिर्यथातंतूंस्तैर्गेहमविकारवान् ॥ ३१॥ आविर्भावेरतीच्छैवहेतुःश्रुत्यादिसंमतः ॥ यथाकाण्वश्रुतौपूर्वंरमणा भावउच्यते ॥ ३२ ॥ सर्वैनैवरेमेतस्मादेकाकीनरमतेसद्वितीयमैच्छत्सहैतावानास ॥ एकाकिनोरत्यभावाद्वितीयेच्छावि भोरभूत् ॥ वस्तुतोनद्वितीयंतुशुद्धाद्वैतस्यवर्त्तते ॥ ३३ ॥ इतिसस्वयमेवासरूपनामविभेदतः ॥ अनेकधाथवैचित्र्यंतत्त द्धर्मतिरोभवात् ॥ ३४ ॥ सर्वधर्मतिरोधानात्तद्धर्मस्यैवदर्शनं ॥ अन्यत्रान्यस्यधर्मस्यचेतिभेदोमहानिह ॥ ३५ ॥ एवंवि धप्रपंचेनस्वात्मनाक्रीडतिप्रभुः ॥ क्रीडार्थमात्मनइदंत्रिजगत्तेकृतंयतः ॥ ३६ ॥ क्रीडाभांडमिदंविश्वमित्यादिष्विदमुच्य ते ॥ ऊर्णनाभिर्हिरमतेतंतुभिर्गेहतोऽथवा ॥ ३७ ॥ सर्वशक्तेस्तथेच्छातोमूढैर्नानेवदृश्यते ॥ ब्रह्मैवैकमिदंसर्वंवस्तुतस्तुवि चारणे ॥ ३८ ॥ यत्रयेनयतोयस्ययस्मैयद्यद्यथायदा ॥ स्यादिदंभगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ ३९ ॥ इत्यादिनाभा गवतेऽखिलस्यब्रह्मतामता ॥ एवंचात्माकात्स्न्यमितिसूत्रेऽप्येतन्निरूप्यते ॥ ४० ॥ कटकंमुद्रिकांहेम्नःकुंडलंखंडकानपि॥ हेमत्वेनैवगृह्णातियथाबुद्धिस्तदर्थिनः ॥ ४१ ॥ तथाब्रह्मविदोबुद्धिर्यत्त्वियद्भेददर्शनं ॥ एकस्योक्तंभागवतेतथाजानंतितद्द द्धं ॥ ४२ ॥ (स्कं० १२ अ० ४ श्लो० ३०) यथाहिरण्यंबहुधासमीयतेनृभिःक्रियाभिर्व्यवहारवर्त्मसु ॥ ए

१ काण्वशाखीयोपनिषदिबृहदारण्यकेपुरुषविधब्राह्मणे.

वंवचोभिर्भगवानधोऽक्षजोव्याख्यायतेलौकिकवैदिकैर्जनैः ॥ ४३ ॥ एवंक्रीडन्प्रपंचात्मायदांतारतिमिच्छति ॥ तदात्म
निविलाप्येदंरमतकारणेवशी ॥ ४४ ॥ सुखार्थंसर्वजीवानांकरोतिलयमात्मनि ॥ व्यधाद्यथेहक्षणदांसुख्यंत्यात्मरतौ
हिते ॥ ४५ ॥ आहुर्वेदाहियत्रैतत्पुरुषःस्वपितीत्यतः ॥ चितिलीनास्तदाजीवानविंदंतितुकिंचन ॥ ४६ ॥ दुःखात्ययोय
थापुंसासुषुप्तावनुभूयते ॥ नानंदानुभवस्तत्रसतुमोक्षेप्रवक्ष्यते ॥ ४७ ॥ अन्नेप्रलीयतेमर्त्यइत्याद्युक्तप्रकारतः॥ जडानां
प्रलयस्तत्रसर्वेषांसर्वकारणे ॥ ४८ ॥ आनंदांशांतरात्मानआनंदचितिचेतनाः ॥ जडाःसदंशेवर्त्तंतेविलीनाःसुप्तशक्तयः॥
॥ ४९ ॥ उद्गच्छंतितदिच्छातःपुनस्तेतत्तदंशतः ॥ तत्तदंशेषुलीयंतऊर्णनाभ्यास्यतंतुवत् ॥ ५० ॥ यथोर्णनाभिःसृज
तेगृह्णतेचयथापृथिव्यामोषधयःसंभवंति ॥ यथासतःपुरुषात्केशलोमानितथाऽक्षरात्संभवतीहविश्वम्॥ ५१ ॥ मुंडको
पनिषद्येतद्बृहदारण्यकादिषु ॥ श्रुतंभागवतेचेदंस्कंधएकादशेस्फुटं ॥ ५२ ॥ यथोर्णनाभिर्हृदयादूर्णांसंतत्यवक्रतः ॥ तया
विहृत्यभूयस्तांग्रसत्येवमधीश्वरः ॥ ५३ ॥ तस्मात्सर्वलयस्थानंसर्वाविर्भावकारणं ॥ चित्तेस्थिरंपरंब्रह्मास्त्वचिंत्यानं
तशक्तिमत् ॥ ५४ ॥ यस्माज्जीवाःस्वांशाअणवोऽन्तर्यामिणोजडाश्चासन् ॥ साकारंश्रुतिसारंवारंवारंस्मराखिलाधारं॥
॥ ५५ ॥ ॥ इतिवेदांतचिंतामणौअविकृतपरिणामनिरूपणंनामषष्ठंप्रकरणं ॥ ६ ॥ ॥ ७ ॥ ॥ ७ ॥
अंशाजीवायतोवन्हेर्विस्फुलिंगवदुद्गताः ॥ संसरंतिचमुच्यंतेनमोऽस्मैसर्वशक्तये ॥ १ ॥ व्योमेवव्यापकंब्रह्मसर्वत्रैकरसं

१ छांदोग्ये

सदा ॥ सच्चिदानंदरूपंचपूर्णंनिर्बाधमक्षयम् ॥ यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेऽपिवा ॥ अंतर्बहिश्चतत्सर्वंव्याप्यनाराय
णःस्थितः ॥ ३ ॥ सत्यंविज्ञानमानंदंब्रह्मपूर्णमदःश्रुतेः ॥ सर्वक्रियाभिःसर्वत्रनित्यैर्धर्म्मैस्तथाखिलैः ॥ ४ ॥ सर्वतःपाणि
पादांतंसर्वतोक्षिशिरोमुखं॥ सर्वतःश्रुतिमल्लोकेसर्वमावृत्त्यतिष्ठति ॥ ५ ॥ माययासर्वतःसांशंस्वशक्त्याचिंत्यरूपधृत् ॥ त
स्याप्रतिहतेच्छस्यबहुत्वेच्छोदिताभवत् ॥ ६ ॥ साबहुस्यांप्रजायेयेत्यादिश्रुत्यादिसंमता ॥ तदेच्छयाप्रदेशेतदुद्गमार्थेति
तिरोदधे ॥ ७ ॥ सृष्टिकालेतएवांताःपरिच्छेदानिरूपिताः॥तथाहंततिरोसानीत्यादिवाक्यैर्निरूपितं ॥ ८ ॥ काण्वाद्युपनि
षत्स्वेतत्तथास्मृतिपुराणयोः ॥ विभक्तिरप्रतर्क्यस्याविभक्तस्यापियुज्यते ॥ ९ ॥ अविभक्तंविभक्तेषुविभक्तमिवचस्थि
तं ॥ चित्प्रधानाःपरिच्छिन्नाअंशाव्युदचरंस्ततः ॥ १० ॥ जीवाःक्षुद्राविस्फुलिंगाःसुदीप्तात्पावकाद्यथा ॥ मुंडकोपनिष
त्स्वेषदृष्टांतोन्यत्रचोदितः ॥ ११ ॥ द्वितीयमुंडके ( खंड १ ) तदेतत्सत्यंयथासुदीप्तात्पावकाद्विस्फुलिंगाःसहस्रशःप्रभ
वंतसरूपाः ॥ तथाक्षराद्विविधाःसोम्यभावाःप्रजायंतेतत्रचैवापियंति ॥ १२ ॥ छांदोग्ये ॥ यथासुदीप्तात्पावकात्क्षुद्रावि
स्फुलिंगाव्युच्चरंत्येवंतस्मादात्मनःसर्वेप्राणाःसर्वेलोकाःसर्वेजीवाःसर्वएवात्मानोव्युच्चरंतिरमणीयचरणाःकुपूयचरणाइति
॥ १३ ॥ सर्वेन्तर्यामिणोजाताआनंदांशस्वरूपतः ॥ सदंशेनजडायेभ्यःकृतादेहाअनेकधा ॥ १४ ॥ तिरोभावय
दानंदंजीवतंचचितंजडे ॥ आनंदांशतिरोधानान्निराकारावुभावपि ॥ १५ ॥ चतुर्भुजादिर्नतयोस्तादृग्भगवदाकृतिः॥आ

१ पुण्यचारित्राः २ पापचरित्राः ३ पंचभूतप्रभृतयः ४ आनंदांशं ५ चिदंशं ६ जडजीवौ

नंदरूपमेवास्यहस्तपादादिकंयतः ॥ १६ ॥ प्रजायेयप्रकृष्टोहंजायेयेतीष्टवास्तुयत् ॥ ऐश्वर्यादेःसविषयत्वायधर्मांस्त
थांकरोत् ॥ १७ ॥ षट्धर्माभगशब्देनैश्वर्यंवीर्ययशस्तथा ॥ श्रीर्ज्ञानंचविरागश्चनित्याभगवतोखिलाः॥ १८ ॥ विष्णुपुरा
णे॥ऐश्वर्यस्यसमग्रस्यवीर्यस्ययशसःश्रियः ॥ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणा ॥ १९ ॥ ऐश्वर्यादितिरोभावाज्जीवा
नांदीनतादिकं ॥ तिरोहितंततोह्यस्यसूत्रेबंधविपर्ययौ ॥ २०॥ बंधश्चतुष्टयाभावाद्द्वयाभावाद्विपर्ययः ॥ पराभिध्याना
त्तुतिरोहितंततोह्यस्यबंधविपर्ययौ ॥ अत्रत्येश्रीमदाचार्यैर्भाष्येतत्सुप्रपंचितं ॥ २१ ॥ माययानिर्मितेविद्याविद्येशक्ती
प्रभोःस्वयम् ॥ जीवस्यैवततोबंधोमोक्षोनांशांतरस्यसः ॥ २२ ॥ ( स्कंध ११ अ० ११ श्लो० ३४) विद्याविद्येममतनू
विध्युद्धवशरीरिणाम् ॥ मोक्षबंधकरीआद्येमाययामेविनिर्म्मिते ॥ २३ ॥ एकस्यैवममांशस्यजीवस्यैवमहामते ॥ बंधो
ऽस्याविद्ययानादिर्विद्ययाचतथेतरः ॥ २४ ॥ सुखदुःखाद्यनुभवोऽपिजीवस्यैवकेवलं ॥ चिदभावाज्जडेंतर्यामिण्यानंदा
तिरोभवात् ॥ २५ ॥ स्वरूपाज्ञानमेकंहिपर्वदेहेंद्रियासवः ॥ अंतःकरणमेषांहिचतुर्द्धाध्यासउच्यते ॥ २६ ॥ पंचपर्वात्व
विद्येयंयद्बद्धोयातिसंसृतिं॥इत्यस्याःपंचपर्वाण्याचार्यपादान्यरूपयन् ॥ २७ ॥अहंताममतारूपःसंसारोयोमृषोदितः॥अ
विद्योपाधितोमिथ्यामृगतृष्णेवदृश्यते॥२८॥विपरीतक्रमेणोक्तमध्यासानांचतुष्टयं॥एवंपर्वसुसिद्धेषुदेहेऽहंभावइष्यते॥२९॥
तत्संबंधिनिगेहादौममतापिततोमता ॥ ससंसारोभ्रमःस्वप्नोमायेत्यादीहकथ्यते ॥ ३० ॥ अविद्योपाधितोह्येषोऽज्ञानात्मे

१ तिरोऽभावयत् २ जातमितिशेषः ३ ऐश्वर्यादिषट्कं ४ ऐश्वर्यादिचतुष्कस्य ५ ज्ञानवैराग्ययोः

ह्यतीयते ॥ कामलोपहिताक्षस्यशंखेपीतत्ववन्मृषा ॥ ३१ ॥ उपाधेःसाधनैर्नाशेयथावस्थितमीक्ष्यते॥ब्रह्मत्वंक्रीडनार्थं त्वंतथाऽविद्यानिवर्त्तने ॥ ३२ ॥ भागवते॥यथांभसाप्रचलतातरवोऽपिचलाइव ॥ चक्षुषाभ्राम्यमाणेनदृश्यतेचलतीवभूः ॥ ३३ ॥ देहादीनांविरागार्थंसदृष्टांतमसत्यता ॥ संसारमेवतन्निष्ठमभिप्रेत्यकृताक्वचित् ॥ ३४ ॥ विप्रोऽपिमाययास्वमेराजाहमितिमन्यते ॥ तत्तद्देहगतोनैवंब्रह्मांशत्वंस्मरत्यसौ ॥ ३५॥ ( स्कंध १० ) स्वमेयथापश्यतिदेहमीदृशंमनोरथेनाभिनिविष्टचेतनः ॥ दृष्टश्रुताभ्यांमनसानुचिंतयन्प्रपद्यतेतत्किमपिह्यपस्मृतिः ॥ ३६ ॥ इत्यहंभावमापन्नोदेहेमिथ्यावियोगिनि ॥ अवशःकार्य्यतेसर्वमीश्वरेणविमूढधीः ॥ ३७ ॥ देहात्मभावोदेहेनेशेच्छयाकृतकर्मसु ॥ अहंकारविमूढात्माकर्ताहमितिमन्यते ॥ ३८ ॥ वस्तुतस्त्वीश्वरेणेहतत्तद्द्वारेच्छयाऽखिलं ॥ कार्य्यतेक्रीडयातत्राहंकर्त्तेतिमतिर्मृषा ॥ ३९॥ फलसाधनयोःप्रोक्तःकर्त्ताकारयिताहरिः ॥ अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्त्तते ॥ ४० ॥भागवते॥यथादारुमयीयोषायथायंत्रमयोमृगः ॥ एवंभूतानिभगवन्नीशतंत्राणिविद्धिभोः ॥ ४१ ॥ यथाभ्रमरिकादृष्ट्याभ्राम्यतीवमहीयते ॥ चित्तेकर्त्तरितत्रात्माकर्त्तेवाहंधियास्मृतः ॥ ४२ ॥ उद्दिश्यसंसृतिपदमहंताममतेअपि ॥ सर्वत्रतन्निवृत्त्यैवमुक्तिर्नैवान्यथोच्यते ॥ ॥ ४३ ॥ ( स्कंध ७ ) एतद्द्वारोहिसंसारोगुणकर्मनिबंधनः ॥ अज्ञानमूलोऽपार्थोऽपिपुंसःस्वमइवेयते ॥ ४४ ॥ ( स्कंध १२ ) तएतदधिगच्छंतिविष्णोर्यत्परमंपदं ॥ अहंममेतिदौरात्म्यंनयेषांदेहगेहयोः ॥ ४५ ॥इत्यादिवचनैस्तादृक्बुधाप्रत्य

---

१ रोगविशेषः

यएवसः ॥ तन्निवृत्त्यामतामुक्तिर्देहादिस्तुनसंसृतिः ॥४६॥ नैवात्मनोनदेहस्यसंसृतिःसुविविक्तयोः ॥ अविवेकस्तयोर्यो
सावथतस्यैवसंसृतिः ॥ ४७ ॥ एकादशस्याष्टाविंशइतिभेदनरूपणात् ॥ देहादेःसंसृतित्वेतुजीवन्मुक्तिर्नयुज्यते॥ ४८ ॥
प्रत्यक्षएवदेहादिर्मुक्तस्यापितुजीवतः ॥ सतिसंसरणेमुक्तिःकुतःशास्त्रविरोधिनी ॥ ४९ ॥ तस्मादहंतादेहादावध्यासाभा
१२ वतोनहि ॥ ममताहंत्वमूलातुतन्निवृत्त्यानिवर्त्तते ॥ ५० ॥ आत्मलाभेतुविद्यातोमुक्तोजीवन्भविष्यति ॥ देहसंसारभेदो
तःसिद्धांतःश्रुतिसंमतः ॥ ५१ ॥ सम्यक्प्रकारंसरणंस्वरूपाच्यवनंदृढं ॥ ब्रह्मांशस्यान्यथाभावस्तत्संसरणमुच्यते ॥ ५२ ॥
असत्यासंसृतिःसत्यःप्रपंचइतिनिर्णयः ॥ ऐंद्रजालिकवत्स्पष्टंसाऽसत्यापिप्रतीयते ॥ ५३ ॥ जीवायस्यस्वांशानप्रतिबिं
बानचाभासाः ॥ यत्कृतसंसरणास्तच्चरणंशरणंव्रजामिभवतरणं ॥ ५४ ॥ ॥ इतिश्रीवेदांतचिंतामणौजीवोद्गमसं
साररनिरूपणंनामसप्तमंप्रकरणं ॥ ७ ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

जीवांतर्यामिणौस्वांशावणुकौभोक्तृसाक्षिणौ ॥ येनांतःस्थापितौज्ञाज्ञौनमस्तस्मैकृपालवे ॥ १ ॥ मुंडकोपनिषदि॥द्वासुप
र्णासयुजासखायासमानंवृक्षंपरिषस्वजाते॥एकस्तयोःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति॥ २॥एकादशस्कंधे॥सु
पर्णावेतौसहजौसखायौयदृच्छयाकृतनीडौचवृक्षे ॥ एकस्तयोःखादतिपिप्पलान्नमन्योनिरन्नोऽपिबलेनभूयान्॥३॥ भि
न्नौप्रतिशरीरंतावेकैकस्मिन्द्वयोरपि ॥ प्रवेशाद्धंसरूपेणत्दृदिभागवतेयथा ॥ ४ ॥( स्कंध४ ) ॥हंसावहंचत्वंचार्यसखायौ १२

१ अध्याये

मानसायनौ ॥ गुहांप्रविष्टावात्मानौसूत्रेऽप्येतद्गुहातुल्हत् ॥ ५॥ वाजसनेयिशाखायां॥यथाव्रीहिर्वायवोवाश्यामाकोवा श्यामाकतंडुलोवैवमयमंतरात्मनूपुरुषोहिरण्मयः॥६ ॥इत्यादिश्रुतिभीरूपंतस्योक्तंस्मृतिभिस्तथा ॥ईश्वरःसर्वभूतानांहृद्दे शेऽर्जुनतिष्ठति ॥७॥ प्रथमस्कंधेभीष्मकृतस्तुतौ॥हृदिहृदिधिष्ठितमात्मकल्पितानां॥सविद्यमानानंदत्वादैश्वर्य्याज्ज्ञानतस्त था ॥ नदुःखसुखभोक्तेषांसाक्षीद्रष्टैवकिंतुसः ॥ ८ ॥ तद्वेदवाक्येद्वावीशानीशौज्ञाज्ञावितिस्फुटं॥ ( अ० १ पा० २ सू० ८)संभोगप्राप्तिरितिचेन्नवैशेष्याच्चसूत्रतः ॥ ९ ॥ वैशेष्यंजीवतस्तत्रानंदधर्म्माविलोपनात् ॥ द्वैतंस्पष्टौतयोरेवनजीवब्र ह्मणोःक्वचित् ॥ १० ॥ अंतर्यामिब्राह्मणेंतर्यामिपादेचविस्तृतं ॥ रूपंतस्यततःस्पष्टंभाष्यादेरवधार्यतां ॥ ११ ॥ सच्चिन्मा त्रश्चित्प्रधानोब्रह्मस्वांशोहृदिस्थितः ॥ विसर्पिचैतन्यगुणोऽणुर्जीवोऽविद्ययासितः ॥१२॥ ( मुंडके ) एषोणुरात्माचेतसावे दितव्योयस्मिन्प्राणःपंचधासंविवेश॥इत्यादिश्रुतिभिस्तस्याणुमात्रत्वंनिरूप्यते॥ १३ ॥( अ० २ पा०३सू० २१ ) नाणु रतच्छ्रुतेरितिचेन्नेतराधिकारात् ॥ इत्यादिसूत्रतोव्यासचरणैर्निरणायितत् ॥ सएषआत्माहृदीत्यादिभिःश्रुतिभिरीरितं ॥ १४ ॥ (अ० २पा०३ सू० २४) अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि ॥ व्यासोप्यसूत्रयदितितस्माद्धृद्येवसं स्थितः ॥ १५ ॥ हृत्स्थोगुणात्सचैतन्यांसंपूर्णांतनुतेतनुम् ॥ कोणस्थितोयथादीपोऽखिलेगेहेप्रकाशते ॥ १६ ॥ कस्तूरि

---

१ अध्याय १ पाद २ सू. ११गुहांप्रविष्टावात्मानौहितद्दर्शनात् २ आनंदप्रचुरः ३ आनंदांशस्य ऐश्वर्यादिधर्माणांचातिरोभावात् ४ बद्धः ५ जीवः ६ चैतन्यसहितां विधेयविशेषणमेतत्

कास्थितैकत्राभिव्याप्नोतिस्वगंधतः ॥ देशंमहांतंदेहंसचैतन्येनतथाखिलं ॥ १७ ॥ व्यासोविसर्पिगुणतां( अ० २ पा० ३ सू० २ ५) गुणाद्वाऽऽलोकवत्तथा ॥ ( अ० ३पा० ३ सू० २६ ) व्यतिरेकोगंधवच्चेत्यादिदृष्टांततोऽवदत्॥ १८॥शांकरास्तार्किकाजीवमेकंव्यापकमालपन् ॥ जीवैकत्वेसर्वमुक्तिरेकमुक्त्याभविष्यति॥ १९॥सतिबंधेनैवमोक्षोयात्येकःपुण्यतोदिवं॥



अन्यःपापेननरकमितिश्रौतंनयुज्यते ॥ २०॥ सर्वेजीवाबहुवचःश्रुत्युक्तंचविरुध्यते ॥ व्यापकस्योद्गमेनैवनोपाधेर्जीवकल्पनात् ॥ २१ ॥यत्प्रयंतीतिजीवानांप्रलयोनेहसंभवेत् ॥ ज्ञानात्तत्रप्रवेशोऽपिविशतेतदनंतरं ॥ २२ ॥ किंचजीवःस्वतंत्रोवाब्रह्मैवोपहितंतथा ॥ आद्येद्वैतंबंधमोक्षौनापिब्रह्मात्मताभवेत् ॥ २३ ॥ नस्यात्कस्यापिमरणंव्याप्तेर्जीवस्यतादृशः॥ द्वितीयेतुर्नतद्व्याप्तिःकिंतुस्याद्ब्रह्मणोहिसा ॥ २४ ॥ आकाशंव्यापकंव्याप्तिर्घटाकाशस्यनक्वचित् ॥ उपाधिनाशोमोक्षश्चेज्जीवनाशःसकथ्यतां ॥ २५ ॥ सर्वज्ञंनिर्गुणंपूर्णंब्रह्मबद्धमुपाधिना ॥ तदेवोपाधितोमुक्तंसाधर्नेर्विप्लवोमहान्॥ २६ ॥ उत्क्रांतिगत्यागतयोवेदसूत्रादिसंमताः ॥ व्यापकस्यनयुज्येरंश्चेदुपाधेःप्रवक्षि ताः ॥ २७ ॥ तंप्राणोऽनूत्क्रामतीतिश्रुतिस्तर्हिविरुध्यते ॥ श्रुतेःस्मृतेश्चसूत्राणांनव्याप्तिस्तस्यसंमता ॥ २८ ॥ नित्यःसर्वगतस्थाणुर्ब्रह्मसर्वत्रयद्गतं॥ सहतिष्ठति



---

१ आलोकः प्रकाशः प्रकाशकद्रव्यंवा २ उपाधेरेवोद्गमइतितुनवक्तुंशक्यं तस्यत्वन्मतेजीवभ्रांतिकल्पितत्वात् ३ देहल्येदीपकवदस्योभयत्रसंबंधः ४ जीवस्यव्यापकता ५ अध्या१ पा० ३ उत्क्रांतिगत्यागतीनामित्याधिकरणेप्रसिद्धाः ६ वदसि ७ जीवस्य

तेनाणुश्चलैकार्थतान्यथा ॥ २९ ॥ शरीरेगुणतोव्याप्तेःक्वचिद्व्यापकतोदिता ॥ ब्रह्मवद्व्यापकत्वेतूक्तान्यश्रुत्यादिबाधनं ३० ॥ शांकाराणांमतेकर्त्तृनप्रपंचस्यभोक्तृच ॥ धर्म्माकारक्रियात्यंताभाववद्ब्रह्मकथ्यते ॥ ३१ ॥ मायायांप्रतिबिंबोऽस्यतत्कर्त्तांशबलाभिधः॥ प्रतिबिंबस्त्वविद्यायांतस्यैंजीऽवोभिधीयते॥ ३२ ॥ तद्रूपोपाध्यवच्छिन्नेचैतन्येब्रह्मरूपिणि॥ अथवातौघटमठोपहिताकाशवत्कृतौ ॥ ३३ ॥ सत्त्वेतुशुद्धमलिनेमायाऽविद्येअनादिमे ॥ तत्रावच्छिन्नपक्षस्तुसंक्षेपेणनिराकृतः ॥ ३४ ॥ दृश्यतेप्रतिबिंबस्तुनवाय्वादेर्निराकृतेः ॥ नदृष्टोमलिनेप्येषमृदादावन्यथाभवेत् ॥ ३५ ॥ चेत्तादृग्ब्रह्मणस्तत्रांकिनस्याद्वायुदारुणोः॥ अलीकंप्रतिबिंबंनजीवस्यालीकताक्वचित् ॥ ३६ ॥ श्रौतोगुहायानैकस्यांप्रवेशोयुज्यतेद्वयोः ॥ इत्यादितत्त्वदीपेचोक्तंविद्वन्मंडनेबहु ॥ ३७ ॥ अविद्योपाधिरचितंजीवत्वमितितेजगुः ॥ पारतंत्र्यंभगवतोद्वैतापत्तिश्चतन्मते ॥ ३८ ॥ अंशानांजीवभावस्त्वीशेच्छयोक्तप्रकारया ॥ शक्त्याविद्योपाधिनातुसंसारइतिवैदिकं ॥ ३९ ॥ तस्मादेवोद्गमस्तस्मिँल्लयोमध्येचदृश्यते ॥ कार्य्यात्मनेच्छयाभेदोजडजीवांतरात्मनां ॥ ४० ॥ शुद्धाद्वैतमतःसिद्धंश्रुतिस्मृत्यादिसंमतं ॥ द्वीतंद्वयोरितिज्ञानंतद्वैतंद्वीतमेवयत् ॥ ४१ ॥ कार्यकारणरूपंतदीशजीवात्मकंतथा ॥ नामरूपात्मकंचेतितित्रिविधंसमुदाहृतं ॥ ४२ द्विविधंदूषितंतत्राप्यग्रेतद्दूषयिष्यते ॥ नामरूपात्मकंद्वैतंशांकराणांयथोदितं॥ ४३ ॥ अस्तिभाति

---

१ स्थाण्वचलपदयोरेकार्थकतयापौनरुक्त्यं २ चैतन्येन ३ निर्गुणस्य ४अयनंइतंभावेक्तः ५ गत्यर्थकधातूनांज्ञानार्थकतायाअपिस्वीकाराज्ज्ञानमित्यर्थः

प्रियंरूपंनामचेत्यैर्थपंचकं ॥ आद्यंत्रयंब्रह्मरूपंमायारूपंततःपरं ॥ ४४ ॥ अस्तिभातिप्रियत्वंतुजातंकार्य्यात्मनेच्छया ॥ सच्चिदानंदरूपस्यव्याकृतिर्नामरूपयोः॥ ४५॥ससर्वनामासचसर्वरूपइतिकीर्त्यते॥नामरूपेव्याकरवाणीतीच्छास्याभवत्पुरा ॥ ४६ ॥ विभिद्यरूपमेकैकंशब्दजालात्स्ववाचकात् ॥ तत्तद्वाचीनिनामानिव्यवहारायनिर्ममे ॥ ४७ ॥सर्वाणिरूपाणिविचित्यधीरइतिपौरुषं ॥ सूक्तंश्रुत्यंतराण्येवंतत्कौर्मेचोपबृंहितं ॥ ४८ ॥ सर्वेषांतदधीनत्वात्तत्तच्छब्दाभिधेयता ॥ अंन्येषांव्यवहारार्थमिष्यतेव्यवहर्तृभिः ॥ ४९ ॥ अनामरूपतातस्यालौकिकत्वायवर्णिता ॥ माहात्म्यबोधनायैवलौकिकोऽस्तिघटोयथा ॥ ५० ॥ रूपंनियतमेवास्यतत्तिरोभावशालिच ॥ द्वित्राण्येवचनामानिनतथास्येतिनिश्चयः ॥ ५१॥ व्याकृतिःसृष्टिकालेऽतःपूर्वमव्याकृतिस्तयोः ॥ द्वयोर्ब्रह्मैकनिष्ठत्वंबृहदारण्यकेस्फुटं ॥ तद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यांव्याक्रियतेअसौनामायमिदंरूपायमिति ॥ ५२ ॥ एतन्मतेसुनिष्पन्नंसांकर्य्यंकार्य्यकारणे ॥ तन्निवृत्त्यर्थमाचार्य्यैःपदंशुद्धंविशेषितं ॥ ५३ ॥ शुद्धाद्वैतपदेज्ञेयःसमासःकर्मधारयः ॥ अद्वैतंशुद्धयोःप्राहुःषष्ठीतत्पुरुषंबुधाः ॥५४ ॥ मायासंबंधरहितंशुद्धमित्युच्यतेबुधैः ॥ कार्य्यकारणरूपंहिशुद्धंब्रह्मनमायिकं ॥ ५५ ॥ इतिश्लोकत्रयेणात्राद्वैतेशुद्धविशेषणं ॥ गोस्वामिभिर्गिरिधरैर्मार्तंडेविवृतंस्वके ॥ ५६ ॥ अद्वैतेशुद्धताश्रीमद्वल्लभाचार्य्यरूपिते ॥ मतांतरेषुसर्वत्रदृश्यतेद्वैतमेवयत् ॥ ५७ ॥ दुर्म्मतनिरासकृतिनामाचार्य्याणांहुताशनाख्यानां ॥ अंतःकरणविभूषणसुरंपतिरत्नंतमःसैमेहं

१ त्यंश २शुद्धाद्वैतमार्तंडाख्येस्वग्रंथे ३ नीलमणिः ४ अज्ञानमधंकारंच ५ श्रीकृष्णः

तु॥५९॥ ॥ इतिश्रीवेदांतचिंतामणौजीवांतर्यामिस्वरूपविवेकपूर्वकशुद्धाद्वैतार्थनिरूपणंनामअष्टमंप्रकरणं॥ ॥ ८ ॥ ७॥
स्वाभिन्नाऽप्राकृतैर्धर्म्मैः श्रितंसर्वैर्विरोधिभिः ॥ शक्तिभिस्तादृशीभिस्त्वंवंदेनिर्दोषमद्वयं ॥ १ ॥ अप्राकृताखिलाकारःश्रुति
भिःप्रतिपाद्यते ॥ माहात्म्यायस्फुटंभक्त्यैप्राकृतंतुनिषिध्यते ॥ २ ॥ यत्पांचभौतिकंतस्येच्छयाषड्भावदर्शनं ॥ मितंनियत
कार्य्यंचतत्प्राकृतमुदाहृतं॥ ३ ॥यथादेहोऽस्मदादीनांपंचभूतेभ्यउत्थितः॥अस्मिञ्जायतइत्याद्याद्दृष्टाविकृतयोऽपिषट् ॥४॥
मलिनोऽन्यनियम्यश्चमितःसमवितस्त्रिभिः॥श्रवसाश्रूयतेमात्रंदृश्यतेमात्रमीक्षया॥५॥नित्याधर्मानिजाऽभिन्नाःसर्वेसर्वत्र
तस्यतु ॥ सर्वकामःसर्वरसइतिच्छांदोग्यरूपणात् ॥ ६ ॥ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ सं
बाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ॥ ७ ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सर्वतःपाणिपादांतमि
तिश्रुत्यादयोऽवदन् ॥ ८ ॥ सर्वत्रसर्वेन्द्रियाणांतस्यतत्कार्य्यमीर्य्यते ॥ सर्वज्ञस्याखिलंज्ञानंसर्वकर्तुःक्रियाखिला ॥ ९ ॥
नपांचंभौतिकंतानिसर्गार्थंसस्वैतोव्यधात् ॥ अजत्वादमृतत्वाच्चाविकारित्वान्नविक्रियाः ॥ १० ॥ ( स्कंध ८ ) त्वंब्रह्मपू
र्णममृतंविगुणंविशोकमानंदमात्रमविकारमनन्यदन्यत्॥ विश्वस्यहेतुरुदयस्थितिसंयमानामात्मेश्वरश्चतदपेक्षतयानपेक्षः

---

१ स्वाभिन्नाभिरप्राकृतीभिः २ माहात्म्यज्ञानपूर्वकसुदृढस्नेहस्यैवभक्तित्वं ३ जायते । अस्ति । वर्द्धते । अपक्षीयते । विपरिणमते । नश्यति
च ४ परिच्छिन्नं ५ हस्तं ६ नैमिति ७ पृथ्वी ८ दर्शनादिकं ९ चाक्षुषादिः १० गमनादानादिः ११ भगवतोहस्तादिकं अस्मदादिवत्पांचभौतिकं
त तस्यानादित्वात् महाभूतानांचसृष्टिकालएवाविर्भूतत्वात् १२ स्वस्वरूपात् विरुद्धःकार्यकारणभावइत्याशयः १३ जायतइत्यादयः

॥ ११ ॥ अतएवनमालिन्यमैश्वर्य्यान्नानियम्यता ॥ व्याप्तेःपरिमितैर्नैवमेतदप्राकृताकृति ॥ १२ ॥ सर्वाकाराश्रयत्वंच
श्रुतयोऽवर्णयन्समः ॥ मशकेनसमोनागेनेत्याद्यास्तद्विभुत्वतः ॥ १३ ॥ प्राकृतंपरिमाणादिपांचभौतिकतादिकं ॥ तस्याऽ
१६ स्थूलमनण्वादिश्रुतिभिःप्रतिषिध्यते ॥ १४ ॥क्रियासुफलसंदेहोदेहेऽभिमतिरज्ञता ॥ ऊर्मयोलोकनिष्ठानांदोषाइत्यादयो
मताः ॥ १५ ॥ निष्फलंनिष्क्रियंशांतंनिरवद्यंनिरंजनं ॥ इत्यादिश्रुतयःसर्वेन्यषेधंस्तत्सदूषणं ॥ १६ ॥ तस्यप्राकृतशू
न्यत्वंतथाभागवतादिषु ॥ ( स्कंध १० अध्याय १० ) गृह्यमाणैस्त्वमग्राह्योविकारैःप्राकृतैर्गुणैः॥ १७॥श्वेताश्वतरादौ॥
अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुः संशृणोत्यकर्णः ॥ सवेत्तिवेद्यंनचतस्यवेत्तातमाहुरग्र्यंपुरुषंमहांतं ॥ १८॥ पाणि
पादनिषेधेऽपिगमनग्रहणोक्तितः ॥ अस्मदादिसमंन्यूनंप्राकृतंप्रतिषिध्यतेतत्॥ १९ ॥विधीयंतेश्रुतौसर्वाःसर्वशक्तेःक्रियाध्रु
वाः ॥ सर्वत्राबाधितंज्ञानंचैवंसर्वविदोखिलं ॥ २० ॥ श्रुतौपंचरात्रेच॥निर्दोषपूर्णगुणविग्रहआत्मतंत्रोनिश्चेतनात्मकशरी
रगुणैश्चहीनः ॥ आनंदमात्रकरपादमुखोदरादिसर्वत्रचत्रिविधभेदविवर्जितात्मा ॥२१॥ नियताकारकार्य्यत्वन्यौन्यबा
धक्षयादयः ॥ दोषागुणेषुदेहेषुप्राकृतेषुतदिच्छया ॥ २२ ॥ आनंदमात्राकारःसनिर्दूषणगुणाश्रयः ॥ निर्दोषविग्रहः
स्यान्निश्चेतनाप्रकृतिर्जडा ॥ २३ ॥ नप्राकृतागुणास्तस्यनशरीरेंद्रियादिकं ॥ इत्युक्तंभगवच्छास्त्रेयाज्ञवल्क्यस्मृताव

१ लोकवत्परिच्छेदः २ समोमशकेनेतिबृहदारण्यके साम्यंचतत्तन्निष्ठाऽऽकारवत्वेन ३ कामक्रोधादयः ४ क्रियादिकं ५ गंता ६ पाण्या
दिकं ७ स्वगत ८ निर्दोषपूर्णेतिवचने ९ पंचरात्रे

पि ॥ २४ ॥ अथवापरमात्मानंपरमानंदविग्रहं ॥ इत्यानंदमयाकारःसर्वत्राप्राकृताखिलः ॥ २५ ॥ निषित्ध्यप्राकृतंतत्रविधत्तेऽप्राकृतंश्रुतिः ॥ सार्वत्रिकत्वकथनात्तस्याप्राकृततास्फुटा ॥ २६ ॥ सामान्योक्तेर्निषेधेषुलोकसिद्धांशसेधनं ॥ निषित्ध्यधर्मान्सर्वत्रप्रायोधर्मान्हिवक्तिसा ॥ २७ ॥ नन्वानंदमयंब्रह्माऽऽप्राकृतंप्राकृतंजगत् ॥ निरानंदंकथंब्रह्मकार्य्यंतद्रूपमद्वयं ॥ २८ ॥ इतिचेदुक्तमेवैतद्धुत्वायाखिलंकृतं ॥ आनंदांशोऽखिलाधर्मास्तेतिरोभाविताइह ॥ ॥ २९ ॥ ब्रह्मधर्मतिरोभावादन्योन्याभावदर्शनात् ॥ आविर्भावतिरोभावाभ्यामिदंदृश्यदूषणं ॥ ३० ॥ रागमात्रंघटेमृत्स्नासर्ववर्णाविलक्षणा ॥ दृश्योनवास्तवोभेदस्तथात्राप्यवधार्य्यताम् ॥ ३१ ॥ जगत्तुब्रह्मणोभिन्नंनब्रह्मजगतःपृथक् ॥ सृष्टिकालेऽपिहिघटोमृदोभिन्नोनमृद्घटात् ॥ ३२ ॥ करस्त्ववयवत्वेनशरीराद्भिद्यतेंऽशकः ॥ शरीरंनकराद्भिन्नंतस्यावयवितांऽशिता ॥ ३३ ॥ कार्याणिभिन्नभिन्नानितथात्वात्तस्यवीक्षया ॥ प्राकृतानिविबुध्यंतांयथासामान्यदर्शनं ॥ ३४ ॥ सर्वात्मकमनुस्यूतंसर्वत्रब्रह्मकारणम् ॥ सर्वधर्माश्रयत्वेनातथात्वात्तदलौकिकं ॥ ३५ ॥ उक्तवाक्येऽप्यतोरूपंनिरूप्याशंक्यभिन्नतां ॥ सर्वत्रचस्वगतभेदविवर्जिततोच्यते ॥ ३६ ॥ व्याप्तेर्दशमवाक्येऽपिगुणानांगृह्यमाणंता ॥ निरूपयंतिश्रुतयस्तस्मादुक्तंव्य

---

१ भगवतश्चक्षुरादेः २ लोकतुल्यावयवनांनिषेधः ३ उपनिषत्सु ४ श्रुतिः ५ तिरोहितचिदानंदत्वात्तिरोहितधर्मत्वाच्च ६ बहुस्यांप्रजायेयेति ७ सामान्यतोयथालोकदृष्ट्यादृश्यंते ब्रह्मविदांत्विमान्येवाप्राकृतानि ८ निर्दोषपूर्णगुणेति ९ गृह्यमाणैस्त्वमग्राह्य १० ब्रह्मकर्तृकाप्राकृतगुणनिष्ठानतुगुणकर्तृकाब्रह्मनिष्ठा ११ प्राकृतस्यनिषेधोऽप्राकृतस्यविधिः

वस्थया ॥ ३७ ॥ अत्राहुःशंकराचार्य्यानिराकारंपरंभवेत् ॥ गुणक्रियाविशेषाणामत्यंताभाववन्मतं ॥ ३८ ॥ तन्मा
योपहितंसत्स्यादीश्वरःशबलाभिधः॥मायासंबंधतःकर्त्ताभोक्तास्यश्रुतिभिःकृतः॥ ३९ ॥तदुपाधिगतंधर्माद्यत्राध्यारोपयंति
१७ ताः॥वस्तुतोऽपवदन्त्येतानिर्विशेषेनिषेधिकाः॥ ४० ॥अध्यारोपापवादाभ्यांश्रुत्योःस्यात्संगतिर्द्वयोः॥लोकेप्रदर्शनायेन्दोर्य
थाशाखापिदर्श्यते ॥ ४१ ॥ ज्ञानार्थचित्तशुद्ध्यर्थोपास्त्यैप्रथमंतथा ॥ निरूप्यतेसधर्मत्वंजातेज्ञानेनिषिध्यते ॥ ४२ ॥
इतिचेच्छ्रूयतांमायासादिःसाऽनादिरेववा ॥ आद्येकर्त्तातुकोब्रह्मातिरिक्ताभावतः परं[३] ॥ ४३ ॥ कर्तृत्वंनिर्विशेषस्यपुनः
प्राप्तंद्वितीयके ॥ द्वैतापत्तिःसदेवेतिप्रभृतिश्रुतिबाधनं॥ ४४॥ ब्रह्माप्यनाद्यनादिःसोपहितस्याप्यनादिता ॥ सर्गोऽविरतमेव
स्यान्नजातुप्रलयोभवेत्॥ ४५॥नित्यबद्धंभवद्ब्रह्ममुक्तिस्तन्नाशनेयदि ॥ श्रूयेतक्वापितस्यापिजीववन्मुक्तिसाधनं ॥ ४६ ॥
व्यासाचार्य्यैःप्रतिज्ञायनिर्गुणस्यविचारणं ॥ अथातोब्रह्मजिज्ञासेत्यत्रैतस्यैवलक्षणं ॥ ४७ ॥ जन्माद्यस्ययतःशास्त्रयो
नित्वादितिकथ्यते ॥ प्रतिज्ञोपक्रमौभग्नौस्फुटंव्यासस्यतेमते ॥ ४८ ॥ निषेधत्येवकर्तृत्वंप्रकृत्युपहितस्यतु ॥ गौणश्चेन्ना
त्मशब्दादित्यादिनासूत्रकृत्स्वयं ॥ ४९ ॥ नसोऽकामयतेत्यादिरूपिताःकामनादयः ॥ संभवंतिजडायानिर्धर्मत्वाद्ब्रह्मणो

---

१ सविशेषनिर्विशेषवादितयाद्विविधयोः २ ज्ञानसंपादिकाचित्तशुद्धिः तत्संपादिकाचोपासना ३ निर्विशेषब्रह्मैवकर्तृस्यादित्यर्थः ४ एकं ब्रह्मपरामायेतिद्वैतं ५ सदेवसौम्येदमग्रआसीत् आत्मैवेदमग्रआसीत् आत्मावाइदमेकएवाग्रआसीदित्यादीनांसृष्टेः प्राग्वस्त्वंतरसत्तानिषेधकश्रुतीनांविरोधः ६ शबलाख्यापन्नं ७ उपाधिभूतायामायायाः १७

नते ॥ ५० ॥ तस्योपाधिवशात्तत्त्वेनिर्विशेषविकल्पतां ॥ ब्रह्मणोबाधतेयासानश्येत्तज्ज्ञानतःकथं ॥ ५१ ॥ न्यायात्प्र
क्षालनाद्धीतिह्यध्यारोपापवादतः ॥ धर्माणांलोकसिद्धानामपवादोऽस्तुकेवलं ॥ ५२ ॥ मायागुणोपासनाच्चेन्मुक्तिःस्या
द्धेयताकुतः ॥ ज्ञानोद्भवेपराद्धंवांकिमायारूपया स्त्रिया ॥ ५३ ॥इत्यादिदूषणगणैस्तन्मतंश्रुत्यसंमतं ॥आचार्यैःप्रभुभिश्चा
न्यैर्विस्तरेणनिराकृतम् ॥ ५४ ॥ तस्माद्गतीच्छयासर्वशक्तिरीश्वरआत्मनः ॥ सर्वमाविश्वकारेदमित्येवश्रुतयोऽवदन् ॥ ५५ ॥
श्रुत्योरुभयवादिन्योर्निर्णयेप्राहसूत्रकृत् ॥ तद्यवस्थामिमामेवश्रुतिभिःसैवसिध्यति ॥ ५६ ॥ ( अ० ३पा० २सू० २२ )
प्रकृतैतावत्त्वंहिप्रतिषेधतिततोब्रवीतिचभूयः ॥ कर्त्ताभर्त्ताचभोक्ताचनिहंतापिसएवहि ॥ अहंसर्वस्यसइमाँल्लोकानसृज
तेत्यपि ॥ ५७ ॥सर्वकर्त्तासर्वभोक्ताभर्त्ताभोक्तामहेश्वरः ॥ भर्त्तासन्भ्रियमाणोबिभर्त्तीत्यादिवचोभरैः ॥ ५८ ॥ स्वातं
त्र्यंयुज्यतेकर्त्तुःस्रष्टास्वातंत्र्यमीशितुः ॥ मायायास्तस्यशक्तित्वात्करणत्वंपुराणतः ॥ ५९ ॥ धर्माविर्भावतःस्वस्याप्राकृता
त्मत्वसिद्धये ॥ पूर्वंससेव्यतेजातेतादृक्केनिश्चलंपुनः ॥ ६० ॥ अजानंस्तस्यमाहात्म्यंनैवसेवेतकश्चन ॥ इतिमाहात्म्यबो
धायप्रवृत्ताःश्रुतयोऽखिलाः ॥ ६१ ॥ ( मुंडके ) दिव्योह्यमूर्त्तःपुरुषःसबाह्याभ्यंतरोह्यजः ॥ अप्राणोह्यमनाःशुभ्रइ
तिदिव्यस्त्वलौकिकः ॥ ६२ ॥अजन्माऽप्राकृततनुःशुद्धःप्राणीतरोऽमनाः ॥प्राणिभिःप्राकृतैःसेव्योऽशुद्धैर्न्यूनैर्मनोवशैः ॥ ६३ ॥
यस्याऽप्राकृतधर्म्माआत्माभिन्नाश्चशक्तयःसर्वाः ॥ सर्वांशभेदहीनंलक्ष्मीनंभजमनोभवद्दीनम् ॥ ६४ ॥ ॥ इति

१ कामादिमत्त्वे २ प्रक्षालनाद्धिपंकस्यदूरादस्पर्शनंवरं

श्रीवेदांतचिंतामणौब्रह्मसाकारत्वविवेकोनामनवमंप्रकरणम् ॥ ९ ॥ ॥ ॥ ॥ ॥ ७ ॥ 
शुद्धाद्वैतंवस्तुतस्तुनानाभेदंनिजेच्छया ॥ स्वाभिन्नशक्तिधर्माणंनुमोनानामतस्तुतं ॥ १ ॥ ब्रह्मैवैकंप्रपंचस्यनिमित्तंसमवा
यिच ॥ पुराणेकरणंमायातच्छक्तिर्दंडवन्मता ॥ २ ॥ अचिंत्याविविधानित्याःस्वाभाविक्योऽस्यशक्तयः ॥ ज्ञानक्रि
 यादिभेदेनस्वाभिन्नाःस्ववशाविभोः ॥ ३ ॥ श्वेताश्वतरे॥नतस्यकार्य्यंकरणंचविद्यतेनतत्समश्चाभ्यधिकश्चदृश्यते ॥ परा
स्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानक्रियाबलंच ॥ ४ ॥ यःसर्वज्ञःसर्वशक्तिरित्यादिश्रुतिभिःश्रुताः ॥ तासुमायाप्य
घटितघटनायांपटीयसी ॥५ ॥(स्कंध १०)श्रियापुष्ट्यागिराकान्त्याकीर्त्यातुष्ट्येलयोर्जया॥ विद्ययाविद्ययाशक्त्यामाय
याचनिषेवितम् ॥ ६ ॥ इतिभागवतोक्तासुमुख्यासुद्वादशस्वियम् ॥ गणिताकारणत्वेनपुराणेपरिवर्णिता ॥ ७ ॥ ( प्रथ
मस्कंधे ) सएववेदंससर्जाग्रेभगवानात्ममायया ॥ सदसद्रूपयाचासौगुणमय्याऽगुणोविभुः ॥ ८ ॥ सामर्थ्यंसर्वभवनेतस्य
मायेतिकथ्यते ॥ शक्तित्वात्तदभिन्नासाविचित्रपरिणामकृत् ॥ ९ ॥ क्वचित्संमोहिकामायाऽविद्यैवव्यपदिश्यते ॥ बहवो
ऽर्थाहिमायायागीताभाष्येप्रदर्शिताः ॥ १० ॥ मायाशब्दःक्वचिच्छास्त्रेहरिसामर्थ्यवाचकः ॥ क्वाप्यविद्यामृषावाचीकृपा
कपटवित्तवाक् ॥ ११ ॥ शक्तिशक्तिमतोर्भेदोवस्तुबोधायकेवलम् ॥ अभेदोवस्तुतोनाक्ष्णोदृष्टिशक्तिः[2]पृथग्भवेत् ॥ 
॥ १२ ॥ नधर्मधर्मिणोर्द्वैतमप्यस्याप्राकृतस्यतु ॥ ( अ० ३ पा० २ सू० २८ ) प्रकाशाश्रयवद्वातेजस्त्वादितिहिसूत्रितम्॥

---

१ तत्त्वदीपिकाख्ये अजोपिसन्नव्ययात्मेत्यस्यव्याख्याने २ पुरुषधृतवस्त्रवत्पृथक्कर्तुंनशक्यते

॥ १३ ॥ तेजःप्रकाशयोर्भेदोनतेजस्त्वाद्यथातथा ॥ ब्रह्मणःशक्तिधर्माणांब्रह्मत्वेनभिदानहि ॥ १४ ॥ नभूमिर्गंधतोभि
न्नानगंधोभूमितःपृथक् ॥ तद्वस्तुतादृगेवेतिनद्वैतंधर्मधर्मिणोः ॥ १५ ॥ अस्मिँस्त्वलौकिकेऽचिंत्येऽद्वयेभेदोनसर्वथा ॥
सुविस्तृतमिदंभाष्येश्रीविद्वन्मंडनेतथा ॥ १६ ॥ माध्वाचार्याइहप्राहुर्जगत्कर्त्ताकुलालवत्॥ भिन्नोनिमित्तमेवेशोवि
कारात्समवायिनः ॥ १७ ॥ प्रकृतिःस्यादुपादानंतत्तंत्रास्यजडस्यतु ॥ प्रकृतिर्ब्रह्मस्योपादानमितिभागवतोक्तितः ॥
॥ १८ ॥ ब्रह्मणोजडजीवानांद्वैतमेवास्तिवास्तवम् ॥ जीवब्रह्मभिदांवक्तिद्वासुपर्णाश्रुतिर्यतः ॥ १९ ॥ इतिचेच्छ्रूय
तामुक्तासूत्रकृद्ब्रह्मकारणम् ॥ जन्माद्यस्येतिसूत्रेणकेवलंननिमित्तता ॥ २० ॥ समवायित्वमप्यस्येत्याहतत्तुसमन्व
यात् ॥ रत्यभावोनयुज्येतनैवेरेमेश्रुतीरितः ॥ २१ ॥ अस्यैवायेसहैतावानासेतिसमवायिता ॥ पठ्यतेसमवायि
त्वंतैत्तिरीयादिषुस्फुटम् ॥ २२ ॥ असद्वाइदमग्रआसीत् ॥ ततोवैसदजायत ॥ तदात्मानꣳस्वयमकुरुत॥ तस्मात्तत्सुकृत
मिति॥आत्मानमित्युपादानंनिमित्तमकरोदिति॥ अभावोऽन्यनिमित्तस्यस्वयमित्यभिधीयते ॥ २३॥ऐतदात्म्यमिदंसर्वं ॥
आत्मैवेदंसर्वं ॥ सर्वंखल्विदंब्रह्म॥ पुरुषएवेदꣳसर्वं ॥ यद्भूतंयच्चभव्यम्॥श्रुतिभिःस्मृतिभिःप्रोक्ताजगतोब्रह्मरूपता॥बाध्येत
प्रकृतिस्त्वाविरासास्यांशःसदात्मकः ॥ २४ ॥ अतस्त्वदुक्तवाक्येऽपिब्रह्मतन्त्रितंयत्वहम् ॥ प्रकृतेःपुरुषस्यापिकालस्यहरि

---

१ ईश्वराधीना २ जगतः ३ कारणसाधर्म्यादितिभावः ४ मुंडके पैंगिरहस्यब्राह्मणेचेदं ५ अकुरुतेत्यस्यार्थिकोनुवादः ६ दंडादितुल्यस्य
७ प्रकृतिर्ब्रह्मस्योपादानमितिवाक्ये ८ प्रकृतिः पुरुषः कालश्चेति

रूपता ॥ २५ ॥ यत्र[1]येनेतिपद्योक्ताऽपेऽप्येतद्दर्शयिष्यते ॥ सर्गांतरे[2]नथात्वे[3]ऽपिनिर्दा[4]नंतुतद्[5]देवहि ॥ २६ ॥ अत्रो[6]र्णनाभिदृष्टांतोऽप्यनेकत्रनिदर्श्यते ॥ समवायेऽप्यविकृतिःपूर्वमेवप्रदर्शिता ॥ २७ ॥ सर्वत्राद्वैतमेवोच्चैर्वदंतिश्रुतयोऽखिलाः ॥ पुमान्कथंचिदपिहिद्वैतज्ञानेऽपिदुष्यति ॥ २८ ॥ द्वासुपर्णाश्रुतौस्पष्टौजीवांतर्यामिणोर्भिदा ॥ वृक्षा[7]श्रयत्वस[8]हजत्वादिनैवपरस्ययत् ॥ २९ ॥ तत्त्वमस्यादिवाक्यानितदभेदंवदंतिच ॥ अभेदोंशांशिभावेनब्रह्मस्वांशःस[9]यन्मतः ॥ ३० ॥ स्वांशत्वमंशोनानाव्यपदेशादित्युपक्र[10]मात् ॥ व्यासेनबोधितंसूत्रेस्तथास्मृतिपुराणयोः ॥ ममैवांशोजीवलोकेजीवभूतःसनातनः ॥ मनःषष्ठानींद्रियाणिप्रकृतिस्थानिकर्षति ॥ ३२ ॥ ( स्कंध १० ) स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणंतवपुरुषंवदंत्यखिलशक्तिधृतोंशकृतम् ॥ इतिनृगतिंविविच्यकवयोनिगमावपनंभवतउपासतेंघ्रिमभवंभुविविश्वसिताः ॥ ३३ ॥ भेदाभेदंब्रुवातेआचार्य्यौनिम्बार्कभास्करौ ॥ निम्बार्काणांमतेभेदोवास्तवोमाध्ववन्मतः ॥ ३४ ॥ पुत्रादयोविभिन्नांशाःस्वांशाःकरपदादयः ॥ विभिन्नांशाइमेजीवाइतिभेदोविनिश्चितः ॥ ३५ ॥ एषांचित्त्वेनसाधर्म्यादभेदोऽपिनिरूप्यते ॥ मुखस्याल्हादकत्वेनसादृश्याच्चंद्रतायथा ॥ ३६ ॥ अंशत्वंमाध्ववत्तेषांभेदाभेदौव्यवस्थया ॥ सिद्धांतवदणुत्वादितत्राप्यवहितःश्रृणु ॥ ॥ ३७ ॥ स्वांशत्वमेवजीवानांममैवेत्येवकारतः ॥ हेतुःसंगच्छतेनानाव्यपदशोनतेमते ॥ ३८ ॥ पादोऽस्यविश्वाभूतानीति

---

१ निबंधे यत्रयेनयतोयस्येतिश्रीभागवतवचनव्याख्याने २ कदाचित्पुरुषद्वारेतिनिबंधोक्तेः ३ प्रकृतेर्जगत्कारणत्वे ४ प्रकृतिकारणत्वाज्जगतआदिकारणं ५ ब्रह्मैव ६ अभिन्ननिमित्तोपादानत्वे ७ देहाश्रयत्वं ८ सदृश ९ जीवः १० उपक्रमंविधाय ल्यब्लोपेपंचमी

पादत्वेनचांशताम् ॥ मंत्रवर्णादितिव्यासःस्वांशतैवतथासति ॥ ३९ ॥ वन्हिस्वांशोविस्फुलिंगोऽतोदृष्टांतीकृतःश्रुतौ ॥ अस्यावयवभूतैस्तुव्याप्तंकृत्स्नमिदंजगत् ॥ ४० ॥ इत्यादिश्रुतिभिर्जीवाःस्वांशाअवयवोक्तितः ॥ क्वाप्यश्रुतंविभिन्नांशत्वंसर्वत्राभिदाऽनयोः ॥ ४१ ॥ यत्त्वाहमाध्वोवनमालिदासोराश्येकदेशोंशइहास्तुचंद्रात्॥ यथाशतांशोगुरुमंडलंस्यादित्थंमयान्यत्रतदप्यदूषि ॥ ४२ ॥ यथासौम्येतिमृत्पिंडदृष्टांतोऽत्रपराहतः ॥ प्रतिज्ञैहैकविज्ञानात्सर्वविज्ञानमित्यपि ॥ ४३ ॥ अभेदएवश्रुतिषुतत्त्वमस्यादिषूदितः ॥ बंधेद्वैतभ्रमोमोक्षेतन्निवृत्तिर्निगद्यते ॥ ४४॥ तैत्तिरीये॥यदाह्येवैषएतस्मिन्नुदरमंतरंकुरुते॥अथतस्यभयंभवति॥ बृहदारण्यके॥यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्याद्युक्त्वायत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादि॥तथायोऽन्यांदेवतामुपास्तेऽन्योऽसावन्योऽहमस्मिनसवेदयथापशुः ॥ ४५ ॥ निंदंतिश्रुतयोद्वैतंदोषोऽज्ञानेतथामहान् ॥ श्रौतंब्रह्मप्रपंचैक्यंघटतेनमतेचते ॥ ४६ ॥ सप्तमस्कंधे ( अ० ९ ) यस्मिन्यतोयर्हिचयेनयस्ययस्मैयस्माद्यथायदुतयस्त्वपरःपरोवा ॥ भावःकरोतिविकरोतिपृथक्स्वभावःसंचोदितस्तदखिलंभवतःस्वरूपम् ॥ ४७ ॥ भास्कराणांमतेभेदऔपाधिकउदीरितः ॥ अभेदस्त्वंततोजीवोव्यापकोलिंगतोऽणुता ॥ ४८ ॥ इहापिव्यापिताजीवतयात्र

---

१ सूत्रेषुद्वितीयस्यतृतीयपादेप्राहेतिशेषः २ जीवब्रह्मणोः ३ द्वैतमतेभेदाभेदमतेच ४ छांदोग्येअपिवातमादेशमप्राक्षोयेनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञातमिति मुंडकादिषु कस्मिन्नुखलुभगवोविज्ञातेसर्वमिदंविज्ञातंस्यादित्यादि ५ निगदेनप्रतिपाद्यते ६ उच्छेदोऽप्यर्थेअरमल्पमपिअंतरंभेदं ७ उपाधिनाशे ८ आणुत्वश्रुतिर्लिंगशरीरकृतपरिच्छेदाभिप्रायेण

ह्मतयाथवा ॥ आद्येनैयायिकेवैशेोद्वितीयेशांकरेतथा ॥ ४९ ॥ पुरानिराकृताव्याप्तिर्द्विधोपाधिकृताणुता ॥ नित्य
स्वाभाविकैश्वर्य्यज्ञानादेर्यदिराधकः ॥ ५० ॥ घटेतोपाधिरेवान्योनाऽबाधाखिलधर्मिणः ॥ अद्वयस्यस्वतंत्रस्य[३]दूरे

तन्मूलिकाभिदा ॥ ५१ ॥ ( स्कंध १० ) व्रजँस्तिष्ठन्पदैकेनयथैवैकेनगच्छति ॥ यथातृणजलौकैवंदेहीकर्मगतिं
गतः ॥ ५२ ॥ इत्यादिनावक्तिनानातस्यभागवतंगतीः ॥ अन्यानिसंयातिनवानिदेहीत्यादिकास्मृतिः ॥ ५३ ॥ पूर्व
त्यागोगतिर्देहान्तरेव्याप्तस्यनोचिता ॥ इदंलिंगस्यचे[४]द्ब्रूयाद्देहःकर्मगतिंगतः ॥ ५४ ॥ अत्र[५]देहीतिसंघातदेहवान्भिन्नउच्य
ते ॥ त्याज्यप्राप्यत्वकथनात्स्थूलदेहस्यनेहसः ॥ ५५ ॥ इत्यादिश्रुत्यादिमूलैर्मतान्येतानिदूषणैः ॥ प्राचामाचारतोवा
चामर्वाचामपिसुस्फुटैः ॥ ५६ ॥ समनूद्यपृथङ्माध्वकिरणादिषुविस्तरात् ॥ निरस्तानिमयाशुद्धाद्वैतचंद्रोदयादिषु ॥ ५७ ॥
अभेदोवास्तवोब्रह्मजगतोरैच्छिकीभिदा ॥ जीवाःस्वांशाःप्रवेशादिसिद्धांतःश्रुतिसंमतः ॥ ५८ ॥ निबंधे॥सजातीयविजा
तीयस्वगतद्वैतवर्जितं ॥ ब्रह्मोक्तंश्रीमदाचार्यैर्द्वैतगंधोपिनास्तिनः ॥ ५९ ॥ तत्रजीवाःसजातीयाविजातीयाजडामताः ॥
स्वगताअंतरात्मानोभिन्नाघटशराववत् ॥ ६० ॥ अभिन्नाब्रह्मणोमृत्त्वाद्घटादेरभिदायथा ॥ सजातीयादिभेदानांस्व
रूपंचयथोदितम् ॥ ६१ ॥ वृक्षस्यस्वगतोभेदःपत्रपुष्पफलादिषु॥वृक्षांतरात्सजातीयोविजातीयःशिलादितः ॥ ६२ ॥ शु

१ प्रवेशः २ जीवत्वेनब्रह्मत्वेनच ३ तर्हीतिशेषः ४ शुकः ५ वाक्ये ६ जलेसैंधवखिल्यवत्जीवानांब्रह्मणिप्रवेशः वन्हेर्विस्फुलिंगवत्ततोनिर्ग
मइति ७ विद्यारण्यादिभिः कथितं ८ विद्यारण्यकारिकेयं

द्वाद्वयनं[1]यजयकं[2]द्वययाभयत्द्वद्रवप्रभवभाजाम् ॥ कारणमाह्वयमेकं[3]तं[4]मनुत्सेकंभजस्वसविवेकम् ॥ ६१ ॥ ॥ इतिश्री वेदांतचिंतामणौशक्तिधर्माभेदनिरूपणपूर्वकद्वैतमतनिराकरणंनामदशमंप्रकरणं ॥ १० ॥ ॥ ॥ छ ॥

यद्रूपश्चिंदचित्सर्गःस्पृष्टःसृष्टौनतेनयः ॥ सर्वत्रसन्नविज्ञातोऽस्मैनमोऽनुप्रवेशिने ॥ १ ॥ यःसर्वत्रैवसंतिष्ठन्नंतरःसंस्पृशेन्नतत् ॥ शरीरंतन्नवेदेत्थंयोऽनुविश्यप्रकाशते ॥ २ ॥ इत्याहुःश्रीमदाचार्याःशास्त्रार्थेब्रह्मरूपणे ॥ संगृह्यकथ्यतेऽत्रार्थोयः पृथिव्यामितिश्रुतेः ॥ ३ ॥ बृहदारण्यकेऽध्यायेपंचमेतत्रसप्तमे॥ब्राह्मणेपठ्यतेवाक्यमंतर्यामिनिरूपके॥ ४ ॥( पृ० ६१६ ) यःपृथिव्यांतिष्ठन्पृथिव्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमंतरोयमयत्येषतआत्मांतर्याम्यमृतइत्यादि ॥ रामानुजावदंतीहविशिष्टाद्वैतवादतः ॥ श्रुतावस्यांपृथिव्यादिसप्तम्याऽऽधाररूपणात्॥ ५ ॥अंतस्छस्योच्यतेभेदोयथाऽऽस्ते भूतलेघटः ॥ इतिवाक्येभूमितलाद्घटभेदःप्रतीयते ॥ ६ ॥ अतःपृथ्व्यादिकंव्याप्यंभिन्नमेवाखिलंपरात् ॥ ब्रह्मणोहिशरीरेद्वेनित्येचिदचितीमते ॥ ७ ॥ सूक्ष्मेकारणरूपेतयाभ्यांस्थूलमभूज्जगत् ॥ चिच्छरीरात्तुचित्कार्यमचित्त्वाचिच्छरीरतः॥८॥ विभागानर्हतानामरूपयोःसूक्ष्मतामता ॥ नामरूपव्याकरणंत[12]स्यैवस्थौल्यमुच्यते ॥ ९ ॥ ब्रह्मैवंसूक्ष्मचिदचिद्विशिष्टंकारणं[13]श्रुतेः ॥ कार्यंचस्थूलचिदचिद्विशिष्टमितिनिर्णयः ॥ १० ॥ विशिष्टाद्वैतमनयोरद्वैतंतद्विशिष्टयोः॥विशेषणेचिदचिती

---

१ सिद्धांतः २ अर्थात्श्रीमदाचार्याः ३मातांतरेषुजगत्कारणतयोक्तानामविद्यातद्गुणप्रकृतिचिदचिच्छरीरप्रभृतीनांव्यावर्तनायैकमितिं४पुरुषोत्तमं ५ जडजीवसर्गः ६ प्रपंचसत्ताकाले ७ जडजीवाभ्यांबुद्धः ८ निबंधश्लोकोऽयं९ शास्त्रार्थप्रकरणे१०परमात्मनः ११षष्ठ्यंतमिदं१२शरीरद्वयस्य १३ उक्तवाक्यात् तत्त्ववैशिष्ट्येप्रमाणं

ब्रह्मणःकारणात्मके ॥ ११ ॥ सूक्ष्मेस्थूलेतुतेकार्यात्मकेकार्यविशेषणे ॥ जीवस्तुस्थूलचित्स्थूलमचित्पृथ्व्यादिकंमतं ॥
॥ १२ ॥ अंतःस्थितोनियंतेहाऽनुप्रविष्टोविभागकृत् ॥ उक्तश्रुतौपृथिव्यादेर्जडस्यांतःस्थितःश्रुतः॥ १३ ॥जीवस्यापितथाँ

काण्वैर्योविज्ञानइतीरणात् ॥ यँआत्मनीतितत्पाठभेदान्माध्यंदिनेश्रुतम् ॥ १४॥शरीरत्वंचतत्रैवश्रुतंतस्यैतयोर्द्वयोः॥जीवो
जडोंतरात्मेतिभोक्तृभोग्यनियामकाः ॥ १५ ॥ क्रमात्त्रयःपदार्थास्तैर्मतास्तत्कारिकायथा ॥ ईश्वरश्चिदचिच्चेतिपदार्थ
त्रितयंहरिः॥ईश्वरश्चितइत्युक्तोजीवोदृश्यमचित्पुनः॥ १६ ॥द्रव्याद्रव्यप्रभेदायितमुभयविधंतद्विधंतत्त्वमाहुर्द्रव्यंद्वेधाविभ
क्तंजडमजडमितिप्राच्यमव्यक्तकालौ ॥ अंत्यंप्रत्यक्पराक्चप्रथममुभयथातत्रजीवेशभेदान्नित्याभूतिर्मतिश्चेत्यपरमि
हजडामादिमांकेचिदाहुः ॥ १७॥ तत्र ॥ द्रव्यंनानादशावत्प्रकृतिरिहगुणैःसत्त्वपूर्वैरुपेताकालोब्दाद्याकृतिःस्यादणुरवग
तिमाञ्जीवईशोन्यआत्मा ॥ संप्रोक्तानित्यभूतिस्त्रिगुणसमधिकासत्त्वयुक्तातथैवज्ञातुर्ज्ञेयावभासामतिरितिकथितंसंग्रहाद्द्र
व्यलक्ष्म ॥ १८ ॥ इत्थंवेंकटनाथाद्याविस्तराच्छ्रुतियुक्तिभिः ॥ तत्स्रग्धरासहस्रादौपदार्थव्यभजंतते ॥ १९ ॥ लयेक्रम

---

१ चिदचितोः २ रूपनामव्याकर्ता ३ अंतस्थितः ४ योविज्ञानेतिष्ठन्विज्ञानादंतरइत्यादिकाण्वानांबृहदारण्यकेपाठः ५ यआत्म
नितिष्ठन्नात्मनोंतरइत्यादि ६ वाक्यं ७ माध्यंदिनबृहदारण्यके ८ एतयोर्जडजीवयोस्तस्यब्रह्मणःशरीरभूतत्वं ९ यस्यपृथ्वीशरीरमित्या 
दिभिर्जडस्ययस्यविज्ञानंशरीरंयस्यआत्माशरीरमितिर्जीवस्य १० अस्तीतिपृथग्वाक्यं ११इदमुत्तरान्वयि तेष्त्रीश्वरस्तुहरिरित्यर्थः नत्विहपदार्थत्रय
स्यहरित्वंविधीयते द्वैतभंगापत्तेः

ज्जीवजडौशरीरेचित्यऽचित्यपि ॥ विलीयेतेनामरूपाऽविभागेनप्रवेशतः ॥ २० ॥ वस्तुतोभिन्नमेवैतद्ब्रह्मणश्चिदचित्सदा ॥ स्वरूपतःस्वभावाद्यैःशरीरत्वादभेदवाक् ॥ २१ ॥ सूक्ष्मेचिदचितीब्रह्मतत्त्वानित्रीणिकारणे ॥ स्थूलेतेचतदंतस्थःकार्यंतत्त्वत्रयंमतम् ॥ २२ ॥ तत्स्थूलसूक्ष्मचिदचिद्विशिष्टकार्यकारणे ॥ क्रमात्तयोरभेदस्तुविशिष्टाद्वैतमीर्यते ॥ २३ ॥ चिच्छरीरेणचित्कार्यस्याचितोचिच्छरीरतः ॥ अंतस्थेनपरस्यैक्यंनत्रयाणांपरस्परं ॥ २४ ॥ अस्मन्मतेपिभेदश्चेज्जडजीवांतरात्मनां ॥ निबंधेतन्मतंतत्त्वत्रयंस्यादितिचेन्नहि॥२५॥ जडोजीवोंतरात्मेतिकार्यमेवत्रिधामतं ॥ कारणंत्वेकमेवेदमद्वैतैकरसंपरं ॥२६॥सबहुस्यांप्रजायेयतीच्छामूलःपरस्परं॥कार्यमात्रत्वतोभेदस्तेषांघटशराववत्॥२७॥ननित्योवास्तवस्त्वेषांभेदःकुड्यकुसूलवत्॥मृत्त्वेनाभेदवत्तेषामभेदोत्रास्तिवास्तवः॥ २८॥सर्वंपुरुषएवेदंनेहनानास्तिकिंचन॥मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यति ॥ २९ ॥ द्वैतदृष्टेर्द्वितीयाद्वैभयंभवतिसर्वथा ॥आत्मेतितूपगच्छंतिग्राहयंतिचतद्विदः ॥३०॥ बृहदारण्यकेपुरुषविधब्राह्मणे ॥ (पृ० २१५) तद्योयोदेवानांप्रत्यबुध्यतसएवतदभवत्तथाऋषीणांतथामनुष्याणांतद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेहंमनुरभवंसूर्यश्चेति तदिदमप्येतर्हियएवंवेदाहंब्रह्मास्मीतिसइदंसर्वंभवति तस्यहनदेवाश्चनाभूत्या

---

१ नामरूपविभागोच्छेदकात्प्रवेशात् २ पंचमीयं३ सृष्टिप्राक्काललयोत्तरकालयोरपिनाभेदइतिभावः ४ इमेभेदेहेतवः ५ ब्रह्माभेदोक्तिस्तयोःशरीत्वाभिप्रायादौपचारिकी ६ चिदचिती ७ जडजीवांतर्यामिणां ८ घटादीनां ९जडादिषु १० अनौपचारिकः ११ कठस्थंवाक्यद्वयं१२ बृहदारण्यकेस्फुटमिदं १३ ( अ०४ पा० १ सू० ३ग्राहयंतिचेत्यंतंसूत्रं

ईशतआत्माह्येषा ॑सभवति अथयोन्यांदेवतामुपास्तेऽन्योऽसावन्योहमस्मीतिनसवेदयथापशुरेवंसदेवानामित्यादि ॥
ब्रह्मविद्ब्रह्मैवभवतीत्यादिश्रुतिषुस्फुटं ॥ कार्येपिभिन्नं[1]चिदचिद्विशिष्टंतनवारितम्॥ ३१ ॥अथब्रह्मातिरिक्तस्यकारणत्वंनि
वारये॥एकमेवाद्वितीयंतद्वेदब्रह्मैवकारणं॥ ३२ ॥नासदासीन्नोसदासीन्नान्यत्किंचिन्मिषत्तदा॥स्वभिन्नचिदचित्सत्त्वेत्वेको
२२ ह्मितिबाध्यते ॥ ३३ ॥ बृहदारण्यके ( पृ० १२५ ) आत्मैवेदमग्रआसीत्पुरुषविधःसोनुवीक्ष्यनान्यदात्मनोपश्यत्॥ त
त्रैव ( पृ० १९८ ) ब्रह्मवाइदमग्रआसीत्तदात्मानमेवावेदहंब्रह्मास्मीतितस्मात्तत्सर्वमभवत् ॥ तत्रैव ( पृ० २५७ )
आत्मैवेदमग्रआसीदेकएवसोकामयतेत्यादि ॥ च्छांदोग्येश्वेतकेतुविद्यायां ( खंड २ ) सदेवसौम्येदमग्रआसीदेकमेवा
द्वितीयं० सत्त्वेवसोम्येदमग्रआसीदेकमेवाद्वितीयं तदैक्षतबहुस्यांप्रजायेयेति ॥ तत्तेजोऽसृजत ॥ बह्वृचानामैतरेयोप
निषदि ॥ आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत् सऐक्षतलोकान्नुसृजाइतिसइमाँल्लोकान[2]सृजतेत्यादि ॥
तैत्तिरीये ॥ तस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यादि ॥ तथा ॥ सोकामयत बहुस्यांप्रजायेयेति ॥सतपोतप्यत॥सत
पस्तप्त्वा॥इदं॑सर्वमसृजत॥अग्रे॥तदात्मानं॑स्वयमकुरुत॥तस्मात्तत्सुकृतमुच्यतइति॥स्वयं[3]पर्यणमद्ब्रह्मजगद्रूपेणकेवलं[4] ॥ ब्र
ह्मणो[5]न्येशरीरेतुयुज्येतेनैजीववत् ॥ ३४॥अशरीरंशरीरेषुअनवस्थेष्ववस्थितं ॥ महांतंविभुमात्मानंमत्वाधीरोनशोचति ॥ २२

---

१ निबंधेकार्यावस्थायांचिदचिद्विशिष्टयकथनेपितत्रतात्त्विकभेदानंगीकारात्निबंधाऽविरोधायभिन्नपदं २ लोकाअंभःप्रभृतयःपदार्थास्तत्रप्र
सिद्धाः ३ प्रयोजनशून्यं ४ सूक्ष्मशरीररहितं ५ शरीरिभिन्ने

॥ ३५ ॥ शरीराभावमेतस्ययत्पठंतिकठादयः ॥ नेदंजीवपरंवाक्यंब्रह्मप्रश्नोत्तरेस्थितं ॥ ३६ ॥( अ० १ पा० ४सू०६)
त्रयाणामेवचैवमुपन्यासःप्रश्नश्च॥इतिसूत्रेस्फुटमिदंविभुत्वंचेहबाधकं ॥ आनंदमात्रकरपादमुखोदरएवसः ॥ ३७॥साकारःश्रूयतेजीववद्भिन्नावयवोनसः ॥ सूत्रेतदतएवाहचतन्मात्रमितिस्फुटं ॥ ३८ ॥ शरीरेष्वित्युक्तितस्तेकल्प्येतेचेद्द्वहूंक्तितः अनवस्थत्वोक्तितोद्वेएवनित्येचतेकुतः ॥ ३९ ॥ किंचतेकिंपरिच्छिन्नेनवाऽध्येयपरिमातुका ॥ अणुर्वामध्यमानैवसाप्रसिद्धातयोःक्वचित् ॥ ४० ॥ परिच्छिन्नतयानंतविश्वोत्पत्तौक्षयोऽनयोः ॥ किंचैतयोरधिष्ठानंवाच्यंब्रह्मैवचेत्स्वयोः ॥४१॥ शरीरयोरधिष्ठानंशरीरीतिनसंगतं ॥ अपरिच्छिन्नपक्षेतुसांकर्यंनकुतोभवेत् ॥ ४२ ॥ अन्योन्यस्मिन्नयतोन्यौन्यंविभुत्वेनास्तिसर्वदा ॥ अतोविभाजकंकिंस्याद्देशकालाद्यसंभवात् ॥ ४३ ॥ देशाभेदेप्यसांकर्यंविभुत्वंचनमूर्तयोः॥दृश्यतेऽथोद्गमार्थंचाऽसांकर्यार्थंजडात्मनोः ॥४४॥ तिरोभावादिवक्तव्यंतत्प्रसिद्धंनतेमते॥इत्यादिदूषणैर्वक्तुंनशक्येचिदचित्तनू॥४५॥ नापिशक्यौतयोःसत्तासृष्टेःप्रागूब्रह्मभिन्नयोः ॥ आत्मैवेदमग्रआसीत्सदेवेत्येवकारतः ॥ ४६ ॥ एकमेवाद्वितीयंतदित्यादि

---

१ वाक्यजीवपरत्वे आवयोःसिद्धांतेतस्याणुत्वात् २ सूक्ष्मशरीरे ३ शरीरेष्वितिबहुवचनात्द्वेएवकुतः अनवस्छत्वाच्चनित्येकुतइत्यन्वयः ४ परिच्छेदपक्षे ५ श्रुत्यादौ ६ वाच्यमित्यंतंपृथग्वाक्यं ७ इदमुत्तरान्वयि ८ विभुत्वाद्देशस्यविभाजकत्वमसंभवि सार्वदिकत्वाच्चकालस्य सृष्टेःप्राक्कालादीनांसुतरामसंभवश्च ९ विस्फुलिंगवदुद्गम्यपतनार्थं देशांतरमपेक्षितमिततदर्थं १० परस्परतोवैलक्षण्यानुभवार्थं उभयोर्विभुत्वे तदननुभावापत्तेः ११ जडजीवयोः १२ तिरोऽसानीतिश्रुत्यायथाब्रह्मणःपूर्वमुपपादितंतथा १३ वक्तुमितिशेषः

श्रुतिकोपनात् ॥ इं[1]हसत्तत्त्वमस्यादौतच्चब्रह्मैव[2]गीयते ॥ ४७ ॥ ओंतत्स[3]दितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतः ॥ अहमेवासमेवा
येनान्यद्यत्सदसत्परं ॥ ४८ ॥ पश्चादहंयदेतच्चयोवशिष्येतसोस्म्यहं॥ श्रूयतेसोऽनुवीक्ष्यान्[4]यन्नात्मनोऽपश्यदित्यपि॥४९ ॥
सं[5]तीस्वा[6]न्येचिदचित्तौदृष्टेनान्वीक्षयापिचेत् ॥ सर्वज्ञत्वंव्यापकत्वमीशत्वंतस्यभज्यते ॥ ५०॥ द्वितीयेच्छारत्यभावमूलिकै
काकिनः श्रुता[7] ॥ एका[8]कित्वंरत्यभावोद्वितीयेच्छाचं[9]बाधिताः ॥ ५१ ॥ नन्वेकएवाहमासमित्यां[10]दौदेहजीवयोः ॥ द्वयोः
सत्वेप्येकपदंतदभेदाश्रयाद्यथा ॥ ५२ ॥ तथाद्विदेहयुग्ब्रह्माऽत्रा[11]त्मशब्देनगृह्यते ॥ तथैकोहंस्थलेऽतोन्यन्नासीत्क्विचित्त
देतिचेत् ॥ ५३ ॥ मैवंजीवस्यदेहेऽहंप्रत्ययोऽध्यासजोमृषा ॥ अविद्ययेशे[12]च्छयास्तीत्येकत्वंप्रयुनक्तिसः[13] ॥ ५४ ॥ नत
थाब्रह्मणोमिथ्याऽध्यासोऽज्ञानैकहेतुकः ॥ स्थिराऽनैव[14]ध्यसंख्येयकल्याणगुणशालिनः ॥ ५५ ॥ सर्वज्ञस्याऽविलिप्तस्य
स्वतंत्रस्यनियामिनः ॥ स्वाधीनाऽविद्यादिशक्तेर्नित्यमुक्तस्ययुज्यते ॥ ५६ ॥ अथात्मैवेदमित्यादौसर्वस्याप्यात्मरूपता ॥
प्राक्सर्गाच्छ्रूयतेनान्यचिदचिद्रूपताक्वचित् ॥ ५७ ॥ विरु[15]द्धाब्रह्मभिन्नत्वाद्वस्तुतोजडजीवयोः ॥ आत्मशब्दस्यचिदचि

---

१ सदेवसोम्येतिवाक्ये २ गीतायांप्रतिपाद्यते ३ गीतावाक्यमिदं ४ आर्थिकानुवादाभिप्रायात्पदविपर्यासःछंदोनुरोधात् श्रुतौतुनान्यदात्मन इतिपाठात् ५ विद्यमाने ६ स्वप्रतियोगिकतात्विकभेदवती ७ सवैनैवरेमेतस्मादेकाकीनरमतेसद्वितीयमैच्छत् सहैतावानासेति बृहदारण्यके ८ चिदचित्सत्वादेकाकित्वस्य ताभ्यांसहैवरतिसंभवात्तदभावस्यततएवद्वितीयेच्छायाश्चबाधः ९ चकारात्सर्वरूपेणभवनमपिबाधितं १० लौकिकप्रयोगे ११ सोनुवीक्ष्यनान्यदात्मनइत्यादौ १२ अविद्याकरणकबंधेऽयंहेतुः १३ जीवः १४ प्रत्येकमियत्तारहितः १५ जडजीवयोर्ब्रह्मात्मकता

त्परत्वंतुनशक्यते ॥ ५८ ॥ निर्गुणःपरएवैकस्तदर्थेइतिनिर्णयात् ॥ गौणश्चेन्नात्मशब्दादित्यादौतत्सर्वसंमतं ॥ ५९ ॥ उपादानंसहैतावानासेत्युक्त्यात[२]देवहि ॥ तथाऽभिन्ननिमित्तोपादानदृष्टांतपूर्वकं ॥ ६० ॥ सर्वेषांजडजीवानांततएवैकतःश्रुतः ॥ उद्गमोनतुतद्भिन्नचिदचिद्देहतःक्वचित् ॥ ६१ ॥ बृहदारण्यकेदृप्तबालाकिब्राह्मणाख्येचतुर्थाध्यायप्रथमब्राह्मणे ( पृ० ३७२ ) सयथोर्णनाभिस्तंतुनोच्चरेद्यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेप्राणाःसर्वेलोकाःसर्वेदेवाःसर्वाणिभूतानिव्युच्चरंतीति ॥ अनेकोपनिषद्दृष्टमेतत्किंबहुविस्तरात् ॥ नचजीवप्रकरणाद्वाक्यंजीवपरंत्विदं ॥ ॥ ६२ ॥ अणुमात्रात्ततःसर्वा[३]नुद्गमाल्लिंगबाधनात् ॥ भवेल्लिंगंप्रकरणाद्बलिष्ठं[४]पूर्वतंत्रतः ॥ ६३ ॥ सुषुप्तौब्रह्मलीनं[५]स्यततं[६]उद्गमबुद्धये ॥ सर्वेषामुद्गमस्तस्मात्पठ्यतेपरमात्मनः ॥ ६४ ॥ अथोत्पत्त्यप्ययाधारंतमेवोक्त्वातदात्मता॥ श्राव्यतेतैत्तिरीयादौसर्वेषांभूतभाविनां ॥ ६५ ॥ महानारायणोपनिषदि ॥ यस्मिन्निदंसंच[७]विचैतिसर्वंयस्मिन्देवाअधिविश्वेनिषेदुः ॥ तदेवभूतंतदुभव्यमाइदंतदक्षरेपरमेव्योमन्॥(अ० १पा० ४ सू० २३ )प्रकृति[८]श्चप्रतिज्ञादृष्टांतानुपरोधात्दित्यादि ॥तस्याऽभिन्ननिमित्तोपादानतांप्राहसूत्रकृत् ॥ अभेदश्रुतयःसर्वाःसंगच्छंतेनचान्यथा ॥ ६६ ॥ पुमांश्चप्रकृतिःसूक्ष्मतनूइत्यपिनो

---

१ आत्मशब्दार्थः २ ब्रह्मैव ३ महतांप्राणलोकादीनांजीवसकाशादुद्गमासंभवात् ४ श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसमवायेपारदौर्बल्यमर्थविप्रकर्षादितिपूर्वमीमांसासूत्रात् ५ जीवस्य ६ ब्रह्मतः ७ समेतिव्येतिच ८ जगतःप्रकृतिरुपादानकारणंचान्निमित्तकारणंचब्रह्मैव एवमेवसतिएकविज्ञानेनसर्वविज्ञानप्रतिज्ञा यथासोम्यैकेनमृत्पिंडेनसर्वंमृण्मयंविज्ञातंस्यादित्यादिदृष्टांतश्चनोपरुध्यते

चितम् ॥ यद्वक्ष्यतेब्रह्मतयोरुपादानंलयास्पदं ॥ ६७ ॥ घटतेतेनचिदचिद्विशिष्टस्यनैवकारणे॥ अंतर्यामिब्राह्मणंनसूक्ष्मतद्दे
हसाधकं ॥ ६८ ॥ आम्नायतेत्रवृत्तांतःसर्गादुत्तरकालिकः ॥ तिष्ठनूयमयतीत्येवंवर्तमानेशताचलट् ॥६९ ॥कालांतरेवि
भोर्भिन्नंकिंचिद्व्याप्यंनविद्यते॥सर्वस्यपूर्णब्रह्मत्वात्परिच्छेदाद्यभावतः॥७०॥पृथ्व्यादिनामानहँचतादृग्रूपानुपाश्रयात्॥यं
तव्याभावतस्तत्रनियमोपिनयुज्यते॥७१॥सृष्टिकालेसमुद्भूतंभूतप्राणेंद्रियादिकं॥जीवाश्चततएवात्रयेशरीरतयोदिताः७२
तित्तैरीयब्रह्मोपनिषदि॥तस्माद्वाएतस्मादात्मनआकाशःसंभूतः ॥आकाशाद्वायुरित्यादि॥मुंडकोपनिषदिद्वितीयमुंडकप्रथ
मखंडे॥एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचखंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणीत्यादिषु ॥अनेकत्रस्फुटमिदंशा
स्त्रेमीमांसितंतथा॥आचार्येणांत्ययोःसम्यक्द्वितीयाध्यायपादयोः।७३॥इदानीमैच्छिकाद्भेदाद्रूपनामविभागतः॥स्वात्मक
स्यपृथिव्यादेःसंभम्याधारतोचिता॥७४ ॥तत्रव्याप्यस्थितःकृत्स्नेप्राणनार्थनियामकः॥अनुप्रविष्टःसृष्ट्वेदंभरणायनलिप्य
ते॥ ७५ ॥ तत्तत्सृष्ट्वातदेवानुप्राविशच्छ्रुतितःस्मृतेः॥ योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः॥ ७६ ॥ तैत्तिरीयेनारायण

---

१ ब्रह्मदेहयोः २ यःपृथिव्यांतिष्ठन्नित्यादिवाक्येषु ३ मपंचस्यव्याकृतनामरूपतयास्थित्यधिकरणकालातिरिक्ते ४ आदिशब्दादानंदांशतिरोभावादीनांसंग्रहः ५ ब्रह्मकर्तृकः ६ अंतर्यामिब्राह्मणे ७ ब्रह्मसूत्रेषु८ व्यासेन ९ तृतीयचतुर्थयोः १० अयमैच्छिकभेदेहेतुः भेदश्चाधाराधेयभावे ११ यःपृथिव्यांयोप्सुइत्यादिरूपया १२ सर्वस्यजीवनार्थकोह्येवान्यात्कःप्राण्याद्यदेषआकाशआनंदोनस्यादितिश्रुतेः १३ गीतावाक्यात्

प्रश्ने ॥अतःसमुद्रागिरयश्वसर्वेस्मात्स्यंदंतेसिंधवःसर्वरूपाः ॥ अतश्चविश्वाओषधयोरसाश्चयेनैषभूतस्तिष्ठत्यंतरात्मा ॥आनंदादितिरोभावाक्रीडनार्थंपृथक्कृताः ॥ जडाजीवाश्चनिःसंगस्वांतस्थितमधोक्षजं ॥ ७७ ॥ तदिच्छयानजानंतीतिनवेदेतिभण्यते ॥ शरीरमितिभेदस्तुसृष्टिकालेपिलुप्यते ॥ ७८ ॥ पृथ्व्यादीनांत्वन्मतेपिस्थूलानामेववर्ण्यते ॥ शरीरतांत्रेतितेननसूक्ष्मेसिध्यतस्तनू ॥ ७९ ॥ भावत्कौसूक्ष्मदेहौचेद्वदाभिप्रायगोचरौ ॥ तदायश्चितितिष्ठन्योचितितिष्ठन्नितिद्वयं ॥॥ ८० ॥ एवंब्रूयात्तत्तुनोक्तंतस्मात्तौश्रुत्यसंमतौ ॥ कारणेतेनजीवानांमैतंत्रत्वन्मतंत्रयम् ॥ ८१ ॥ याऽऽधारत्वनियम्यत्वव्याप्यत्वैर्दर्शिताभिदा ॥ उपक्रमोपसंहारविचारेसानवास्तवी ॥ ८२ ॥ यथाउपक्रमे ( पृ० ६१४ ) सोब्रवीत्पतंचलंकाप्यंयाज्ञिकाःश्चयोवैतत्काप्यसूत्रंविद्यात्तंचांतर्यामिणमितिसब्रह्मवित्सलोकवित्सदेववित्सभूतवित्सआत्मवित्ससर्वविदिति तेभ्योब्रवीत्तदहंवेद ॥ इत्येकस्यैवविज्ञानात्सर्वविज्ञानमीर्यते ॥ सर्वस्यतदुपादानकत्वेसत्येवसंभवेत् ॥८३ ॥ एकमृत्पिंडविज्ञानाद्विज्ञातंस्यात्तुमृन्मयं॥एकेनलोहमणिनासर्वंलोहमयंयथा ॥ ८४ ॥ उपसंहारे ( पृ० ६२२ ) अदृष्टोद्रष्टाऽश्रुतःश्रोताऽमतोमंताऽविज्ञातोविज्ञातानान्योऽतोस्तिद्रष्टानान्योतोस्तिश्रोतानान्योतोस्तिमंतानान्योतोस्तिविज्ञातैषतआ

---

१ मथमार्थेपंचमी कठे रसाश्चेतिपाठात् २ आदिशब्दादैश्वर्यादीनांजडेचिदंशस्यचतिरोधानं ३ अधस्तादक्षजंयस्मात्तं इंद्रियजन्यज्ञानाविषयं ४ ब्रह्मेच्छया ५ शरीरत्वकथनेन ६ त्वयास्थूलत्वेनाभिमतानांपृथिव्यबग्निप्रभृतीनां ७ अंतर्यामिब्राह्मणे ८ भवदभिमतौ ९ वाक्यद्वयमेवब्रूयात्ननतु पृथिव्यादिवाक्यानि १० तादृशंवाक्यद्वयंतुनैवोक्तं ११ श्रुतेरविवक्षितं

त्मांतर्याम्यमृतइति ॥ कर्तारोदर्शनादीनांजीवाःस्वांशतयाऽखिलाः ॥ ब्रह्माऽभिन्नाविस्फुलिंगवदित्येवेहबोध्यते॥ ८५ ॥
नचेत्तादृग्जीवसत्त्वान्नोपपद्येतताोत्त्विकः ॥ सेधोद्रष्टृतरादीनांतस्मात्सर्वंतदात्मकं॥ ८६ ॥ सृष्टिकालेपरिच्छेदोभेदोऽचित्त्वं
२५ विभक्तता ॥ अनुप्रवेशोनियमोनपूर्वापरकालयोः ॥ ८७ ॥ इदानीमेवेदमतएकदेश्येवतन्मतम् ॥ तैदावरणभंगेऽपिदार्शि
तास्यैकदेशिता ॥ ८८ ॥ ननुसर्वमतान्येवंदूषयन्द्वेषकृद्भवान् ॥ इतिचेन्नविनोदोऽयंविदुषांतत्त्वनिर्णये ॥ ८९ ॥भक्ति
ज्ञानेयत्रविष्णोर्यत्रवेदःपराप्रमा ॥ मतानितानिसर्वाणिजीवोद्धारस्यहेतवः॥ ९० ॥सत्त्वादिभेदतोजीवाश्चित्रप्रकृतयोऽखि
लान् ॥ उद्धर्तुंप्रभुणानानासंप्रदायाःप्रकाशिताः॥ ९१ ॥ यथाऽधिकारंतेष्वेतेप्रवर्तंतेततःफलं ॥ ऐहिकामुष्मिकंमोक्षोवि
विधश्चयथायथं ॥ ९२ ॥ ब्रह्मण्यलौकिकेऽचिंत्येस्वाभिन्नानंतशक्तिनि॥तैद्रूपस्यव्यवस्थानमभेदाच्छ्रुतिषूदितम्॥ ९३ ॥
वितरतियत्स्वयमगुणंविविधेभ्यःकामनानाना॥ सगुणैःशिवादिरूपैस्तदंशिभूतंभजेपरंब्रह्म॥ ९४ ॥ ॥ इतिश्रीमद्व
ल्लभाचार्यमतवर्तिश्रीव्रजवल्लभचरणानुचरपंचनदिघनश्यामभट्टात्मजगोवर्द्धनशीघ्रकवेःकृतौवेदांतचिंतामणौविशिष्टाद्वै
तविचारोनामैकादशंप्रकरणं ॥ ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॐ ॥
लीलायैशिवशक्त्याद्याःकृतायेनविभूतयः ॥ नैर्गुण्यहेतुंभक्तानांनमामोनिर्गुणंपरं ॥ १ ॥ शैवारामानुजमततस्कराःसर्व २५

१अनौपचारिकः २ निषेधः ३ तत्तस्मात् अथवातस्ययःसर्वत्रेतिश्लोकस्यव्याख्यानभूते४ निर्णयनिमित्तं५ संप्रदायेषु ६ तदभिन्नस्यप्रपंचस्य
७ नीलकंठादयः

वाङ्मयम् ॥ योजयित्वाशिवपरंविशिष्टाद्वैतमैरयन् ॥ २ ॥ निर्गुणंस्यात्परंब्रह्मश्रुतेर्निर्गुणमुक्तिकृत् ॥ शंभोस्तमःप्रधानस्य
ब्रह्मत्वंनतंथोचितम् ॥ ३ ॥ निर्गुणःस्यात्परशिवोव्यूहादिस्थोगुणीतिचेत् ॥ नसूतसंहितादौवःसगुणःसोऽपिकथ्यते ॥ ४॥
उमार्द्धविग्रहःश्रीमान्सोमार्द्धकृतशेखरः ॥ ब्रह्मविष्णुमहेशानैरुपास्यःपरमेश्वरः ॥ ५ ॥ ऋतंसत्यंपरंब्रह्मपुरुषंसांबमी
श्वरं ॥ अष्टमेनवमेऽध्यायेतन्महोपक्रमात्स्फुटं ॥ ६ ॥ महेशानोपास्यलिंगाद्वाक्येपरशिवःस्फुटः ॥ साहित्यात्सर्वदाश
शक्तेःसगुणत्वंदृढीकृतं ॥ ७ ॥ शक्तेःपरस्वरूपेऽपितद्रहस्येनिरूपितम् ॥ सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापरमेश्वरी ॥ ८ ॥
( स्कंध १० ) शिवःशक्तियुतःशश्वत्त्रिलिंगोगुणसंवृतः ॥ वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिधा ॥ ९ ॥ ततोविकारा
अभवन्षोडशामीषुकंचन ॥ उपधावन्विभूतीनांसर्वासामश्नुतेफलं ॥ १० ॥ हरिर्हिनिर्गुणःसाक्षात्पुरुषःप्रकृतेःपरः ॥ स
सर्वदृगुपद्रष्टातंभजन्निर्गुणोभवेत् ॥ ११ ॥श्रीमद्भागवतेऽप्युक्तंसगुणत्वंशिवस्यतु ॥ वैष्णवानांयथाशंभुर्भक्तःपरशिवः
परम् ॥ १२ ॥ व्युहवर्तीतुसंहारशक्तिकार्येनिरूपितः ॥ तत्पाद्मब्रह्मवैवर्तपंचरात्रादिवाक्यतः ॥ अनेकैर्वेदभागैश्चमयाऽ
न्यत्रप्रपंचितं ॥ कृष्णएवपरंब्रह्मसदानंदस्तथाश्रुतिः ॥ १३ ॥ कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः ॥ तयोरैक्यंपरंब्र

---

१ ब्रह्ममीमांसाभाष्यशिवतत्त्वविवेकलिंगार्चनचंद्रिकादिषु २ श्रुतितः ३ चरमकोटिकं विभूतित्वेनतूचितमेवेतिभावः ४ अष्टमाध्यायस्थ
मिदं ५ नवमाध्यायस्थमिदं ६ तांत्रिकोयंरहस्यभागःसप्तशतीपाठोत्तरंपठ्यमानःप्रसिद्धः ७ त्रिगुणात्मकत्वमुक्तं ८ द्वादशस्कंधस्थोयंचरणः
९ तापनीयस्था

ह्यकृष्णइत्यभिधीयते ॥ १४ ॥ शिवादिरूपैःसगुणैःकामानूपूरयतिप्रभुः ॥ स्वयंतुनिर्गुणोदेवोभक्तानांनिर्गुणत्वकृत्॥१५॥
(स्कंध १०)उत्तरार्द्धे॥यस्यांघ्रिपङ्कजरजोऽखिललोकपालैर्मौल्युत्तमैर्धृतमुपासिततीर्थतीर्थम् ॥ ब्रह्माभवोऽहमपियस्यक
लाःकलायाःश्रीश्चोद्वहेनचिरमस्यनृपासनंक्व१६॥(स्कंध१०)पूर्वार्द्धे॥त्वामेवान्येशिवोक्तेनमार्गेणशिवरूपिणं॥श्रीमद्भाग
वतेऽस्येतिभगवद्रूपतामता ॥ १७ ॥ येऽप्यन्यदेवताभक्ताइतिगीतासुचोदितम् ॥ पाद्मेकार्तिकमाहात्म्येप्रथमाध्यायईर्य
ते ॥ १८ ॥ ( श्लो० २६ । २७ ) सौराःशैवाश्चगाणेशावैष्णवाःशक्तिपूजकाः॥मामेवप्राप्नुवंतीहवर्षाम्भःसागरंयथा ॥
॥ १९ ॥एकोहंपंचधाजातःक्रीडयानामभिःकिल॥ देवदत्तोयथाकश्चित्पुत्राद्याह्वाननामभिः ॥ २० ॥ इत्थंभगवताप्रो
क्ताशिवादीनांनिजांशता ॥ शिवादिरूपंशैवाद्याभजंतःप्राप्नुवंतितं ॥ २१ ॥ विष्णुःसत्वगुणोपाधिस्तद्भक्ताइहवैष्णवाः ॥
शं[3]भोरुपासनंचक्रेआसुरान्मोहयन्क्वचित् ॥ २२ ॥ उत्तरोत्तरसर्गार्थंतत्पाद्मेस्पष्टमुच्यते ॥ विष्णोर्नामसहस्रेतुशिवेनगि
रिजांप्रति ॥ २३ ॥ प्रोच्यतेपंचरात्रेचयत्स्वस्मैहरिणोदितं ॥ त्वामाराध्यतथाशंभोग्रहीष्यामिवरंसदा ॥ २४ ॥ स्वागमैः
कल्पितैस्त्वंचजनान्मद्विमुखान्कुरु ॥ मांचगोपययेनस्यात्सृष्टिरेषोत्तरोत्तरा ॥ २५ ॥ खंडितःपंडितकरभिदिपालेप्रह

---

१ भगवंतं २ सौराःशैवाइतिपाद्मवाक्येपंचायतनोपासकनिरूपणेनसाहचर्यात्सगुणोपासकाएववैष्णवाबोध्यानतुपुरुषोत्तमोपासकाः ३ ननु
रामाद्यवतारेषुभगवताशिवभक्तिकरणात्सेव्यसेवकभावविपर्ययएवकुतोनेत्याशंक्याह शंभोरिति ४ भगवान्कृतवान् ५ पाद्मेशिवेनपार्वतींप्रति
विष्णुनामसहस्रमुक्तंतदेवाक्षरशोनारदपंचरात्रेप्युपलभ्यते तत्रोभयत्रेदंभगवदनुवादरूपंशिववचनमस्ति ६ शैवादिशास्त्रैः

स्तत: ॥ भाष्यप्रकाशेतद्वादोविस्तरात्पुरुषोत्तमैः॥२६ ॥ शाक्ताजगदुपदानंजल्पंत्यल्पश्रुताहरिम् ॥ कल्पयंतिनिमित्तंच
शक्तितांपरत:पराम् ॥ २७ ॥ देवीसूक्तादिनाश्रुत्यामार्कंडेयादिषूदितं ॥ विशेषतश्चतंत्रेषुतत्स्वरूपंनिरूप्यते ॥ २८ ॥ तां
परांकारणंप्राहसप्तशत्यांस्तुवन्विधिः ॥ परापराणांपरमात्वमेवपरमेश्वरी॥ २९ ॥त्वयैतद्धार्यतेविश्वंत्वयैतत्सृज्यतेजगत्॥
त्वयैतत्पाल्यतेदेवित्वमत्स्यंतेचसर्वदा ॥ ३० ॥ इतिचेच्छ्रूयतांमूढशक्तयोब्रह्मणस्तुयाः ॥ तदभिन्नाश्चतद्रूपाःश्रुत्यौपूर्वंनि
रूपितं ॥ ३१ ॥ गुणात्मकमचिद्रूपंप्रकृतिःसृष्टिकालिकं ॥ शक्तिप्रकृत्योर्दुर्गातुविभूतिःकार्यमिष्यते॥ ३२ ॥ रत्यैबिभि
त्सुनासर्वास्तिरोभाव्यापितेनेतां: ॥ तेदंशाःस्वविभूतिभ्योदत्ता:केचनकेचन ॥ ३३ ॥ आदायामरशक्तीनामंशान्सौ
निर्मितापुरा ॥ महिषासुरनाशायेत्यस्यास्तच्छक्तिकार्यता ॥ ३४ ॥ मुख्यत्वेनगुणाश्चांशास्त्रिगुणोपाधिधारिणाम् ॥
त्रयाणामागतातंत्रेत्यस्याःप्रकृतिकार्य्यता ॥ ३५ ॥ कार्य्याणिकार्य्यरूपायांशक्तीनांप्रकृतेरपि ॥ ततोऽस्यामुपचर्यं
तेमाहात्म्यख्यातयेक्कचित् ॥ ३६ ॥ उक्तंद्वितीयेऽध्यायेतत्सप्तशत्याःसमौहितः ॥ प्रथमाध्यायवृत्तान्तस्तट्टीकायांम
यापुनः ॥ ३७ ॥ देवीसूक्तेस्वमाहात्म्यंदेव्यैवोक्तांततोमम ॥ योनिरप्स्वंतःसमुद्रइत्युक्ताहरिकार्य्यता ॥ ३८ ॥

---

१ तांशक्तिंचपरात्परांकल्पयंतीतिपृथग्वाक्यं २ पुराणभागेषु ३ शक्तिस्वरूपं ४ परास्यशक्तिरित्यादिरूपया ५ इतीतिशेषः ६ सत्वादिरूपं
७ रमणार्थमात्मानंभेत्तुमिच्छता नानारूपंचिकीर्षतेतियावत् ८ कार्येषु ९ ब्रह्मणा १० सर्वाःस्वालौकिकशक्तीः ११ स्वशक्त्यंशाः १२दुर्गा १३ ब्रह्म
विष्णुमहेश्वराणां १४ देव्यां १५ इदमुत्तरान्वयि१६ऋग्वेदप्रसिद्धे १७ ब्रह्मरुद्रोत्पादकत्वादिरूपं १८ इदंकर्तृपदंउक्तेत्यनेनान्वेति १९ अहमेवस्वय
मिदंवदामिजुष्टंदेवेभिरुतमानुषेभिरित्यादिनोक्ता

तस्मात्त्याज्यतयानैवघटतेऽस्यानिमित्तता ॥ शक्तिमत्पारतंत्र्यंचशक्तित्वाद्बहुधोदितं ॥ ३९ ॥ तन्नात्रविस्मयःकार्य्यो
योगनिद्राजगत्पतेः ॥ महामायाहरेश्चैषातयासंमोह्यतेजगत् ॥ ४० ॥ इत्युक्तंप्रथमाध्यायेतथानारायणीस्तवे ॥ या
२७ देवीसर्वभूतेषुविष्णुमायेतिकथ्यते ॥ ४१ ॥ परत्वंतत्रशक्तित्वाभिप्रायेणनिरूपितं ॥ त्वयेतिकरणं[१]यं[२]शक्तेर्नौकर्त्तृतो
चिता ॥ ४२ ॥ विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने ॥ तथासंहृतिरूपांतजगतोऽस्यजगन्मये ॥ ४३ ॥जगन्मयेभगव
तित्रिधाशक्तिस्तुयास्थिता ॥ तद्रूपात्वमितिस्तुत्यात्वयेतिकरणंध्रुवम् ॥ ४४ ॥ समवायिनिमित्तंचब्रह्मैवश्रुतिसंमतं ॥ वि
भूतीनांचमाहात्म्यंब्रह्ममाहात्म्यबोधकं ॥ ४५ ॥ राज्ञःस्तुतावमात्यादिप्रशंसापर्य्यवस्यति ॥ स्तुतःक्वचित्पुराणेषुतत्तद्रूप
स्ततोहरिः ॥ ४६ ॥ आकाशात्पतितंतोयंयथागच्छतिसागरं ॥ सर्वदेवनमस्कारःकेशवंप्रतिगच्छति ॥ ४७ ॥ येयथामां
प्रपद्यंतेतांस्तथैवभजाम्यहं ॥ इत्यादौफलदःपूज्यस्तत्तदंशीसएवहि ॥ ४८॥ पूर्वोक्तपाद्मवाक्ये[३]ऽपिस्फुटाभगवदंशता ॥
तंत्रशास्त्राण्ययुक्तानिमोहनायकृतानियत् ॥ ४९ ॥ अतस्तदनुसारेणमद्यंमांसंचमैथुनम् ॥ मन्वानाउत्तमंकौलाऽऽयायां
तियमयातनाः ॥ ५० ॥ तच्छाक्तकिरणेतंत्रकिरणेऽन्यत्रदुर्मतं ॥ दुर्गापाठविवृत्यादौविस्तराद्दूषितंमया ॥ ५१ ॥ तस्मा
त्तदद्वयंब्रह्मलीलायैभावितद्वयं ॥ विमोहशास्त्रसंभ्रांतैरशक्यंज्ञातुमासुरैः ॥ ५२ ॥ दैवाभजंतुतत्त्वाचार्य्योक्तभक्त्यापरा २७
त्परम् ॥ सदानंदंवेदरीत्यानभ्रमंतुचमोहकैः ॥ ५३ ॥ रूपे[४]ऽक्षरे[५]पदे[६]योऽध्यात्मेक्रीडतिसदास्वरूपेण ॥ अधिभूतक्षरकर्त्तापुरु

---

१ त्वयैतद्धार्यतइतिवाक्ये २ समम्यंतमिदं ३ सौराःशैवाइतिवाक्ये ४ स्वरूपभूते ५ अक्षराख्ये ६ स्वधाम्नि

षोत्तममाधिदैविकंवंदे ॥ ५४ ॥ ॥ इतिश्रीवेदांतचिंतामणौशैवशाक्तमतविचारोनामद्वादशंप्रकरणं ॥ १२ ॥ ७ ॥

वल्लवीवल्लभोनानाधामन्यक्षरनामनि ॥ कलयँल्ललितालीलाःसदासस्तादनुग्रही॥ १ ॥ अधिदैवादिभेदेनब्रह्मणोऽस्तित्रिरूपता ॥ क्षरोऽक्षरइतिद्वेधातथाद्यःपुरुषोत्तमः ॥ २ ॥ पूर्णानंदमयाकारःसर्वाकारानुभावनः ॥ सच्चिदानंदरूपोऽसत्पदार्थास्पृष्टविग्रहः ॥ ३ ॥ अलौकिकीभिःस्वाभिन्नाभिर्नित्यानंतशक्तिभिः ॥ स्वाभाविकीभिरपराहतकार्य्याभिराश्रितः ॥ ॥ ४ ॥ विरुद्धसर्वधर्माणामेकाधारोऽविरोधतः ॥ अप्राकृताखिलगुणोनिर्गुणोऽविकृतोविभुः ॥ ५ ॥ नित्यःपूर्णोऽव्ययोव्यापकएकएकरसःसदा ॥ ज्ञेयःकृष्णःपरंब्रह्मप्रमासुपुरुषोत्तमः ॥ ६ ॥ अन्यत्तँस्याक्षरंरूपंसच्चिदानंदमात्रकं ॥ तद्रूपंगणितानंदंपूर्णानंदोहरिःस्वयं ॥ ७ ॥ सैषानंदस्यमीमांसाभवतीत्यादिनाश्रुतौ ॥ विध्योनंदाच्छतगुणोऽक्षरानंदोहिगण्यते ॥ ॥ ८ ॥ आनंदमात्रकरपादमुखोदरताहरेः[12] ॥ तदानंदमयोऽभ्यासादितिसूत्रेसमर्थितम् ॥ ९ ॥ अन्येतुभगवद्धर्माःसर्वेतत्र[14] हरीच्छया ॥ आविर्भावतिरोभावशालिनःक्रीडनास्पदे ॥ १०॥ व्याप्तोऽक्षरःस्वयंव्याप्तोव्याप्तिर्दुग्धांबुवद्द्वयोः ॥ उभेअ

---

१ गोपीप्रियः २ विविधाः इदंलीलाविशेषणं ३ सदेतिपृथक्पदं दाससहितइतिवा अस्मिन्पक्षेएतत्तदोःसुलोपइत्यस्याप्रवृत्तावपिखर्परेशरिवाविसर्गलोपोवक्तव्यइतितल्लोपः ४ पूर्णत्वंअक्षरवद्गणनाशून्यत्वमानंदे ५ सत्वादिगुणत्रयरहितः ६ वेदादिप्रमाणेषु ७ पुरुषोत्तमस्य ८ अक्षराख्यं ९ शारीरादिसर्वसुखोपेतचक्रवर्त्यानंदापेक्षयासहस्रगुणितपरार्द्धगुणानंदं१० श्रुतौब्रह्मवल्ल्यां ११ प्रजापत्यानंदात् १२ पुरुषोत्तमस्य१३यतोवाचइतिश्लोके वाङ्मनसनिवृत्तिकथनात्परानंदेवाग्विषयगणनाराहित्यमित्यादि १४ अक्षरे

पियथैकस्मिन्कलशेव्याप्यतिष्ठतः ॥ ११ ॥ यथेक्षुरसयोःसर्पिर्दध्नोश्च तिलतैलयोः ॥ अलोकोव्यापिवैकुंठः[3]क्वचिद्गोलो
कइत्यपि ॥ १२ ॥ [4]तदेवपरंमव्योमपरंधामपरंपदं ॥ अक्षरंबृहदव्यक्तंपर्य्यायैःपरिकीर्त्यते ॥ १३ ॥ परमात्मापरंब्रह्मेत्या
दिभिःपुरुषोत्तमः ॥ बहुस्फुटीकृतंवेदादौतद्रूपंतथास्मृतिः ॥ १४ ॥ अव्यक्तोक्षरइत्युक्तस्तमाहुःपरमांगतिं ॥ यद्गत्वाननि
वर्त्तंतेतद्धामपरमंमम ॥ १५ ॥ पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया ॥इत्युक्तोभक्त्येकलभ्योऽयेपरःपुरुषोत्तमः॥ १६॥
तदास्थायनिजंधामेच्छानुरूपविधायकं ॥ लीलानित्याःस्वयंशुद्धाअनिरुद्धाददधातिसैः ॥ १७ ॥ अनागंतुकधर्म्मत्वात्त
ल्लीलास्वखिलास्वपि ॥ नशुद्धाद्वैतबाधःस्यादभेदाद्धर्मधर्मिणोः ॥ १८ ॥ ननुचेदक्षरंनित्यंनित्यश्चपुरुषोत्तमः ॥ भेदः
स्याद्वास्तवोद्वैतंनचेन्न्यूनोऽक्षरःकथं ॥ १९ ॥ इतिचेन्नहरिर्यत्र[13]प्रियमोदःप्रमोदवान् ॥ आनंदात्मापक्षिरूपस्तैत्तिरीयेषुप
[14]ठ्यते ॥ २० ॥ ब्रह्मपुच्छंप्रतिष्ठेतिपुच्छंतत्राक्षरंश्रुतं ॥ नपुच्छंपक्षितोभिन्नंनाक्षरंपुरुषोत्तमात् ॥ २१ ॥ सर्वावयववान्प
क्षीस्वतंत्रःपुच्छतोधिकः ॥ पुच्छंत्ववयवत्वेनन्यूनंभेदोनवस्तुतः ॥ २२ ॥ अल्पधर्मकमेकांशभूतंन्यूनंतथाक्षरं ॥ सर्वध

---

१ अत्रतिलेषुतैलंदधनीवसर्पिरित्यादिश्रुत्यनुग्रहोपिद्रष्टव्यः २ पश्यतांसर्वलोकानामलोकंसमपद्यतेतिभागवतादौ ३ बृहद्वामनपचंरात्रादिषु
४ अक्षरब्रह्मैव ५ तदक्षरेपरमेव्योमन् ऋचोअक्षरेपरमेव्योमन्प्रतिष्ठिताइत्यादिश्रुतिषु ६ अव्यक्तोक्षरइत्युक्तइतिगीतादौ ७ तयोरैक्यंपरंब्रह्म उत्तम
पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ब्रह्मेतिपरमात्मेत्यादिश्रुतिस्मृतिपुराणेषु ८ पर्यायैः ९ मुंडकाद्युपनिषत्सु १० गीतावाक्यं ११ अक्षरं १२ पुरुषो-
त्तमः १३ ब्रह्मवल्ल्यां १४ अन्योंतरआत्मानंदमयः तस्यप्रियमेवशिरइत्यादिना

र्माश्रयः सोऽस्मादंशभूतोऽधिकः श्रुतः ॥ २३ ॥ नभेदोभमवत्सच्चिदानंदात्माऽक्षरोऽपियत् ॥ पुच्छंपक्षिपदार्थान्नविभक्त
मिहतत्तथा ॥ २४ ॥ अतोऽक्षरस्यचरणत्वमपिक्वंचिदुच्यते ॥ प्रतिष्ठेतिपदात्तस्यप्रोक्तैवोत्तमधामता ॥ २५ ॥ स्वाभिन्न
एकांशभूतेसच्चिदानंदधामनि॥आत्मतंत्रःसर्वधर्मासर्वदारमतेविभुः ॥ २६ ॥ भागवते(स्कंध २ )नमोनमस्तेस्त्वृषभायसा
त्वतांविदूरकाष्ठायमुहुःकुयोगिनाम् ॥ निरस्तसाम्यातिशयेनराधसास्वधामनिब्रह्मणिरंस्यतेनमः ॥ २७ ॥ यदाबहीरिरं
सुःस्यात्स्वरूपादक्षरात्मकात् ॥ तिरोभावेनधर्माणांप्रपंचंसृजतिक्षरम् ॥ २८ ॥ नन्वक्षरमुपादानंनिमित्तंपुरुषोत्तमः॥
तदाऽभिन्ननिमित्तोपादानवादःकथंभवेत् ॥ २९ ॥ एवंचेच्छृणुचेद्धेमकुटात्तात्पिंडउद्धृतः ॥ सृज्यतेकटकाद्यस्मान्नकूटः
समवायिकिं ॥ ३० ॥ ऊर्णनाभिःसृजञ्जालंलालयास्वांशभूतया ॥ लीलयाऽश्नन्नाकिंतस्योपादानंसंभविष्यति॥ ३१ ॥
उपक्रम्याक्षरंब्रह्ममुंडकेष्वाद्यमुंडके ॥ यद्भूतयोनिंपरिपश्यंतिधीराइतीर्यते ॥ ३२ ॥ तथाक्षरात्संभवतीहविश्वमितिचोच्य
ते ॥ तथाक्षराद्विविधाःसोम्यभावाःप्रजायंतेतत्रचैवापियंति ॥ ३३ ॥ द्वितीयमुंडकेप्युक्तंतस्मात्सर्वंपरात्मकं ॥ अतः
पुरुषएवेदंविश्वंतत्रैवपठ्यते ॥ ३४ ॥ तदाहुरक्षरंब्रह्मसर्वकारणकारणं ॥ विष्णोर्धामपरंसाक्षात्पुरुषस्यमहात्मनः ॥३५॥

---

१ त्वदोपगुह्यार्हपदंपदेपदेइतिभागवतादौ २ सुवर्णपिंडात् ३ सुवर्णराशिस्तत्कटकादेःसमवायिकारणंभवत्येव अतएवसमवायीतिक्लीबमयोगः ४ जालस्य एवंचोर्णनाभिवत्परः लालावदक्षरं जालवत्प्रपंचः ५ अक्षरस्यपुरुषोत्तमाभिन्नत्वेनजगतिपुरुषोत्तमोपादानकत्वानपगमात् ६ द्विती यमुंडकप्रथमखंडसमाप्तौ ७ सर्वस्यजगतःकारणानांपंचमहाभूतादीनां

 तृतीयस्कंधएकादशाध्यायइतिकारणं ॥ तदेवजगतोधामास्येचोक्तंहरिणातथा ॥ ३६ ॥ अव्यक्तादीनिभूतानिव्यक्तम 
ध्यानिभारत ॥ अव्यक्तनिधनान्येवतत्रकापरिदेवना॥ ३७॥ अव्यक्ताद्यक्तयःसर्वाःप्रभवंत्यहरागमे ॥ रात्र्यागमेप्रलीयं
तेतत्रैवाव्यक्तसंज्ञके ॥ ३८ ॥ तस्माद्विश्वंक्षरमिदमाविर्भावितमक्षरात् ॥ क्षरणंतुतिरोभावःक्षरत्यंतेततःक्षरं ॥ ३९ ॥ न
 धाम्नोस्तितिरोभावःकदाचिदितिसोऽक्षरः ॥ एतावतीतःपुरुषोत्तमोगीतासुरूपितः ॥ ४० ॥ द्वाविमौपुरुषौलोकेक्षरश्चाक्ष
रएवच ॥ क्षरःसर्वाणिभूतानिकूटस्थोऽक्षरउच्यते ॥ ४१ ॥ उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः ॥ योलोकत्रयमावि
श्यबिभर्त्यव्ययईश्वरः ॥४२॥ यस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः ॥ अतोऽस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः ॥ ४३॥
क्षराक्षरौतुपुरुषौताभ्यामेषयदुत्तमः ॥ लोकेवेदेक्रमात्तस्मात्पुरुषोत्तमउच्यते॥ ४४ ॥( अ० ४ श्लो० १८ ) नतस्यका
लावयवैःपरिणामादयोगुणाः ॥ अनाद्यनंतमव्यक्तंनित्यंकारणमव्ययं ॥ ४५ ॥ नयत्रवाचोनमनोनसत्त्वंतमोरजोवाम
हदादयोऽमी ॥ नप्राणबुद्धींद्रियदेवतावानसन्निवेशःखलुलोककल्पः ॥४६ ॥ नस्वप्नजाग्रन्नचतत्सुषुप्तंनखंजलंभूरनिलो
ऽग्निरर्कः ॥ संसुप्तवच्छून्यवदप्रतर्क्यंतन्मूलभूतंपदमामनंति ॥ ४७ ॥ इतिभागवतेस्कन्धेद्वादशेवर्ण्यतेऽक्षरम् ॥ तदेवपरमं
धामगीतासुबहुरूपितम् ॥ ४८ ॥ यदक्षरंवेदविदोवदन्तिविशंतियद्यतयोवीतरागाः ॥ यदिच्छन्तोब्रह्मचर्यंचरन्तितत्तेपदं 

---

१ कारणमित्यनेनान्वेति २ परस्य ३ अव्यक्तोक्षरइत्युक्तइतिवाक्यादक्षरः ४ लये ५ क्षरणवत्त्वाद्धेतोः ६ ऐच्छिकभेदवान् ७ क्षराती
तत्वेनलोकेपातंजलादिदर्शनेप्रथितः अक्षरवदुत्तमत्वेनतुवेदे

संग्रहेणप्रवक्ष्ये ॥ ४९ ॥ इत्यादिनाऽऽह प्रणवाभिधेयंस्वपदंहरिः ॥ यदक्षरंतद्दैवतत्कठवल्लीषुपठ्यते ॥ ५० ॥ सर्वेवेदायत्पदमामनन्तितपांसिसर्वाणिचयद्वदन्ति ॥ यदिच्छन्तोब्रह्मचर्यंचरन्तितत्तेपदंसंग्रहेणब्रवीम्योमित्येतत् ॥ ५१ ॥एतंध्येवाक्षरंब्रह्मएतदेवाक्षरंपरम् ॥ एतध्येवाक्षरंज्ञात्वायोयदिच्छतितस्यतत् ॥ ५२ ॥ एतदालम्बनंश्रेष्ठमेतदालम्बनंपरम् ॥ एतदालम्बनंज्ञात्वाब्रह्मलोकेमहीयते ॥ ५३॥ इतिवल्ल्यांद्वितीयस्यांतृतीयस्यांचभण्यते ॥ यःसेतुरीजानानानामक्षरंब्रह्मयत्परम् ॥ ५४ ॥ इत्यक्षरंनिरूप्यास्यप्राप्यप्राप्योश्वकारणे ॥ सोऽध्वनःपारमाप्नोतितद्विष्णोःपरमंपदम् ॥ ५५ ॥ इत्यन्तेनोदितेतस्मादुत्तमोऽपेपरःश्रुतः ॥ महतःपरमव्यक्तमव्यक्तात्पुरुषःपरः॥ ५६ ॥ पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिः ॥ इतिश्रुत्युदितोदेवोगीतासुबहुवर्णितः ॥ ५७ ॥ पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया ॥ मुंडकोपनिषद्युक्ताऽक्षरंप्रोक्तःपरःपुमान् ॥ ५८॥ दिव्योह्यमूर्त्तःपुरुषःसबाह्याभ्यन्तरोह्यजः ॥ अप्राणोह्यमनाःशुभ्रोह्यक्षरात्परतःपरः॥ ५९ ॥ इत्यादिनाविविच्योक्तौस्पष्टंतत्रैपराक्षरौ ॥ एकस्यैवैच्छिकाद्भेदाच्छुद्धाद्वैतंचदर्शितं ॥ ६० ॥ पराक्षरविवेकोयंकार्यादेस्तारतम्य

---

१ पदंपदनीयंप्राप्यं २ यत्प्राप्यर्थानीतिभाष्याशयः ३ तुभ्यंनचिकेतसे ४ भगवद्धाम ५ भगवद्धाम्नःप्रणववाच्यत्वंभागवतद्वादशस्कंधेपिप्रसिद्धं स्वधाम्नोब्रह्मणःसाक्षाद्वाचकःपरमात्मनइति ६ ओंकारवाच्यं ७ क्षरजगदपेक्षयापरं ८ भगवन्निलयः ९ब्रह्माभिज्ञजनेषु यद्वा ब्रह्माख्येलोके परब्रह्मणोवालोके १० विज्ञानाविज्ञानादिरूपे ११ कथिते १२ अक्षरात् १३ वेदांतेष्वक्षरशब्दस्यप्रधानपरत्वनिरासस्तु ( अ० १ पा० ३ सू० १०) अक्षरमंबरांतधृतेरित्यधिकरणएवकृतः १४ क्षरात्परंयदक्षरंतस्मादपिपरः १५ मुंडके

तः ॥ कठमुंडकमांडूक्यबृहदारण्यकादिषु ॥ ६१॥ छांदोग्यकौषीतकीशावास्यतित्तिरिषुस्फुटः ॥आम्नायतेतैत्तिरीयप्रश्ने 
नारायणाभिधे ॥ ६२ ॥ सब्रह्मसशिवःसहरिःसेंद्रःसोक्षरःपरमःस्वराट् ॥ गीतायां ( अ० १०श्लो० १२) परंब्रह्मपरंधा
मपवित्रंपरमंभवान् ॥ पुरुषं[3]शाश्वतंदिव्यमादिदेवमजंविभुं ॥ ६३ ॥ आहुस्त्वामृषयःसर्वेदेवर्षिर्नारदस्तथा ( अ ० ११
३० श्लो० १८) त्वम[4]क्षरंपरमंवेदितव्यंत्वमस्यविश्वस्यपरंनिधानं ॥त्वमव्ययःशाश्वतधर्मगोप्तासनातनस्त्वंपुरुषोमतोमे॥६४॥
तथा ( श्लो० ३७ ) त्वमक्षरंसदसत्तत्परंयत्॥एवंवेदैरभेदोऽ[5]स्यशुद्धःकृष्णेनकथ्यते॥स[6]एवाक्षरसंज्ञोऽतएकांशेप्र[7]तिपादितः
॥ ६५ ॥ तस्मादेकोहमित्यादिनैवकिंचनबाध्यते ॥ बहुत्वंतुतिरोभावादिष्टंनासीत्पुराहितत् ॥ ६६ ॥ तत्राधिदैविकंरूपं
सदानंदःपरःपुमान् ॥ अध्यात्ममक्षरंधामप्रपंचस्त्वाधिभौतिकं ॥ ६७ ॥ रूपत्रयविवेकायदृष्टांतःसरितोदिवः ॥ श्रीम
द्धुताशनाचार्यैर्मुक्तावल्यांनिदर्शितः ॥ ६८ ॥ प्र[13]थमंवारिसामान्यंतथातीर्थात्मकं[14]परं ॥ देव्याख्यंचतृ[15]तीयंस्यादधिभूता
दितक्रमात् ॥ ६९ ॥ वृष्ट्यातपेषुयद्वृद्धिक्षययुक्चोपयुज्यते ॥ व्यवहारेषुसर्वेषु[16]तद्भौतिकंजलंमतं ॥ ७० ॥ यच्चमाहा

१ पुरुषोत्तमः २ अक्षरंचभवानेव ३ पुरुषोत्तमं ४ सदसत्क्षरंतथाअक्षरंततःपरश्चत्वमेव ५ अक्षरस्यपुरुषोत्तमेनसहाभेदः ६ पुरुषोत्तमः ७ वि
ष्णुपुराणादौ ८ चिदानंदादितिरोभावहेतुकंबहुत्वं ९ तेषुक्षराक्षरपुरुषोत्तमेषुमध्ये १० कृष्णशब्दार्थवक्तृद्वयोरुक्तिः वस्तुतस्तुपूर्णसच्चिदानंदः ११ रू ३०
पविशेषणत्वात्क्लीबत्वं १२ गंगायाः १३ आधिभौतिकं १४ आध्यात्मिकं १५ आधिदैविकं १६ सर्वपदादनिष्टेष्वपि १७ प्रावृड्ग्रीष्मयोःमाहा
त्म्यवृद्धिक्षयप्रयोजकत्वाप्रसिद्धेःतीर्थस्यामेध्यसंसर्गासंभवाच्चेतिभावः

त्म्यसंयुक्तस्नानस्पर्शादिकर्मसु॥ यद्विहारास्पदंदेव्यास्तद्रूपंच निरूप्यते ॥ ७१ ॥ यात्रिकैःपूज्यतेदेव्यभेदबुत्ध्याफलेप्सुभिः ॥ माद्यर्यादिकन विधिनायत्तेभ्योभोगमोक्षदम् ॥ ७२ ॥ रूपंतीर्थात्मकंतस्यास्तदाध्यात्मिकमुच्यते ॥ तत्रैस्थितामूर्त्तिमतीदेवीस्यादाधिदैविकी॥ ७३॥ सितमकरनिषण्णांशुभ्रवर्णांत्रिनेत्रांकलशजलजहस्तांमौक्तिकैर्भूषितांगीं॥ अभयवरदपाणिसेंदुकोटीरजूटांवसितसितदुकूलांजान्हवींतांनमामि। ७४॥शरच्चंद्रश्वेतांशशिशकलश्वेतालमुकुटांकरैःकुंभांभोजेवरभयनिरासौचदधतीं ॥ सुधाधाराकाराभरणवसनांशुभ्रमकरस्थितांत्वांयेध्यायंत्युदयतिनतेषांपरिभवः ॥ ७५ ॥ इत्याद्युक्तस्वरूपायाश्चिद्व्यक्त्यैवदृश्यते ॥ सुलभानाखिलानांसेतिफलंतीर्थरूपतः ॥ ७६ ॥ आविर्भावीतिरोभावीशोकमोहादिदूषितः ॥ षड्भाववान्प्रपंचस्तुरूपंस्यादाधिभौतिकं ॥ ७७ ॥ योगीतबहुमाहात्म्यःसकामैर्मोक्षकामुकैः ॥ सेव्यमानश्चफलदोधामाध्यात्मिकमक्षरः ॥ ७८ ॥ पुरुषोत्तमआनंदाकारःस्यादाधिदैविकः ॥ भक्तिमात्रेणलभ्यःसभोगमोक्षौततोऽक्षरात् ॥ ७९ ॥ श्रद्धालुःसलिलंतीर्थंपश्यन्कल्याणवान्भवेत् ॥ तथाऽक्षरात्मकंपश्यन्विश्वंज्ञानीविमुच्यते ॥ ८० ॥ ( स्कंध १२ अ० ६ श्लो० ३२ )परंपदंवैष्णवमामनंतितद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः ॥ विसृज्यदौरात्म्य

---

१ देवीरूपं २ लोकशास्त्राभ्यां ३ निरतिशयप्रेमशून्येन तीर्थांगपूजाप्रकारेण ४ तीर्थजले ५ गंगालहरीश्लोकोऽयं ६ प्रवाहादौ ७ भक्त्याऽभ्यस्त्वनन्ययेत्यादिवाक्यैः ८ अततीत्यतदस्थिरंसंसारादिकं अथवातद्ब्रह्मततोऽन्यदतत्

मनन्यसौत्द्दास्द्दोपगुह्यावसितंसमाहितः ॥ ८१॥ इतिभागवतेविष्णुपुराणेप्रथमांशके ॥ अक्षरात्मकमेतद्धीत्युक्तमन्य
त्रचस्फुटं ॥ ८२ ॥अधिभूतादिभावोयमित्थंगीतासुरूप्यते ॥(अ०८श्लो०३)अक्षरंब्रह्मपरमंस्वभावोध्यात्ममुच्यते॥८३
भूतभावोद्भवकरोविसर्गःकर्मसंज्ञितः ॥ अधिभूतंक्षरोभावःपुरुषश्चाधिदैवतं ॥ ८४॥ योनिर्गुणोपिनिर्गुणधामापिजगत्स
सर्जसगुणमिदं॥बृहदात्मैक्यादगुणानूकुर्वाणोविजयतेवरणसुलभः ॥ ८५ ॥ इतिश्रीवेदांतचिंतामणौक्षराक्षरपुरुषोत्त
मविवेकोनामत्रयोदशंप्रकरणं ॥ १३ ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नमोस्तुज्ञान्यऽलभ्यायभक्त्येकसुलभाययः ॥ प्रकृतिपुरुषंकृत्वानिर्मातिसगुणंजगत् ॥ १ ॥ सत्वंरजस्तमइतित्रिभिर्व्या
प्तंजगद्गुणैः ॥ जीवाश्चत्रिविधादेवास्त्रयस्तत्तन्नियामकाः ॥ २ ॥ ननुस्यान्निर्गुणंब्रह्मस्वयंधामात्मकंतथा ॥ ब्रह्माभिन्नोब्र
ह्मकार्यःप्रपंचःसगुणःकुतः ॥ ३॥ अत्रोच्यतेगुणामायाकार्याव्यामोहिकाहिसा ॥ जीवानांतादृशीर्वृत्तीरात्मकार्य्यैःकरो

१ नास्त्यन्यस्मिन्अनन्यंवा सौत्द्दंभक्तिर्येषांते २ योवेदनिहितंगुहायामितिश्रुत्यातुल्यार्थमिदं द्वितीयस्कंधेतु ( अ०२ श्लो० १८ ) त्द्दो
पगुह्यार्हपदंपदेपदेइतिपाठः अर्हस्यहरेःपदंचरणं ३ निश्चितं यद्वा अवबद्धं आत्मतयागृहीतं ४ विष्णुपुराणस्थोयंचरणः तदेतदक्षरंनित्यंजगन्मु
निवराखिलमितिपाठश्चश्रीधरस्वामिविष्णुचित्त्यादिभिर्व्याख्यातः ५ अक्षरब्रह्मणासहजीवस्यैक्यसंपादनात् ६ भगवत्कर्तृकोजीवस्यस्वीयतयां
गीकारोवरणं अनेकलभ्यत्वं साधनांतराऽलभ्यत्वोक्तिपूर्वकं यमेवैषवृणुतेतेनलभ्यइतिश्रावणात् ७ अविज्ञातंविजानतां क्लिश्यंतियेकेवलबोधलब्ध
यइत्यादिश्रुतिपुराणवाक्यैर्भक्तिरहितशुष्कज्ञानिभिःपुरुषोत्तमोनलभ्यःतेषामक्षरेलयात् ८ भक्त्याहमेकयाग्राह्यइत्यादिवाक्यैः ९ ब्रह्मविष्णुशिवाः

तितैः ॥ ४ ॥ मायायांतेविलीयंतेकार्यत्वात्प्रलयेगुणाः ॥ शांताविरतकार्यत्वात्सुप्तवत्तत्रतिष्ठंति ॥ ५ ॥ सर्गमिच्छति चेद्देवःपुरुषंकुरुतेऽक्षरात् ॥ चिद्रूपंतस्यचिद्रूपांजडांचप्रकृतिंपुनः ॥ ६ ॥ ( स्कं० ११ अ० २४ श्लो० २ ) आसीज्ज्ञानमथोह्यर्थएकमेवाविकल्पितं ॥ यदाविवेकनिपुणाआदौकृतयुगेयुगे ॥ ७॥ तन्मायाफलरूपेणकेवलंनिर्विकल्पितं॥वाङ्मनोगोचरातीतंद्विधासमभवद्बृहत् ॥ ८ ॥ तयोरेकतरोह्यर्थःप्रकृतिःसोभयात्मिका ॥ ज्ञानंत्वन्यतमोभावःपुरुषःसोभिधीयते ॥ ९ ॥ इतिभागवतेप्राहतेदेवभगवान्स्वयं ॥ तिरोहितचिदानंदासदंशात्प्रकृतिर्जडा ॥ १० ॥ सत्वंरजस्तमइतिप्रकृतेर्नात्मनोगुणाः ॥ प्रकृतिर्गुणसाम्यंस्यादितिभागवतोक्तितः॥ ११ ॥ समप्राणांसमानानांत्रिगुणानामबाधतः ॥ ऐक्यंतच्छक्तिमायात्माजडाप्रकृतिरुच्यते ॥ १२ ॥ प्रकृतिर्ह्यस्योपादानमाधारःपुरुषःपरः ॥ सतोभिव्यंजकःकालोब्रह्मतंत्रितयंत्वहं ॥ १३ ॥ तद्द्वाराविष्कृतंभूतादिकंतत्सगुणंमतं ॥ ततोमहदहंतस्मादितिसांख्येक्रमःस्मृतः ॥ १४ ॥ प्रकृत्यानिर्मित

---

१ गुणैः २ ब्रह्मणि ३ माया ४ द्रष्टा ५ अथोशब्दःकात्स्न्र्ये सर्वोप्यर्थोद्रष्टृद्वितीयब्रह्मलीनस्तदभिन्नएवासीत् ६ कदैवमितिचेत्तत्रकालत्रयमाह यदेति अयुगे युगाभाववतिसृष्टिप्राक्काले तथासृष्ट्यारंभकृतयुगे इदानीमपिब्रह्माभेदविवेकेसतिच ७ उभयविषयानतीतं गोचरंसत्यमितिपाठेतुतद्गोचरंयथाभवतितथा ८ अक्षरं ९ सदंशरूपः १० कार्यकारणरूपा ११ चिद्रूपः १२ भागवतस्थंभागवतवचनमेतत् १३ ब्रह्मरूपतयानित्यस्यैवजगतआविर्भावहेतुःसृष्टिकालः १४ वस्तुतःप्रकृतिपुरुषकालानामपिब्रह्मांशत्वात्सर्वंभगवानेव १५ प्रकृतिद्वारा १६ आकाशादि १७ प्रकृतितोमहत्तत्त्वंततस्त्रिविधोहंकारः १८ नतुश्रुतिसंमतः ( अ० २ पा० १ सू० २ ) इतरेषांचानुपलब्धेरित्यादौतन्निषेधात्

 त्वेनप्राकृतत्वाद्गुणान्वयात् ॥ धर्म्मांतरतिरोभावाज्जडमब्रह्मभासते ॥ १५ ॥ तस्याअप्यंशभूतत्वाज्जडेब्रह्मसमन्वयं ॥ 
तन्मूलकेसदंशेनवक्तितत्तुसमन्वयात् ॥ १६ ॥ जीवास्तुनिर्गुणाःस्वांशाआवृताःप्राकृतैर्गुणैः ॥ सृष्ट्यारम्भेनारदीयेपंच
 रात्रेस्फुटंतथा ॥ १७ ॥ त्रिविधाजीवसंघास्तुदेवमानुषदानवाः ॥ तत्रदेवामुक्तियोग्यामानवेषूत्तमाअपि ॥ १८ ॥ म
ध्यमामानुषायेतुसृतियोग्याःसदैवहि ॥ अधमानिरयायैवदानवास्तुतमोलयाः ॥ १९ ॥ श्रुतावपित्रयःप्राजापत्याइति
तदुच्यते ॥ तदंतःकरणादीनितादृशानिभवंतिहि ॥ २० ॥ जीवाःकर्माणिकुर्वंतिस्वभावानुगुणान्यतः ॥ फलंवांच्छंतिता
दृक्षंप्राप्यसुख्यंतितंत्रते ॥ २१ ॥ सत्वाद्युपाधिमादायविष्णुर्ब्रह्माशिवस्तथा ॥ तत्तन्नियमनायाभूत्स्थित्यादिकृतयेपृथक्
॥ २२ ॥ ( स्कंध १ अ० २ श्लो० २३ ) सत्वंरजस्तमइतिप्रकृतेर्गुणास्तैर्युक्तःपरःपुरुषएकइहास्यधत्ते ॥ स्थित्या
दयेहरिविरंचिहरेतिसंज्ञाःश्रेयांसितत्रखलुसत्त्वतनोर्नृणांस्युः ॥ २३ ॥ चिच्छक्तिःपुरुषोनारायणोब्रह्माततोऽभवत् ॥ ब्र
ह्मादिद्वारकःसर्गःपुराणादौपरिस्फुटः ॥ २४ ॥ ( स्कं० १ अ० ३ श्लो० १ ) जगृहेपौरुषंरूपंभगवान्महदादिभिः ॥
संभूतंषोडशकलमादौलोकसिसृक्षया ॥ २५ ॥ यस्यांभसिशयानस्ययोगनिद्रांवितन्वतः ॥ नाभिन्हदांबुजादासीद्ब्रह्मा
विश्वसृजांपतिः ॥ २६ ॥ गुणाविलीयजायंतेशून्यवत्प्रकृतौलये ॥ प्रकृतिर्लीयतेऽव्यक्तेपुरुषश्चतथास्मृतिः ॥ २७ ॥

---

१ प्रकृतिमूलकेजडे २ श्लोकद्वयमिदंनिबंधेपिसर्वार्थनिर्णयेउदाहृतं ३ सात्विकराजसतामसाः ४ मध्यमलोकेषुभ्रमणं ५ तत्रैवाव 
रणभंगोक्तायां ६ सात्विकादिजीवानांअंतःकरणेंद्रियाणिसात्विकादीनि ७ स्वगुणानुरूपफलेषु ८ क्रमात्सात्विकादिनियमनाय ९ अक्षरे

प्रकृतिःपुरुषश्चोभौलीयेतेपरमात्मनि ॥ कदाचित्पुरुषद्वारेत्युक्तःसर्गोऽयमीरितः ॥ २८ ॥ ननुलीनागुणायत्रलीयतेप्रकृ
तिर्यदि ॥ साऽक्षरेसगुणंधामभवेदेवेतिचेन्नहि ॥ २९ ॥ जगतःसगुणत्वंतुगुणबंधोऽनुभूयते ॥ नतस्यवश्यमायस्यबंध
गंधःस्वशक्तिजैः ॥ ३० ॥ ( स्कं० ११ अ० ११ श्लो १ ) बद्धोमुक्तइतिव्याख्यागुणतोमेनवस्तुतः ॥ गुणस्यमायामू
लत्वान्नमेमोक्षोनबंधनं ॥ ३१ ॥ सृष्टावेवोद्भवंत्येतेप्राकृताःसंतिसल्लयात् ॥ साप्यनुद्भूतरूपाचेत्तत्कार्याणिकुतस्तरां ॥
॥ ३२ ॥ किंचतत्तद्वृत्तिरूपाःसंभवंत्यधुनैवते ॥ जीवेष्वेवविमूढेषुक्रीडार्थंलिंगवत्सुच ॥ ३३ ॥ नहिज्ञानघनेनाना
युज्यंतेवृत्तयःपरे ॥ गुणानांवृत्तिरूपत्वंसांख्यविद्भिर्विविच्यते ॥ ३४ ॥ प्रीत्यप्रीतिविषादात्मकाःप्रकाशप्रवृत्तिनियमा
र्थाः ॥ अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्चगुणाः ॥ ३५ ॥ सत्वंलघुप्रकाशकमिष्टमुपष्टंभकंचलंचरजः ॥ गुरुव
[11]रणकमेवतमः[12]प्रदीपवच्चार्थतोवृत्तिः ॥ ३६ ॥ तस्मादचिंत्यमहिमाभगवान्पुरुषोत्तमः ॥ विरुद्धधर्माधारे[13]ऽस्मिन्युक्तंसर्वम
लौकिके ॥ ३७ ॥ (स्कंध १ अ०२ श्लो०३० ) सएवेदंससर्जाग्रेभगवानात्ममायया ॥सदसद्रूपयाचासौगुणमय्याऽगु

---

१ शास्त्रार्थतत्त्वदीपिषोढासर्गेषुप्रकृतिपुरुषद्वारकोप्येकःसर्गउक्तः कदाचित्तादृशसर्गेच्छायामित्थमपिसृष्टिर्भवति २ यस्यां ३ तदेतिशेषः
४ गुणैः ५ सदंशेजडमात्रस्यलयात् ६ गुणादीनि ७ गुणाः ८ लिंगशरीरं ९ पंचशिखाचार्यकृतार्यास्विदमायाद्वयं १०निरोधः ११ आच्छादनं
१२ तैलवर्त्यादीनामन्योन्यविरुद्धत्वेपियथासंयोगेनदीपाख्यकार्योत्पादकत्वं विशेषतोर्थस्त्वेतद्व्याख्यायांवाचस्पतिमिश्रकृतसांख्यतत्त्वकौमुद्यांद्र
ष्टव्यः१३ भगवति

 णोविभुः ॥ ३८ ॥तयाविलसितेष्वेषुगुणेषुगुणवानिव॥अंतःप्रविष्टआभातिविज्ञानेनविजृंभितः॥ ३९॥यथाह्यवहितोवन्हि 
र्दारुष्वेकःस्वयोनिषु॥नानेवभातिविश्वात्माभूतेषुचतथापुमान् ॥ ४० ॥ असौगुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः ॥ स्वनि
२३ र्म्मितेषुनिर्विष्टोभुंक्तेभूतेषुतद्गुणान्॥ ४१॥ भावयत्येषसत्वेनलोकान्वैलोकभावनः ॥ लीलावतारानुरतोदेवतिर्यङ्नरादिषु
॥ ४२ ॥इत्युक्तंसर्वमुदितंश्रीमद्भागवतादिषु ॥ श्रुतिप्रसिद्धंतत्सिद्धंशुद्धमद्वैतमुज्वलं ॥ ४३ ॥ चतुष्टयेप्रमाणानामविरो
धाद्विचारिते ॥ श्रीमदाचार्य्यसिद्धांतान्नवर्णोऽप्यन्यथाभवेत् ॥ ४४ ॥ सर्वप्रमाणविषयःसर्वशक्तिःस्वयंप्रभुः॥ पूर्णानंदो
रसोत्मासौक्रीडत्यध्यात्मधामनि ॥ ४५ ॥ यादृशंधामतत्तत्रयथाक्रीडायथाहरिः॥ लीलार्थंतस्यरूपाणियथानानातथा
खिलं ॥ ४६ ॥ बृहद्वामनसंज्ञेतत्पुराणेखिल्यउत्तरे ॥ ब्रह्मभृग्वादिसंवादेस्पष्टंतदिहलिख्यते ॥ ४७॥ ब्रह्मोवाच ॥
षष्टिवर्षसहस्राणिमयातप्तंतपःपुरा ॥ नंदगोपव्रजस्त्रीणांपादरेणूपलब्धये ॥ ४८ ॥तथापिनमयाप्राप्तास्तासांवैपादरेणवः
॥श्रुत्वैतद्ब्रह्मणोवाक्यंभृगुःप्राहाथसादरं॥ ४९ ॥ वैष्णवानांपादरजोगृह्यतेत्वद्विधैरपि ॥संतितेबहवोलोकेवैष्णवानारदादयः
॥ ५० ॥ तेषांविहायगोपीनांपादरेणुस्त्वयापियत् ॥ गृह्यतेसंशयोमेऽत्रकोहेतुस्तद्वदप्रभो ॥५१ ॥ ततोब्रह्माभृगुंप्राहचिंत
यित्वापुरातनीं ॥ कथांसर्वश्रुतीनांचरहस्यंपरमाद्भुतं ॥ ५२ ॥ श्रीब्रह्मोवाच ॥ ॥ नस्त्रियोव्रजसुंदर्यःपुत्रताःश्रुतयःकि २३
ल ॥ नाहंशिवश्चशेषश्चश्रीश्चताभिःसमाःक्वचित् ॥ ५३ ॥प्राकृतेप्रलयेप्राप्तेव्यक्तेऽव्यक्तंगतेपुरा ॥ शिष्टेब्रह्मणिचिन्मात्रेका

---

१ अत्रपूर्वमुक्तं २ रसोवैसइतिब्रह्मवल्लीश्रुतेः ३ पुराणस्थंकिंचिदाख्यानं ४ यद् ५ ब्रह्मायुःसमाप्तिरूपे ६ आविर्भूतेजगति ७ अक्षरं ८ प्रविष्टे

लमायाद्येऽगोचरे ॥ ५४ ॥ ब्रह्मानंदमयीलोकोव्यापिवैकुंठसंज्ञकः ॥ निर्गुणोऽनाद्यनंतश्चवर्त्ततेकेवलेऽक्षरे ॥ ५५ ॥ अक्षरंब्रह्मपरमंवेदानांस्थानमुत्तमं ॥ तल्लोकवासीतत्रस्थैःस्तुतोवेदैःपरात्परः ॥ ५६ ॥ चिरंस्तुत्याततस्तुष्टःपरोक्षंप्राहतान्गिरा॥ तुष्टोस्मिब्रूतभोप्राज्ञावरंयन्मनसीप्सितं ॥ ५७ ॥ श्रुतयऊचुः ॥ ॥ नारायणादिरूपाणिज्ञातान्यस्माभिरच्युत॥ सगुणंब्रह्मसर्वेषांवस्तुबुद्धिर्नतेषुनः ॥ ५८ ॥ ब्रह्मेतिपठ्यतेस्माभिर्यद्रूपंनिर्गुणंपरं ॥ वाङ्मनोगोचरातीतंततोनज्ञानयतेतुतत् ॥ ५९ ॥ आनंदमात्रमितियद्वदंतीहपुराविदः ॥ तद्रूपंदर्शयास्माकंयदिदेयोवरोहिनः ॥ ६० ॥ श्रुत्वैतद्दर्शयामासस्वंलोकंप्रकृतेःपरं ॥ केवलानुभवानंदमात्रमक्षरमध्यगं ॥ ६१ ॥ यत्रवृंदावनंनामवनंकामदुघैर्द्रुमैः ॥ मनोरमनिकुंजाढ्यंसर्वर्तुसुखसंयुतं ॥ ६२ ॥ यत्रगोवर्द्धनोनामसुनिर्झरदरीयुतः ॥ रत्नधातुमयःश्रीमान्सुपक्षिगणसंकुलः ॥ ६३ ॥ यत्रनिर्मलपानीयाकालिंदीसरितांवरा ॥ रत्नबद्धोभयतटीहंसपद्मादिसंकुला ॥ ६४ ॥ शश्वद्रासरसोन्मत्तंयत्रगोपीकदंबकं ॥ लसत्कंदंबमध्यस्थःकिशोराकृतिरच्युतः ॥६५॥ दर्शयित्वेतिचप्राहब्रूतकिंकरवाणिवः ॥ दृष्टोमदीयोलोकोयंयतोनास्तिपरंवरं ॥ ६६ ॥ श्रुतयऊचुः ॥ ॥ कोटिकंदर्पलावण्येत्वयिदृष्टेमनांसिनः ॥ कामिनीभावमासाद्यस्मरक्षुब्धा

---

१ तिगेक्षरे २ मये ३ के ४ ऋचोअक्षरेपरमेव्योमन्प्रतिष्ठिताइतितैत्तिरीयश्रुतेः ५ अक्षरेस्थितैः ६ आधिभौतिकजगदपेक्षयापरादाध्यात्मिकादक्षरादप्याधिदैविकत्वेनपरः ७ वेदान् ८ अशेषाणांनोऽस्माकं ९ निर्गलितवस्तुत्वबुद्धिः १० गिरिरितिशेषः ११ सुपदंकाकादिव्यावृत्तये १२ नानारा १३ समूहः १४ कदंबवृक्षाः वस्तुतस्तुगोपीवृंदं तत्कदंबकमध्यस्थइत्यपिपाठः १५ कंदर्पकोटीतिक्वचित्

ऽन्यसंशयं ॥ ६७ ॥ यथात्वल्लोकवासिन्यःकामंतत्त्वेनगोपिकाः ॥ भजंतिरमणंमत्वाचिकीर्षाऽजनिनस्तथा ॥ ६८ ॥
श्रीभगवानुवाच ॥ ॥ दुर्लभोदुर्घटश्चैवयुष्माकंसुमनोरथः ॥ मयानुमोदितःसम्यक्सत्योभवितुमर्हति ॥ ६९ ॥ आगा
मिनिविरिंचौतुजातेसृष्ट्यर्थमुद्यते ॥ कल्पंसारस्वतंप्राप्यव्रजेगोप्योभविष्यथ ॥ ७० ॥पृथिव्यांभारतेक्षेत्रेमाथुरेममर्मंडले ॥
वृंदावनेभविष्यामिप्रेयान्वोरासमंडले ॥ ७१ ॥ जारधर्मेणसुस्नेहंसुदृढंसर्वतोधिकं ॥ मयिसंप्राप्यसर्वेपिकृतकृत्याभविष्य
थ ॥ ७२ ॥ ब्रह्मोवाच ॥ ॥ श्रुत्वैतांश्चितयंत्यस्तारूपंभगवतश्चिरं ॥ उक्तकालंसमासाद्यगोप्योभूत्वाहरिंगताः ॥ ७३ ॥
स्त्रियोवापुरुषाश्चापितद्भावेनैवकेशवं ॥ त्वादिकृत्वागतिंयांतिश्रुतीनांनात्रसंशयः॥ ७४ ॥ तासांपादरजःस्तुत्यंनित्यंवृंदाव
नेभुवि ॥ तत्प्राप्यतत्कामनयायांत्यहोगोपिकागतिं ॥ ७५ ॥ नंदगोपव्रजस्त्रीणामतःपादरजोमया ॥ वांछितंपुत्रकाःस
म्यक्कुयद्भिताःश्रुतयोमताः ॥ ७६ ॥ श्रुत्वैतदृषयोवाक्यंब्रह्मणःपरमेष्ठिनः ॥ सर्वात्मनाप्रपन्नास्तेश्रीगोपीजनवल्लभं ॥
॥ ७७ ॥ इत्युक्तमुत्तरेखिल्येबृहद्वामनसंज्ञके ॥ प्रभुपादादिभिरिदंसंगृहीतंसनिर्णयं ॥ ७८ ॥ ऋगादीनामुपनिषत्सुपृथ
ङ्नामपूर्वकं ॥ तत्रत्यंवर्ण्यतेसर्वंताद्रूप्यादभिदोदिता ॥ ७९ ॥ भाष्यादौश्रीमदाचार्य्यैर्दर्शितंप्रभुभिस्तथा ॥ तन्नित्य
लीलावादादावन्यत्रान्यैस्तदीक्ष्यतां ॥ ८० ॥ तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः ॥ दिवीवचक्षुराततं ॥ ऋग्भिर्निरूपिते

१ यथेच्छं २ भक्तिलक्षणं माहात्म्यज्ञानपूर्वस्तुसुदृढःसर्वतोधिकः स्नेहोभक्तिरितिभोक्तइतिपंचरात्रोक्तेः ३ श्रुतिरूपादिगोपीनां ४ पुरुषोत्तम
भामिकामनया ५ गोपालभट्टादिकृतबहिर्मुखध्वंसादिषुसंगृहीतत्वादादिपदं ६ भगवद्धामवृत्तं ७ तत्रत्यवस्तूनांसाक्षाद्भगवद्रूपत्वात्

धाम्न्यात्माऽभिन्नेऽचिंत्यधर्मवान् ॥ सर्वात्मकःसर्वलीलोनित्यभक्तैर्निजात्मभिः ॥ ८१॥ अखंडःपूर्णएवासौरमतेससमंस
दा ॥ भक्त्येकलभ्योभगवान्नान्यथादृश्यतेपरः ॥ ८२ ॥ इत्यवश्यंसेवनीयःपरमानंदसिद्धये ॥ स्वाभाविककृपाशक्ति
जीवैःसेवार्थनिर्मितैः ॥ ८३ ॥ यत्तेनोद्गमितादेवाःसेवनायैवचेतनाः ॥ दासभूतोहरेरेवेतिपाद्मेजीवलक्षणं ॥ ८४ ॥ जी
वाःस्वांशायतःसृष्टामोक्षेऽप्यक्षररूपिणः ॥ अतोपिभजनंयुक्तंयोयदंशःसतंभजेत् ॥ ८५ ॥ शक्तिगणैरममाणंतनुवित्तज
भजनजातपरभक्त्या ॥ सेवध्वंसंसारंभित्त्वाब्रह्मैक्यभावनाभूयः ॥ ८६ ॥ ॥ इतिवेदांतचिंतामणौप्रकृतिपुरुषदि
ग्दर्शनपूर्वकभगवद्धामोदाहरणंनामचतुर्दशंप्रकरणं ॥ १४ ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥
सर्वात्मार्पणतःसेवारसैर्मुक्त्यधिकैःकृतः ॥ स्वाचार्यैःसुलभोयःसश्रीकृष्णःशरणंमम ॥ १ ननुतांगोपिकानित्यानित्यंक्री
डादिकंयदि ॥ शुद्धंद्वैतमिदंजातंशुद्धाद्वैतंकुतःपुनः ॥ २ ॥ नाशंकनीयमित्येवंशक्तिशक्तिमतोर्हतः ॥ सूत्रेषुश्रुतितोभेदः
सुबोधिन्यांन्यरूपयन् ॥ ३ ॥ अधिदैविकशक्तित्वंतासांकृष्णमुखाश्रयः ॥ वासुदेवोपनिषदिश्रूयतेशक्तिरूपता ॥ ४ ॥
गोप्योनामविष्णुपत्न्यस्तासांचंदनमाल्हादनं कश्चाल्हादएषब्रह्मानंदरूपः काश्चविष्णुपत्न्योगोप्योनामजगत्सृष्टिस्थि

---

१ वाक्यमिदं २ बृहद्वामनाद्युक्ताः ३ निरस्तः ४ वेणुगीतादिव्याख्याने पादोयमुत्तरत्रान्वयी ५ आथर्वणीयेयमुपनिषत् गोपीचंदनोपनिषदि
त्यपिकथ्यते ॐनमस्कृत्यभगवंतंनारदःसर्वेश्वरंवासुदेवंपप्रच्छेत्यादि ॥इयंशंकराचार्याद्यनुसारिभिर्बहुभिर्व्याख्याता भागवततत्त्वभास्करादिषुसर्व
साधारणग्रंथेषूदाहृताच

त्यंतकारिण्यः प्रकृतिमहदहमाद्यामहामायाः कश्चविष्णुःपरंब्रह्मैवविष्णुरिति ॥ तत्रैवाग्रेआपोहवाअग्रेआसन्नित्युपक्र
म्य॥ताश्चोपनिषद्भवस्वतंतरेसगुणंब्रह्मविधिनानंदकरूपंपुरुषोत्तमरूपेणमथुरायांवसुदेवसद्मन्याविर्भविष्यतितत्रभवत्यःस
र्वलोकोत्कृष्टसौंदर्यक्रीडाभोगंगोपिकाः स्वरूपैःपरंब्रह्मानंदैकरूपंकृष्णंभजिष्यथ॥तत्रश्लोकौ॥इतिब्रह्मवरंलब्ध्वाश्रुतयो
 ब्रह्मलोकगाः॥कृष्णमाराधमासुर्गोकुलेधर्मसंकुले॥श्रीकृष्णाख्यंपरंब्रह्मगोपिकाःश्रुतयोभवन्॥एतत्संभोगसंभूतंचंदनंगोपि
चंदनमिति॥भागवते(स्कंध १०पू०) ताभिर्विधूतशोकाभिर्भगवानच्युतोवृतः ॥ व्यरोचताधिकंतातपुरुषःशक्तिभिर्यथा
॥ ५ ॥ इतिपुंशक्तिवल्लीलाशक्तिभिःसहशंसिता ॥ मूर्त्तिमत्त्वंतुशक्तीनामप्राकृततयेच्छया ॥ ६ ॥ यथामूर्तिर्नवर्णानां
लौकिकानामलौकिके ॥ वेदायथामूर्त्तिधरास्त्रि[2]पृष्ठेतदिदंतथा ॥ ७ ॥ मूर्त्तयोऽक्रूरदृष्टानांशक्तीनामपिवर्णिताः ॥ तद्वा
धिदैविकीनांतुतथा[3]त्वेकोनुसंशयः ॥८॥ ( स्कंध१०अ० ३३श्लो०१७) एवंपरिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविला
सहासैः॥रेमेरमेशोव्रजसुंदरीभिर्यथार्भकःस्वप्रतिबिंबविभ्रमः॥ ९॥तेतभक्तास्तदात्मानोनभिदाऽण्वपिवर्त्तते ॥इत्यभेदंक्रीड
नेचर[4]दृष्टांतंशुकउक्तवान्॥ १०॥लीलामात्रैर्धर्मभूतैःकामादिभिरलौकिकैः॥अबद्धस्यस्वतंत्रस्यबाधःसर्वाश्रयस्यतैः॥ ११॥
नाचिंत्यस्याप्रमेयस्यशुद्धाद्वैतस्यकश्चन ॥अतोभागवतेऽप्युक्तमात्मारामोव्यरीरमत् ॥ १२ ॥रसोवैसइतिश्रुत्यारूपितास्य 

---

१ भागवतस्थोर्यामिद्रवज्जाचरणः २ सत्यलोकादौ ३ मूर्तिमत्त्वे ४ शिशुप्रतिबिंबदृष्टांतं

रसात्मता ॥ सर्वकामःसर्वरसइतिधर्म्मत्वमीर्य्यते॥ १३॥ विरुद्धधर्माधारत्वंब्रह्मत्वमितिलक्षणात् ॥ कामादयोज्ञानघनेभू षणंनतुदूषणं ॥ १४ ॥ शक्तिशक्तिमतोर्भेदोनैवंशुद्धंतदद्वयं ॥ तत्रत्येषुतिरोभावोनधर्म्माणांतुवस्तुषु ॥ १५ ॥ अनीश्वरानप्रकृष्टांस्तिरोहितगुणान्बहून् ॥ यदेच्छतिप्रजायेयेतितदाकुरुतेजगत् ॥ १६ ॥ तेतिरोभूततद्धर्म्माबद्धाःसंसारमायया ॥ दृढाहंत्वाच्छरीरेत्राचिराप्रेक्षणभंगुरे ॥ १७ ॥ नाव्येकस्यामिवारोहात्प्रपायामिवसंगमात् ॥ वियोक्ष्यमाणेष्वचिरान्मिलितेष्वधुनैवच ॥ १८ ॥ तेनरूयादिषुसंबंधंकल्पयित्वाचपण्यवत्॥ गतागतेषुवित्तेषुममत्वाच्चितयाकुलाः॥ १९ ॥ संसक्तादेहगेहादावकृतार्थाअतर्पणाः ॥ बलेनमृत्युनानीताःप्रापिताःपारवश्यतः ॥२०॥पुनर्जन्मपुनःसक्तास्तेत्रत्येषुगृहादिषु ॥ नीयमानाःपुनस्तेनपापपुण्यानुरोधतः ॥ २१ ॥ आपन्नानरकंस्वर्गनानोद्विग्नावृथामुहुः ॥ क्वचित्सुखंक्वचिदुःखं क्वचिन्मोहमुपागताः ॥ २२ ॥ एवंपरवशाःप्राप्ताजन्ममृत्युपरंपराम् ॥ व्यूह्यमानाइवौघेनघटीयंत्रमिवश्रिताः ॥ २३ ॥ जीवाःक्लिश्यंतिदुःखस्यनाशेपुनरनुद्भवे ॥ तद्भक्तिरेवपरमंकारणंहरितोषिणी ॥ २४ ॥ महाभारतेनामसहस्रे ॥ नक्रोधो

---

१ सर्वकामःसर्वगंधःसर्वरसइतिच्छांदोग्येपंचमप्रपाठके ( खं. १४ ) शांडिल्यविद्यायांद्विवारमाम्नातं २ भेदस्यायंनिषेधः ३ तस्मात् भेदाभावाद्धेतोः शुद्धाद्वैतंसिध्यति ४ परधामस्थेषुलीलोपयोगिषु ५ तत्रत्यवस्तुषुत्वित्यन्वयात् लौकिकवस्तुव्यावृत्तिः ६ संसारहेतुभूतया ७ सबंधद्वारभूतशरीरेण ८ पत्नीत्वपुत्रत्वादिलक्षणं ९ क्रय्यवस्तुष्विवगतागतेषु १० पुनर्जन्मप्रापिताइत्यग्रेणान्वयः ११ तज्जन्मभवेषु १२ मृत्युना १३ सुखादीनिसत्वरजस्तमोजन्यानि क्रमात्तेषांसुखदुःखमोहस्वभावत्वंसांख्यतत्त्वकौमुद्यादिषुप्रसिद्धं १४ नाशेऽनुद्भवेचकारणमित्युत्तरेणान्वयः लौकिकोपायैर्नाशेपिदुःखस्यपुनरुद्भवोदृष्टइत्युभयग्रहणं

 नचमात्सर्यंनलोभोनाशुभामतिः ॥ भवंतिकृतपुण्यानांभक्तानांपुरुषोत्तमे॥ २ ५॥पुरुषोत्तममापन्नोनपुनर्दुःखमाप्नुयात्॥ 
प्राप्योभक्त्यैवसतथागीताभागवतादिषु ॥ २ ६ ॥ नाहंवेदैर्नतपसानदानेननचेज्यया ॥ शक्यएवंविधोद्रष्टुंदृष्टवानसिमां
 यथा ॥ २ ७ ॥ भक्त्यात्वनन्ययाशक्यअहमेवंविधोर्जुन ॥ ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंतप ॥ २ ८ ॥ भक्त्याहमेकयाग्राह्यो
भक्त्यालभ्यस्त्वनन्यया ॥ भक्त्यैवतुष्टिमभ्येतिविष्णुर्नान्येनकेनचित् ॥ २ ९ ॥ नदानंनतपोनेज्यानशौचंनव्रतानिच ॥ प्री
यतेऽमलयाभक्त्याहरिरन्यद्विडंबनम् ॥ ३ ० ॥ भक्त्यातुतोषभगवान्गजयूथपाय ॥ इत्त्यादौभक्तिरेवास्यपुरुषार्थःप
रोमतः ॥ सम्यक्[1]सिद्धयेज्ञानंसाधनंभक्तिसूत्रतः ॥ ३ १ ॥ तत्सो[2]मुख्यतरापेक्षितत्वादित्थमुपक्रमात् ॥ ब्रह्म[3]कांडंतुभक्तौ
तस्यानुज्ञानायसामान्यादित्यंतं॥भक्तेर्ज्ञादिशेषित्वंवक्तिसंपूर्णमान्हिकं[4] ॥ ३ २ ॥ पदार्थएवनज्ञातोयःसेव्यःसकथंभवेत्॥
भक्त्यऽसंपादकंज्ञानंकेवलंतुविनिंदितम् ॥ ३ ३ ॥( स्कंध १ ० ) ब्रह्मस्तुतौ॥श्रेयःस्रुतिंभक्तिमुदस्यतेविभोक्लिश्यंतियेकेवल
बोधलब्धये ॥ तेषामसौक्लेशलएवशिष्यतेनान्यद्यथास्थूलतुषावघातिनाम् ॥ ३ ४ ॥ प्रथमस्कंधेनारदः॥नैष्कर्म्यमप्यच्यु
तभाववर्जितंनशोभतेज्ञानमलंनिरंजनं॥कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यकारणं॥ ३ ५॥गीतायां॥तपस्विभ्योऽ
धिकोयोगीज्ञानिभ्योऽपिमतोऽधिकः ॥ कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन ॥ ३ ६ ॥ योगिनामपिसर्वेषांमद्गते

---

१ भक्तेर्दार्ढ्यादिसिद्धये २ (अ०१सू० १० ) सामुख्येतिभक्तिरेवमुख्या इतरैर्ज्ञानादिभिःस्वांगितयातस्याएवापेक्षितत्वात् ३ ज्ञानकांडंतुभक्तौ 
भगवत्स्वरूपानुज्ञापकतयोपयुज्यते यागेइतिकर्तव्यताद्यनुज्ञापकतयापूर्वकांडमिव ४ भक्तिमीमांसाप्रथमाध्यायस्यद्वितीयमान्हिकं

नांतरात्मना ॥ श्रद्धावान्भजतेयोमांसमेयुक्ततमोमतः ॥ ३७ ॥ ( अ ० १ सू० २३ । २४ ) तदेवकर्मिज्ञानियोगिभ्यआधिक्यशब्दात् ॥ प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः ॥ इतिस्मृत्यनुसारेणशांडिल्यमुनिनोदितं ॥ माहात्म्यबोधकेज्ञानेभक्तिसाधनतोचिता॥३८ ॥माहात्म्यज्ञानपूर्वस्तुसुदृढःसर्वतोऽधिकः ॥ स्नेहोभक्तिरितिप्रोक्तस्तयामुक्तिर्नचान्यथा ॥ ३९ ॥ नारदीयेपंचरात्रेतैस्यालक्षणमीरितं ॥ ( अ० १ सू० २ ) सापरानुरक्तिरीश्वरे ॥ इत्युक्तंभक्तिसूत्रेषुश्रीमद्भागवतेतथा ॥ ४० ॥ ( स्कंध० २ ) देवानांगुणलिंगानामानुश्रविककर्मणां ॥ सत्त्वएवैकमनसोवृत्तिःस्वाभाविकीतुया ॥ ४१ ॥ अनिमित्ताभागवतीभक्तिस्सिद्धेर्गरीयसी ॥ इतिनिष्कामनःस्नेहोभक्तिराथर्वणेतथा ॥ ४२ ॥ भक्तिरस्यभजनंतदिहामुत्रोपाधिनैराश्येनमनःकल्पनमिति ॥ चतुर्विधाभजंतेमांचतुर्धेत्यधिकारिषु ॥ नसंमतोर्थार्थ्यार्त्तश्चज्ञानीजिज्ञासुरुत्तमः ॥ ४३ ॥ भक्त्यासंजातयाभक्त्येत्येकाभक्तिस्तुसाधनं ॥ फलात्मिकापराभक्तिर्मानसीप्रेमलक्षणा ॥४४॥ तनुजावित्तजासेवातस्यांःसाधनमुच्यते ॥ सर्वेंद्रियैःशुद्धभावात्तत्परैःसेवनाऽऽदिमा ॥ ४५॥ तदिच्छामैस्स्वसर्वस्वोत्थैस्से

---

१ भक्तेर्योगाद्यपेक्षयामुख्यत्वं २ शब्दस्तूक्तगीतावाक्यरूपः ३ अर्जुनभगवत्कर्तृकाभ्यां ४ भक्तिमीमांसामथमाध्यायउक्तं ५ मुख्यभक्तेः ६ पुरुषोत्तमेयापरानुरक्तिःसापराभक्तिरितिस्वमेश्वरादयोव्याख्यातारः ७ गीतायां चतुर्विधाभजंतेमांजनाःसुकृतिनोर्जुन ॥ आर्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभेत्यादि ८ उत्तमतयानाभिमेतः सकामत्वात् ९ भागवते( स्कंध ११ अ० ३ श्लो० ३१ ) भक्त्यासंजातयाभक्त्याबिभ्रत्युत्पुलकांतनुमिति १०मानस्याः ११ भागवतादिषु १२ तनुजा १३ भगवदिच्छयालब्धैः

वावैभवैःपरां ॥ उभेअपिप्रमाणोक्तेप्रथमंतनुजायथा ॥ ४६॥ ऋग्वेदे ॥ तमुस्तोतारःपूर्व्यंऋतस्यगर्भंजनुषापिपर्त्तन ॥
आस्यजानंतोनामचिद्विवक्तनमहस्तेविष्णोसुमतिंभजामहे ॥ भागवते ॥ करौहरेर्मंदिरमार्जनादिषु॥शावौकरौनोकुरुतः
२७ सपर्य्याम् ॥ वाणीगुणानुकथनेश्रवणौकथायाम्॥करौचतत्कर्मकरौमनश्च ॥ गृहशुश्रूषणमह्यंदासवद्यदमायया ॥ आ
दरःपरिचर्य्यायाम् ॥ इत्यादौप्रथमाप्रोक्ताद्वितीयाप्युच्यतेयथा ॥ सर्वलाभोपहरणंपत्रंपुष्पंफलंतथा ॥ ४७ ॥तज्जन्म
तानिकर्माणितदायुस्तन्मनोवचः ॥ नृणांयेनहिविश्वात्मासेव्यतेहरिरीश्वरः ॥ ४८ ॥ मुकुंदसेवौपयिकंस्पृहाहिनः ॥
भर्त्तासन्भ्रियमाणोबिभर्त्ति ॥ योगंक्षेमंवहाम्यं ॥ इत्यादावपरोक्तैतेएकीभूयसुदुर्लभाम ॥ अकृत्यशेषांकुर्वीतेदंशर्मींप्रे
मलक्षणाम् ॥ ४९ ॥ सर्वार्पणात्प्रवृत्तस्यसेवनेप्रेमनिर्मलम् ॥ भवेदेवगुणांभोधौहरौस्यान्मानसीततः ॥ ५० ॥(स्कंध १)
नारदः ॥ एवंप्रवृत्तस्यविशुद्धचेतसस्तद्धर्मएवात्मरुचिःप्रजायतइति ॥( स्कं० ११) योगीश्वरः॥ इत्यच्युतांघ्रिभजेतोऽनु
वृत्त्याभक्तिर्विरक्तिर्भगवत्प्रबोधइति ॥ अवांतरेफलेद्वेस्तःप्राङ्मुख्यफलतोऽनयोः॥संसारदुःखविलयोबृहदात्मैक्यबोधनं ॥
॥५१॥ (स्कंध ६ )चित्रकेतुः॥नहिभगवन्नघटितमिदंत्वद्दर्शनान्नृणामखिलपापक्षयः॥यन्नामसकृद्ग्रहणात्पुल्कसोपिवि

१ वित्तजा २ तनुजा ३ वित्तजा ४ भागवतस्थमेतत् ५ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छतीतिभगवद्वाक्यं ६ तित्तिरिश्रुतिः ७ गीता
८ तनुजवित्तजसेवे ९ नास्तिकर्तव्यशेषोयस्यां १० श्रवणादिनवविधभक्तिभ्यःपरां ११ तनुजवित्तजसेवेकुर्वतः १२ फलरूपामानसी १३
मानसीतः १४ उक्तसेवयोः १५ अक्षरब्रह्मणासहजीवाभेदज्ञानं

मुच्यतेसंसारात् ॥ ५२ ॥ अहैतुक्यव्यवहितायाभक्तिःपुरुषोत्तमे ॥ जनयत्याशुवैराग्यंज्ञानंयत्तदहैतुकम् ॥ ५३ ॥ मांच
योऽव्यभिचारेणभक्तियोगेनसेवते ॥ सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते ॥ ५४ ॥ इत्युक्तोभक्तितोबंधनाशोब्रह्मा
त्मबोधनं ॥ संसारोऽविद्ययाशक्त्याकृतःपूर्वंप्रवृत्तये ॥ ५५ ॥ स्वरूपंविस्मरन्मूढोऽन्तःप्राणोष्वद्रियेतनौ ॥ क्रमादध्यास
तोवेत्तिदेवदत्तोहमित्यसौ ॥ ५६ ॥ देहसंबंधिगेहादौममत्वेनानुषज्जते ॥ अहंममात्मकस्तर्हिसंसारइतिकथ्यते ॥ ५७ ॥
सर्वात्मनाप्रवृत्तस्यसेवनायांनिरंतरं॥ देहादीनांतदीयत्वभावनादहंमोहतिः॥५८॥तन्मूलिकातुममताविहताऽहंकृतेर्हतेः ॥
मामेवयेप्रपद्यन्तेमायामेतांतरंतिते ॥ ५९ ॥ अविद्यानाशइत्युक्तोभक्तानांस्वप्रपत्तितः ॥ संसारकारणलयान्नतस्यपुन
रुद्भवः ॥ ६० ॥ अविद्याकालकर्मादिर्नैवशक्नोतिबाधितुं ॥ ऐकांतभक्त्येकनिष्ठंजनमेतदतिस्फुटम् ॥ ६१ ॥ संसारोमाय
यामिथ्याभ्रमोमध्येऽन्तरायकृत् ॥ ब्रह्मज्ञानेजवनिकातन्नाशेब्रह्मविद्भवेत् ॥ ६२ ॥ सर्पज्ञानेहतेरज्जुज्ञानंस्यात्तत्कृतंभयं॥
नश्येदेवंतथैवेदंश्रीभागवतईर्य्यते ॥ ६३ ॥ ( स्कं० १२ अ० ४ श्लो० ३१।३२।३३ ) यथाघनोऽर्कप्रभवोऽर्कदर्शितो

---

१ द्विविधसेवातः २ सृष्ट्यारंभे ३ अन्यथाब्रह्मांशानामित्थंप्रवृत्त्यसंभवादितिभावः ४ स्वरूपाज्ञानमध्यासचतुष्टयंचेतिपंचाविद्यापर्वाणि ५ अंतःकरणे ६ अहंतायाः ७ भगवद्वाक्यं ८ शरणागतितः ९ अविद्यानाशात् १० तस्यसंसारस्य ११ कर्तृ आदिशब्देनदेशविशेषादयः १२ एकांतोनिश्चयांत्रेति १३ नश्येदेवेत्युत्तरान्वयि १४ सर्पस्थानेअहंता रज्जुस्थानेअक्षरात्माजीवः संसारभ्रमनाशेस्वात्मनिप्रपंचेचाक्षरब्रह्मात्मकताप्रतीतिः

वे.चिं ष्यंकांशभूतस्यचचक्षुषस्तमः ॥ एवंत्वहंब्रह्मगुणस्तदीक्षितौब्रह्मांशकस्यात्मनआत्मबंधनः ॥ ६४ ॥ घनोयदार्कप्रभवोवि
दीर्य्यतेचक्षुःस्वरूपंरविमीक्षतेतदा ॥ यदाह्यहंकारउपाधिरात्मनोजिज्ञासयानश्यतितर्ह्यनुस्मरेत् ॥ ६५॥ यदैवमेतेनविवेक प्र०१५
हेतिनामायामयाहंकरणात्मबंधनं ॥ छित्वाऽच्युतात्मानुभवोऽवतिष्ठतेतमाहुरात्यंतिकमंगसंप्लवं ॥ ६६ ॥ धामाग्निःसंस्तते
३८ र्नाशेब्रह्मत्वंत्वक्षराऽऽत्मता ॥ तत्षष्ठेपंचमेध्यायेद्वादशस्कंधउच्यते ॥ ६७ ॥ ( अ० ६ श्लो० ३३ ) तएतदधिगच्छंति
विष्णोर्यत्परमंपदं ॥ अहंममेतिदौर्जन्यंनयेषांदेहगेहजं ॥ ६८ ॥ ( अ० ५ श्लो० ११ ) अहंब्रह्मपरंधामब्रह्माहंपरमंप
दं ॥ एवंसमीक्षन्नात्मानमात्मन्याधायनिष्कले॥ ६९॥ उपाधिनाशेविज्ञानेब्रह्मात्मत्वावबोधने ॥गंगातीरस्थितंतोयद्वद्देवेंतां
तत्रैपश्यति ॥ ७० ॥ तथाकृष्णंपरंब्रह्मस्वस्मिन्ज्ञानीप्रपश्यति ॥ इत्युक्तंश्रीमदाचार्य्यैर्जीवन्मुक्तिरियंपरा ॥ ७१ ॥ अ
क्षरंजानतःसर्वंभवेदक्षररूपता ॥ ब्रह्मविद्ब्रह्मैवभवतीतिश्रुत्यातथोदितम् ॥ ७२ ॥ आनंदादितिरोभावाज्जीवभावोविचारि
तः ॥ भूयोभक्त्यानंदलाभादैश्वर्य्यादेश्वसंभवात् ॥ ७३ ॥ श्रुतेरसंह्येवायंलब्ध्वानंदीभवत्यतः ॥ अपिवातमादेशमप्राक्ष्यो
येनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञातं ॥ इतिस्याद्ब्रह्मताधामत्वात्कृष्णस्फूर्तिरुज्वला ॥ ७४ ॥ स्वयंतदात्मनातेनप्र

---

१ सूर्याऽधिभौतिकरूपस्य २ सूर्यदर्शनप्रतिबंधकः ३ अहंकारः ४ भगवत्कृतः ५ जीवस्य ६ कर्तृ ७ भगवतः ८ आत्यंतिकसंप्लवोमोक्षः ३८
९ सार्द्धश्लोकोयंसिद्धांतमुक्तावलीस्थः १० गंगायाःपरमभक्तः ११ मूर्तिमतींगंगां १२ प्रवाहादौ १३ प्रपंचं १४ ब्रह्मवल्लीश्रुतेः १५ अयं
तिरोहितानंदोपिजीवोरसंआनंदरूपंपरंलब्ध्वापुनरानंदांशवानभवति १६ छांदोग्याष्टमाध्यायश्रुतिः १७ अक्षररूपेण १८ जीवन्मुक्तेन

पंचोऽप्यक्षरात्मकः ॥ सर्वोपिशक्यतेद्रष्टुमवाप्यज्ञानचक्षुषा ॥ ७५ ॥ सर्वंब्रह्मात्मकंपश्यन्सर्वत्राऽविहताहरेः ॥ लीलाविलोकयंस्तास्तानकिंचिदपिकांक्षति ॥ ७६ ॥ ( स्कं० १ अ० ७ ) आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे ॥ कुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरिः ॥ ७७ ॥ तत्तल्लीलापरंपश्यन्सर्वत्रपुरुषोत्तमम् ॥ शब्दांस्तद्वाचकान्शृण्वन्सदाचरतिनिःस्पृहः ॥ ७८ ॥ कृष्णप्रेमामृतास्वादादारभ्यैहिकवैभवम् ॥ तृणप्रायाणिगणयन्मोक्षांतानिसुखान्यपि ॥ ७९ ॥ विकलोऽयंदांभिकोयंमहात्मायंहरेर्जनः ॥ इतिनानाजनोक्तिभ्योनशोचतिनहृष्यति ॥ ८० ॥ सख्यास्वस्वामिनास्वातिप्रियेणहरिणासदा ॥ भगवतासहसंलापइत्याद्युक्तदशांगतः ॥ ८१ ॥ एकादशस्कंधेनवयोगीश्वरप्रसंगे॥क्वचिद्रुदन्त्यच्युतचिंतयाक्वचिद्धसंतिनंदंतिवदंत्यलौकिकाः ॥ नृत्यंतिगायंत्यनुशीलयंत्यजंभवंतितूर्णींपरमेत्यनिर्वृताः ॥ ८२ ॥ शृण्वन्सुभद्राणिरथांगपाणेर्जन्मानिकर्माणिचयानिलोके ॥ गीतानिनामानितदर्थकानिगायन्विलज्जोविचरेदसंगः ॥ ८३ ॥ एवंव्रतःस्वप्रियनामकीर्त्याजातानुरागोद्रुतचित्तउच्चैः ॥ हसत्यथोरोदितिरौतिगायत्युन्मादवन्नृत्यतिलोकबाह्यः ॥ ८४ ॥ खंवायुमग्निंसलिलंमहींचज्योतींषिसत्वानिदिशोद्रुमादीन् ॥ सरित्समुद्रांश्चहरेःशरीरंयत्किंचभूतंप्रणमेदनन्यः ॥ ८५ ॥ गृही

---

१ विघातशून्याः २ प्रथमस्कंधेसूतोक्तिरियं ३ अविद्याग्रंथिरहिताः ४ विरुद्धांशपरिहारेणशब्दमात्रंतत्तल्लीलाविशिष्टभगवदभिधायकमवगच्छन् ५ हेतोः ६ ऐहिकवैभवंमानुषानंदमारभ्य ७ शुष्कज्ञानिमोक्षपर्यंतानि ८ वेणुगीतसुबोधिनीस्थोयंगाथाछंदश्चरणः ९ भगवद्व्यतिरिक्तभानशून्यः

वे-चिं. त्वापांद्रियैरर्थानित्यारभ्यसभवतिभागवतप्रधानउक्तइत्यंतम् ॥ कृष्णग्रहगृहीतात्मानवेदजगदीदृशं ॥ इयमेवपराभक्ति प्र० १५
र्मानसीत्यभिधीयते॥ ८६ ॥ एतत्सिद्धौपुनःकिंचित्कर्त्तव्यंनावशिष्यते ॥ चेतस्तत्प्रवणंसेवेत्याचार्य्यैर्लक्षणंकृतम् ॥८७॥
विठ्ठलेशैःसंगृहीतंवक्तुंतल्लक्षणंयथा ॥ तामेवाहव्रजस्थानांश्रीगोपीजनवल्लभः ॥ ८८ ॥ ( स्कंध ११ अ० १२ श्लो०
३१ १२ ) तानाँविदन्मय्यनुषंगबद्धधियःस्वमात्मानमदस्तथेदम्॥यथासमाधौमुनयोऽब्धितोयेनद्यःप्रविष्टाइवनामरूपे॥८९॥
एतत्प्रकाराबहवोऽदर्श्यंताऽप्राकृताँग्निभिः ॥ स्वानुभूत्येकवेद्यासावक्तुंशक्येताकिमया ॥ ९० ॥ एवंविहरतोदेहःपतेद्यदि
तदिच्छया ॥ परमानुगृहीतस्यदेहोऽपिस्यादलौकिकः ॥ ९१ ॥ आत्माऽभिन्नोमहानंदोहरेश्चरणरेणुजः ॥ देहमाहादिम
स्कंधेद्विविधंविधिनंदनः ॥ ९२ ॥ प्रयुज्यमानेमयितांशुद्धांभागवतींतनुम् ॥ प्रारब्धकर्मनिर्वाणोन्यपतत्पांचभौतिकः॥
॥ ९३ ॥ निर्गुणोऽप्राकृतःसोऽस्माच्छून्यैःपुण्यैश्चपातकैः ॥ सगुणात्कर्मबद्धान्नःशरीराद्यतिरिच्यते॥ ९४ ॥ ( स्कं० १०)
जहुर्गुणमयंदेहंसद्यःप्रक्षीणबंधनाः ॥ इत्युक्त्यानिर्गुणप्राप्तिस्तासांसुव्यज्यतेयतः ॥ ९५ ॥ सूत्रेष्वेतत्फलाध्यायेस्पष्टत्वेन

---

१ चेतसस्तस्मिन्भगवतिप्रवणंसूचयामिवसूत्रस्य भगवत्प्रवणंचेतएवसेवेत्यपरे २ सिद्धांतमुक्तावल्यांकृतं ३ तानाविदन्नितिवचनं
४ मानसीलक्षणं ५ गोप्यः ६ फलरूपभक्तिप्रकाराः ७ श्रीमदाचार्यैः ८ मानसीसंपन्नस्य ९ प्राकृताप्राकृतभेदेन १० नारदः ११ एतश्हवावनतपति ३१
किमहस्साधुनाकरवं किमहंपापमकरवमितीत्यादिश्रुतिभ्यः १२ रासपंचाध्याय्यामंतर्गृहगतागोप्यः १३ ब्रह्मसूत्रेषु १४ तुर्याध्यायेचतुर्थपादे

प्रपंचितम्॥(अ० १पा० २सू० २)विवक्षितगुणोपपत्तेश्च॥इत्याद्यध्यायांतरेऽपितद्विनिर्णीयतेश्रुतेः ॥९६॥ परंब्रह्मैतत्ध्याय
तिरसतिभजतिसोऽमृतोभवति॥ ब्रह्मसंस्थोऽमृतत्वमेति॥(अ० १सू० ३)तत्संस्थस्याऽमृतत्वोपदेशात्॥(स्कं० १० )कुरुक्षेत्र
समागमप्रसंगे ॥मयिभक्तिर्हिभूतानाममृतत्वायकल्पते ॥इत्यादावमृतत्वंत्वऽप्राकृताकारउच्यते ॥९७॥दुःखैर्जन्मजरामृत्यु
मोहसंदोहदोहदैः ॥रहितेमहितेऽन्वर्थाऽमृतत्वमितितत्रवाक् ॥९८॥कर्हिचिन्नभवेद्भूयःपर्यावर्त्तोऽस्यसंसृतेः ॥आम्रेडितंनस
पुनरावर्त्ततइतिश्रुतौ॥९९॥गीतायां॥आब्रह्मभुवनाल्लोकाःपुनरावर्त्तिनोऽर्जुन॥मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यते॥१००
तत्सेवैकार्हयाऽऽनंदमय्यानिर्दोषयातया ॥भगवद्रूपयातन्वासेवासिध्यतिसासदा॥१०१॥ निर्गुणापरमांमुक्तिरियमेवाखि
लाधिका ॥ यथैतदानंदवल्ल्यांतैत्तिरीयेतथोच्यते ॥ १०२ ॥ ब्रह्मविदाप्नोतिपरम् ॥ तदेषाभ्युक्ता ॥सत्यंज्ञानमनंतंब्रह्म॥
योवेदनिहितंगुहायांपरमेव्योमन् ॥ सोश्नुतेसर्वान्कामान्सह ॥ ब्रह्मणाविपश्चितेति ॥ इतिमंत्रेणसंक्षिप्यवर्णितंविस्तरा

---

१ एतमितःप्रेत्याभिसंभवितास्मीत्यादिभ्योविषयवाक्यश्रुतिभ्यः २ आथर्वणश्रुतिः ३ छांदोग्यश्रुतिः संस्थाभक्तिः ४ भक्तिमीमांसासूत्रं
५ ६ ऐहिकजन्मादिकमेवनिषिद्धंनत्ववतारवदैच्छिकंतदितिभावः ७ द्विरुक्तं ८ छांदोग्यांते ९ अलौकिकयाब्र
ह्मरूपया १० श्रुतौअस्माल्लोकात्प्रेत्येतिजीवन्मुक्तिव्यावर्तनात्परा ११ अक्षरपुरुषोत्तमयोर्ज्ञातापुरुषोत्तममाप्नोति १२ पूर्वोक्तमभिमुखीकृत्य
व्याख्यानरूपैषासत्यंज्ञानमितिऋगुक्ता १३ सच्चित्वर्णगणितानंदंदेशकालाऽपरिच्छिन्नमक्षरंतत्रनिहितंपरंचयोवेदसःगुहायांहृदिआविर्भूतेअक्षरधा
म्निपुरुषोत्तमेनसहकामानुपभुंक्ते

रपुनः ॥ समयोपनिषत्प्राहबहुनोक्तेर्नकिमम ॥ १०३ ॥यच्चरणाब्जं नेशरणास्तत्करुणामंदमकरंदात् ॥ माद्यंतिदैवमधुपाः
स्वीयेकृपयंतुमयिनिजाचार्य्याः ॥ १०४ ॥ निर्गुणमपिगुणपूर्णंतूर्णंवरणाद्विधायशरणागम् ॥ तत्परवंतंतनुतेभगवंतंभाव
दःसमेभूयात् १०५ ॥ सिध्यत्त्येतद्धरेरेवानुग्रहादेवकेवलम् ॥ नसाधनांतरंकर्त्तुंकिंचिज्जीवेनशक्यते ॥१०६॥कठमुंडक
योः॥नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन । यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्मावृणुतेतनुंस्वाम् ॥ तलव
कारोपनिषदि॥यस्यामतंतस्यमतंमतंयस्यनवेदसः ॥ गीतायां॥नाहंवेदैर्नतपसा॥( स्कं० ११ अ० १२ श्लोक १ ) नरो
धयतिमांयोगोनसांख्यंधर्मउद्धव ॥ इत्यसाधनतामाहसाधनानांहरिःस्वयं॥ १०७॥ सेवातुसाधनंतव्वाऽस्माभिर्यत्किंचि
दर्पितं ॥ लौकिकंकृपयासेवात्वेनसोऽंगीकरोतिचेत् ॥ १०८ ॥ किंमासनंतेगरुडासनायकिंभूषणंकौस्तुभभूषणाय ॥ ल
क्ष्मीकलत्रायकिमस्तिदेयंवागीशकिंतेवचनीयमस्ति ॥ १०९॥ भागवते॥विभूतयेयतउपसेदुरीश्वरींनमन्यतेस्वयमनुवर्त्त
तींभवान्॥ योगिनामप्यलभ्यस्यसर्वेशस्यपरस्यहि॥आत्मपूर्णस्यलाभायदीनानुग्राहिणःश्रुतौ॥१० ॥सुगमंसाधनंप्रोक्तंस
र्वथाशरणागतिः ॥ तस्यैवाकैतवोपाधिस्वसर्वस्वनिवेदनं ॥ ११ ॥ गोपालपूर्वतापनीये ॥ योब्रह्माणंविदधातिपूर्वंयोवि
द्यास्तस्मैगोपायतिकृष्णः॥यस्तंदेवमात्मवृत्तिप्रकाशंमुमुक्षुर्वैशरणमनुव्रजेत्॥१२॥आरंभेपि॥श्रीकृष्णोवैपरमंदैवतम्॥श्वेता

---

१ सत्त्वादिरहितं ऐश्वर्यादिगुणपूर्णं २ अंगीकारात् ३ निर्गुणीकृतभक्तस्याधीनं ४ स्वीयतयांगीकरोति ५ मानसपूजास्थंवचनमिदंनिबंधे
धृतं ६ भगवतएवशरणागतिः

श्वतरादौ॥मुमुक्षुर्वैशरणमहंप्रपद्ये॥ गीतायां॥सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज ॥अहंत्वांसर्वपापेभ्योमोक्षयिष्यामिमा
शुचः ॥ ११३ ॥ ( स्कंध ११ ) ॥ तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां ॥ प्रवृत्तिंचनिवृत्तिंचश्रोतव्यंश्रुतमेवच ॥
॥ ११४ ॥ मामेकमेवशरणमात्मानंसर्वदेहिनां ॥ याहिसर्वात्मभावेनयास्यसेह्यकुतोभयं ॥ ११५॥ ( स्कंध २ )॥ ये
दारागारपुत्राप्तान्प्राणान्वित्तमिमंपरं ॥ हित्वामांशरणंयाताःकथंतांस्त्यक्तुमुत्सहे ॥ ११६ ॥ ( स्कंध ११ ) नवयोगी
श्वरप्रसंगे ॥इष्टंदत्तंतपोजप्तंवृत्तंयच्चात्मनःप्रियं ॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मैनिवेदनं ॥ ११७ ॥ बृहदारण्यकेमधु
विद्यायां ॥ सवाअयमात्मासर्वेषांभूतानामधिपतिःसर्वेषांभूतानांराजातद्यथारथनाभौरथनेमौचाराःसमर्पिताएवमेवा
स्मिन्नात्मनिसर्वेप्राणाःसर्वेलोकाःसर्वेदेवाःसर्वाणिभूतानिसर्वएवात्मानःसमर्पिताः ॥ इत्यादिषूदितंतत्रप्रथमंशरणागतिः॥
ततःसमर्पणंयेनार्प्यमाणांगीकृतिर्भवेत् ॥ ११८ ॥ एतत्सर्वंहरेस्तोषादिनसिध्येदृतेगुरुं ॥ अतस्तद्बुद्धिराचार्यंतादृक्षंसततं
व्रजेत् ॥ ११९॥मुंडकोपनिषदि॥तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिःश्रोत्रियंब्रह्मनिष्ठम्॥श्वेतकेतुविद्यायां॥आचा
र्यवान्पुरुषोवेद ॥ एकादशस्कंधे ॥ आचार्यचैत्यवपुषास्वगतिंव्यनक्ति ॥ आचार्यंमांविजानीयात् ॥ श्वेताश्वतरे ॥ य
स्यदेवेपराभक्तिर्यथादेवेतथागुरौ ॥ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनः ॥ १२० ॥ ( स्कंध ११ ) योगीश्वरप्रसंगे ॥

१ मह्यंसमर्प्य दानविषयेपित्यागार्थकधातुप्रयोगात् २ क्रमनियमेहेतुः शरणागत्यावस्तूनांभगवदंगीकाराहर्त्वसिद्धेः ३ गुरौहरिबुद्धिः ४ शास्त्रो
क्तलक्षणकं ५ पुरुषोत्तमे ६ उपनिषत्प्रभृतिषूक्ताः

भयंद्वितीयाभिनिवेशतःस्यादीशादपेतस्यविपर्ययोऽस्मृतिः ॥ तन्माययातोबुधआभजेत्तंभक्त्यैकयेशंगुरुदेवतात्मा ॥ ॥ १२१॥ परशरमाधवीयप्रथमाध्यायेपुराणसारे ॥ गुरावतुष्टेतुष्टाःस्युःसर्वेदेवाद्विजोत्तमाः ॥ तुष्टेतुष्टायतस्तस्मात्सर्वदेवमयोगुरुः ॥१२२॥ श्रेयोर्थीयदिगुर्वाज्ञांमनसापिनलंघयेत्॥ गुर्वाज्ञापालकोयस्माज्ज्ञानसंपत्तिमश्नुते॥ १२३॥आदित्यपुराणे॥पाद्मेरुष्टेहरस्त्राताहरेरुष्टेहरिस्तथा ॥हरौरुष्टेगुरुस्त्रातागुरौरुष्टेनकश्चन॥ १२४॥इत्यवश्यंव्रजेच्छास्त्रविज्ञंवैष्णवसद्गुरुं॥ निर्णेतव्यंमयाऽन्यत्रेदांकिंचिदिहदर्श्यते ॥१२५॥ गौतमीयतंत्रे ॥अवैष्णवोपदिष्टेनमंत्रेणनिरयंव्रजेत् ॥पुनश्चविधिनासम्यग्ग्राहयेद्वैष्णवाद्गुरोः ॥ १२६ ॥ महाकुलेप्रसूतोऽपिसर्वशास्त्रेषुदीक्षितः ॥ सहस्त्रशाखाध्यायीचनगुरुःस्याद्वैष्णवः ॥ ॥ १२७ ॥षट्शास्त्रज्ञोभवेद्विप्रोवेदवेदांतपारगः ॥ अवैष्णवोगुरुर्नस्याद्वैष्णवःश्वपचोगुरुः ॥ १२८ ॥ इत्यादिवचनैस्तादृक्गुरुंसंगम्यतेउभे ॥ कुर्वीतकृष्णमंत्राभ्यांनान्यथातेभविष्यतः ॥ १२९ ॥ पुनर्गौतमीयतंत्रेप्रथमाध्याये ॥ गाणपत्येषुशैवेषुतथाशाक्तेषुसुव्रत ॥ सर्वेषुमंत्रवर्गेषुवैष्णवंश्रेष्ठमुच्यते ॥ वैष्णवेषुचमंत्रेषुकृष्णमंत्राःफलाधिकाः ॥१३०॥ अन्यत्रापि ॥ कृष्णमंत्रविहीनस्यपापिष्ठस्यदुरात्मनः ॥ श्वानविष्ठासमंचान्नंजलंचमदिरासमं ॥१३१॥ इति ॥ अष्टोत्तरेणशरणंपंचाक्षर्य्यासपूर्वया॥गच्छेत्समर्पयेत्सर्वंश्रुतिस्मृत्युद्धृताविमौ॥ १३२ ॥ उद्धाराद्यनयोश्चक्रेगोस्वामिपुरुषोत्तमैः॥उपदे ४१

१ सर्वशक्तेर्ब्रह्मणःसकाशादुद्गतस्याध्यासचतुष्करूपीविपर्ययःस्वरूपाऽस्मरणंचतन्माययाभवति २ सत्सिद्धांतमार्तंडादिग्रंथेषु ३ वैष्णवब्राह्मणादेवशरणादिमंत्राग्राह्याइत्येवंतात्पर्यकोर्थवादोयं ४ भगवतःशरणगमनमात्मनिवेदनंच ५ गद्यसहितया ६ मंत्रौ

शादिविषयशंकानिरसनेस्फुटम् ॥ १३३॥ अधिक्रियेतसेवायांसद्गुरोःकृष्णमंत्रतः॥ वैष्णवःसन्यथाश्रौतेगायत्र्यध्ययने द्विजः ॥ १३४ ॥ एकादशे ॥ एवंधर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ॥ मयिसंजायतेभक्तिःकोऽन्योऽर्थोऽस्यावशिष्यते ॥ १३५ ॥ गीतायां ॥ मांहिपार्थव्यपाश्रित्ययेऽपिस्युःपापयोनयः ॥ स्त्रियोवैश्यास्तथाशूद्रास्तेऽपियांतिपरांगतिं ॥ ॥ १३६ ॥ किंपुनर्ब्राह्मणाःपुण्याभक्ताराजर्षयोऽमलाः ॥ अनित्यमसुखंलोकमिमंप्राप्यभजस्वमां ॥ १३७ ॥ तत्रैव ॥ अपिचेत्सुदुराचारोभजतेमामनन्यभाक् ॥ साधुरेवसमंतव्यःसम्यग्व्यवसितोहिसः ॥ १३८ ॥ क्षिप्रंभवतिधर्म्मात्माशश्वच्छांतिंनिगच्छति ॥ कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति ॥१३९॥ इतिसर्वेपिभगवत्सेवायामधिकारिणः ॥ ततोगुर्वाज्ञयादेवंशुद्धःसेवेतशक्तितः ॥ १४० ॥ कालनिर्णयदीपिकायांनारदीये ॥ प्रातर्मध्यंदिनेसायंविष्णुपूजांसमाचरेत् ॥ यथासंध्यातथानित्याविष्णुपूजास्मृताबुधैरिति ॥ १४१ ॥ मंत्रैःसद्गुरुणासम्यङ्मूर्त्तांवाविष्कृतंहरिं ॥ भजेत्प्रेम्णासदातत्तदुपचारैर्महोत्सवैः ॥ १४२ ॥ कालनिर्णयदीपिकायांप्रातःकाले ॥ पूजनंप्रतिमायांतुउत्तमंपरिकीर्तितम् ॥ इतिविष्णुधर्मोत्तरात् ॥ ( स्कं० ११ ) ॥ मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनैः ॥ इतिप्रक्रम्यहरिणानिरणायीर्हसेवना ॥ १४३ ॥

---

१ यथाजन्मनाशूद्रप्रायोपिगायत्रीग्रहणेनद्विजःसन्वेदाध्ययनादावधिक्रियते २ कृतात्मनिवेदनानामेवश्रवणकीर्त्तनादिधर्मैर्भक्तिरुद्भवति ३ व्यपाश्रयःशरणागतिः ४ चातुर्वर्णिकाः ५ प्रतिमाशालग्रामगोमतीचक्रादीनि ६ प्रतिमादौ

ममार्चास्थापनेश्रद्धास्वतःसंहत्यचोद्यमइत्यादिभिः ॥ गुर्वाज्ञोक्तप्रकारेणसदासेवेतसंस्मरेत् ॥ कीर्त्तयेत्तद्भक्तगीतैःसंच्छा
स्त्रैःशृणुयात्परं ॥ १४४ ॥ यथाधिकारंलीलास्ताःक्रमशोभावयन्दृढम् ॥ निःसाधनोऽर्पितात्मादिर्दैन्यात्प्राणेश्वरंश्रितः ॥
४२ ॥ १४५ ॥ सर्वदादेहगेहादौतदेकार्थत्वभावनः ॥ (स्कंध ७) ॥ यस्तआशिषआशास्तेनसभृत्यःसवैवणिक् ॥ १४६ ॥
इत्याद्युक्त्यासुनिष्कामोभृत्यभावादकैतवः ॥ सर्वलौकिककर्माणिताटस्थ्येनैवनाटयन् ॥ १४७ ॥ लाभालाभौसमौकुर्वन्
मन्वानस्तद्वशंजगत् ॥ वि[३]वेकधैर्य्याश्रयादियुक्तश्चिंतनतत्परः ॥ १४८ ॥ पुत्रेकृष्णप्रियेप्रीतोनप्रीतस्तत्पराङ्मुखे ॥ उदासीने
स्वयंकुर्वन्प्रतिकूलेगृहंत्यजन् ॥ १४९ ॥ वर्त्तेतवैष्णवाचारैःश्रीमदाचार्य्यदर्शितैः ॥ सप्रमाणैर्गुरोर्भक्तोजिज्ञासुस्तन्मुखाच्छ्रुतेः
॥ १५० ॥ गृहादिबाधकंयत्तत्तत्परत्वेनयुंजतः ॥ सर्वात्मनाचभजतोभवेत्प्रत्युतसाधकं ॥ १५१ ॥ (स्कंध ५) ॥ भयंप्रमत्त
स्यवनेष्वपिस्याद्यतःसआस्तेसहषट्सपत्नः ॥ जितेंद्रियस्यात्मरतेर्बुधस्यगृहाश्रमःकिंनुकरोत्यवद्यम् ॥ १५२ ॥ उपदेशवादे
ब्रह्मवैवर्त्तब्रह्मखंडीयैकादशाध्यायेनारदंप्रतिब्रह्मवाक्यानि ॥ वैष्णवानांहरेरर्चातपस्याचश्रुतौश्रुता ॥ वैष्णवस्त्वंगृहेतिष्ठ
कुरुकृष्णपदार्चनं ॥ १५३ ॥ अंतर्बाह्येहरिर्यस्यकिंतस्यतपसासुत ॥ नांतर्बाह्येहरिर्यस्यकिंतस्यतपसावृथा ॥ १५४ ॥ त
पसाहरिराराध्योनान्यःकश्चनविद्यते ॥ यत्रतत्रकृतंकृष्णसेवनंपरमंतपः ॥ १५५ ॥ इत्यादीनि ॥ निवेदिभिःसमर्प्यैवस

१ संस्कृतैःप्राकृतैश्चकीर्त्तयेत् २ वेदब्रह्मसूत्रभागवतादिशास्त्रैःपुरुषोत्तमंशृणुयात् ३ विवेकस्तुहरिःसर्वंनिजेच्छातःकरिष्यतीत्यादिनाश्रीमदा
चार्योक्तः ४ गुरुमुखाच्छ्रुतेःसकाशात् ५ भगवन्मात्रोपयोगित्वेन ६ भगवतिभक्तिमतः ७ अपरोक्षज्ञानिनः ८ कृतात्मनिवेदनैःसहसर्वंकुर्यात्

वं कुर्यादितिस्थितिः ॥ इतिनिर्वाहआचार्य्यैरुक्तआहेदमुद्धवः ॥ १५६ ॥ (स्कंध ११ अ० ६)॥ त्वयोपभुक्तस्रग्गन्धवा
सोऽलंकारचर्चिताः ॥ उच्छिष्टभोजिनोदासास्तवमायांजयेमहि ॥१५७॥ महोपनिषदिश्रूयते ॥ एकएवनारायणआसी
न्नब्रह्मानद्यावापृथिवीसर्वेदेवाःसर्वेपितरःसर्वेमनुष्याःविष्णुनाऽशितमश्नंतिविष्णुनाऽऽघ्रातंजिघ्रंतिविष्णुनापीतंपिबंतिवि
ष्णुनारसितंरसयंतितस्माद्विद्वांसोविष्णूपहृतंभक्षयेयुरिति ॥ कृष्णाप्रसादभूतंयदन्नंदुष्टस्यसंगतिः ॥ अन्यदेवाश्रयश्चे
तिसर्वथैतन्नयंत्यजेत् ॥ १५८ ॥ आचारप्रकाशेभगवत्पूजानिरूपणेब्रह्मांडे ॥ पत्रंपुष्पंफलंतोयमन्नंपानीयमौषधं ॥ अ
निवेद्यनभुंजीतयदाहारायकल्पितं ॥ १५९ ॥ तत्रैवकौर्मे ॥ अनर्पयित्वागोविंदेयैर्भुक्तंधर्मवर्जितं ॥ शुनोविष्ठासमंचान्नं
नीरंचसुरयासमं ॥ १६० ॥ इत्यन्नंनिर्णीतंतादृक्संगःसर्वत्रवर्जितः ॥ उक्तमस्मद्गुरुभिःश्रीमद्व्रजवल्लभशर्म्मभिः ॥ १६१ ॥
अग्निवद्भगवद्भावोदुःसंगोजलमेवहि ॥ सत्संगव्यवधानेननाशयेत्तुनचान्यथा ॥ १६२ ॥ भागवते ॥ प्रसंगमजरंपाशमा
त्मनःकवयोविदुः ॥ सएवसाधुषुकृतोनिःसंगत्वायकल्पते ॥ १६३ ॥ (स्कंध ५) ॥ रहूगणैतत्तपसानयातिनचेज्यया
निर्वपणाद्गृहाद्वा ॥ नच्छंदसानैवजलाग्निसोमैर्विनामहत्पादरजोऽभिषेकम् ॥ १६४ ॥ (स्कंध ४) क्षणार्द्धेनापितुलये
नस्वर्गंनापुनर्भवं ॥ भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः ॥ १६५ ॥ इतिसर्वत्रसत्संगःसाधनंपरमंमतं ॥ देवास्तद्भक्तसा

---

१ भगवत्प्रसादः २ अनिवेदितमन्नादिदुष्टानांसंगश्च ३ समर्पणमंत्रोपदेष्टारोस्यकवेर्मातामहागोस्वामिविशेषाः ४ भगवद्भक्तशक्तेः

मर्थ्यादेकैकमितकामदाः ॥ १६६ ॥ दातुंशक्तानभक्तिंचमुक्तिमीशोऽपिभोगदः ॥ खट्वांगमुचुकुंदादिभ्योनमुक्तिं
ददुस्ततः ॥ १६७ ॥ अलौकिकःकल्पतरुःस्वाभाविककृपांबुधिः ॥ प्रावृषेण्योनवोमेघःसर्वकामांबुवर्षणे ॥ १६८ ॥ से
व्यःसदासएवैकोऽसाम्याधिक्योऽखिलेश्वरः ॥ मुकुंदएवशक्नोतिदातुंमुक्तिस्वसेवनम् ॥ १६९ ॥ वैष्णवानांकृष्णएवस्व
दैवंतदतिक्रमे ॥ दोषःकांडद्वितीयस्मिन्संहितायांश्रुतोहिनः ॥ १७० ॥ योवैस्वांदेवतामतियजते ॥ प्रस्वायैदेवतायैच्यव
ते ॥ नपरांप्राप्नोति ॥ पापीयान्भवतीति ॥ स्वल्पदान्सुलभक्रोधान्दुःखसाध्यांस्तदंशकान् ॥ त्यक्त्वासर्वप्रदंस्वल्पतोषं
सेवध्वमंशिनं ॥ १७१ ॥ पांडवगीतायां ॥ वासुदेवंपरित्यज्ययोन्यंदेवमुपासते ॥ तृषितोजान्हवीतीरेकूपंखनतिदुर्मतिः ॥
॥ १७२ ॥ द्वितीयस्कंधे ॥ अकामःसर्वकामोवामोक्षकामउदारधीः ॥ तीव्रेणभक्तियोगेनयजेतपुरुषंपरम् ॥ १७३ ॥
निष्कामोऽपितदंगत्वंमत्वासेवेतचेद्वृथा ॥ यथातरोर्मूलनिषेचनेनेतिगतार्थता ॥ १७४ ॥ तस्मादनन्यभावेनतमेवैकंयआ
श्रितः ॥ दैन्यान्निःसाधनंकृष्णःसंसारात्किंनमोचयेत् ॥ १७५ ॥ अभेदाद्व्रजतोमूर्त्तावेवंसंभाषणादिकः ॥ साक्षात्कारो
भवेत्तस्यभगवान्परवानिव ॥ १७६ ॥ यथामुरारिदासाद्याःस्वाचार्यकृपयाऽगमन् ॥ एतद्रहस्यंपरममनुभूयैवबुध्यते ॥

---

१ शिवः २ नतत्समश्चाभ्यधिकश्चदृश्यतइतिश्वेताश्वतरादिश्रुतिभ्यः ३ तीयस्यङित्सूपसंख्यानमितिवार्त्तिकात्साधुः ४ अस्माकंतैत्तिरीयाणां ५ देवानांभगवदवयवरूपत्वं ६ यथातरोर्मूलनिषेचनेनतृप्यंतितत्स्कंधभुजोपशाखाः ॥ प्राणोपहारोबलिरिंद्रियाणांतथैवसर्वार्हणमच्युतेज्येतिभागवताद्युक्तन्यायात् ७ कृष्णं ८ जीवं ९ साक्षाद्भगवानेवायमितिबुद्ध्या १० एषामाख्यायिकाश्चरित्रग्रंथेभ्योज्ञेयाः

॥ १७७ ॥ नतेचतुर्विधांमुक्तिंवांछंतिमनसाक्कचित् ॥ तदुक्तंहरिणासेवारसज्ञैरितरैरपि ॥ १७८ ॥ सालोक्यसार्ष्टि
सामीप्यसायुज्यैकत्वमप्युत ॥ दीयमानंनगृण्हंतिविनामत्सेवनंजनाः ॥ १७९ ॥ मधुद्विट्सेवानुरक्तमनसामभवोऽ
पिफल्गुः ॥ नयोगसिद्धीरपुनर्भवंवा० ॥ नेच्छंतिसेवयापूर्णाःकिमन्यत्कालविद्रुतम् ॥ इतिमोक्षेऽप्यनाकांक्षालौकि
केतुकुतस्तराम् ॥ १८० ॥ सर्वंब्रह्मात्मकंतत्रसलीलंपुरुषोत्तमं ॥ पश्यन्नतिदृढस्नेहोऽप्यैलक्ष्यचरितोभवेत् ॥ १८१ ॥ [2]तंनु
जातःपरांभक्तिमहोयांतिगृहेस्थिताः ॥ श्रीमदाचार्य्यकृपयानान्यथातपसावने ॥ १८२ ॥ [3]अणोरणीयान्महतोमहीया
नात्मागुहायांनिहितोऽस्यजंतोः ॥ तमक्रतुंपश्यतिवीतशोको[4]धातुःप्रसादान्महिमानमीशं ॥ १८३॥ [5]प्रभवोभक्ति[6]हेतौ[7]तंत्सि
[8]द्धिमाहुरनुग्रहात् ॥ नसाधनैर्जीवकृतैस्तनुजाद्यप्यनुग्रहात् ॥ १८४ ॥ [9]मुख्यंहितस्यकारुण्यंभक्तिसूत्रेऽपिवर्णितम् ॥ [10]पुं
ष्टिमार्गोऽयमेवस्यात्पो[11]षणंतदनुग्रहः ॥ १८५ ॥ एतादृशस्यभगवदत्यंतकृपयायदि ॥ [12]गृहस्थास्तादृशाःसर्वेतदानत्यागइ
ष्यते ॥ १८६ ॥ [13]नियंतंकुरुकर्मत्वंसंगंत्यक्त्वासमाचरेत् ॥ इतिगीतासुनिर्णीतंत्वत्रोमोक्ष[14]मिमंजगौ ॥ १८७॥ (स्कं०

---

१ पश्यन्नपिविक्षिप्तवद्भासमानः २ शारीरसेवातः ३ तैत्तिरीयेनारायणोपनिषदिकिंचित्पाठभेदेनकठवल्लीषुचपठ्यते ४ भगवतोऽनुग्रहा
त् ५ प्रभवःश्रीविठ्ठलाचार्याः ६ ग्रंथविशेषे ७ भक्तिसिद्धिं ८ ननुद्विविधसेवातस्तत्सिद्धिःपूर्वमुक्तेतिचेत्सत्यं परंतयोरप्यनुग्रहसाध्यत्वादनुग्रहकै
निदानकत्वंभक्तेरक्षतमितिभावः ९ अ० २ सू० ४९ शांडिल्यसूत्रंमुख्यंनिदानम् १० पुष्टिरनुग्रहस्तत्प्रधानोमार्गः ११ द्वितीयस्कंधवचनमिदं १२ स्त्री
पुत्रादयः १३भिन्नवाक्यस्थंपादद्वयं १४ स्वगृहेप्रेमपूर्णसर्वचित्तैकाग्र्येणभगवद्गुणगानादिरूपं

 ६ अ॰ ११ ) ममोत्तमश्लोकजनेषुसख्यंसंसारचक्रेभ्रमतःस्वकर्मभिः ॥ त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य 
ननाथभूयात् ॥ १८८ ॥ नचेदेवंत्यजेद्देहंभजेदेकोनिजेश्वरम् ॥ व्रजेद्यथारुचिस्थानंव्रजेप्रायोवसंतिते ॥ १८९ ॥
४४ सर्वत्रवाभ्रमेद्भूमौसंगंकुर्वीतताद‍ृशां ॥ लोकदृष्ट्यासुखंदुःखंमित्रवद्भरयेवदेत् ॥ १९० ॥ पारतंत्र्यंभगवतःस्वातंत्र्यंतस्य
जायते ॥ तादृशानांदशामाहस्वयंदुर्वाससंहरिः ॥१९१॥ ( स्कंध ८ ) अहंभक्तपराधीनोह्यस्वतंत्रइवद्विज ॥ साधुभिर्ग्र
स्तहृदयोभक्तैर्भक्तजनप्रियः ॥ १९२ ॥ नाहमात्मानमाशासेमद्भक्तैःसाधुभिर्विना ॥ श्रियंचात्यंतिकींब्रह्मन्येषांगतिरहं
परा ॥१९३॥ येदारागारपुत्राप्तान्प्राणान्वित्तमिमंपरं ॥ हित्वामांशरणंयाताःकथंतांस्त्यक्तुमुत्सहे ॥१९४॥ मयिनिर्बद्धहृ
दयाःसाधवःसमदर्शनाः ॥ वशीकुर्वंतिमांभक्त्यासत्स्त्रियःसत्पतिंयथा ॥ १९५॥ मत्सेवयाप्रतीतंचसालोक्यादिचतुष्टयम् ॥
नेच्छंतिसेवयापूर्णाःकुतोऽन्यत्कालविद्रुतम् ॥ १९६ ॥ साधवोहृदयंमह्यंसाधूनांहृदयंत्वहं ॥ मदन्यत्तेनजानंतिनाहंते
भ्योमनागपि ॥ १९७ ॥ इति॥महानुभावाभाषंतेजीवन्मुक्तिमिमांपराम् ॥ अमृतत्वंपरामुक्तिःसआकारस्त्वलौकिकः ॥
॥ १९८ ॥ आनंदांशतिरोधानेनिराकारत्वमीरितं ॥ पुनस्तदाविर्भवनेभवेदप्राकृताकृतिः ॥ १९९ ॥ तेननास्यपरिच्छेदो
नभेदोहयहस्तिवत् ॥ नतावन्मात्रताऽऽकारेजरादीनांकसंभवः ॥ २०० ॥ भाष्यादौस्पष्टमेवैतत्तेननात्रप्रपंच्यते ॥ धर्मावि

१ सर्वानुकूल्यंनचेत् २ परमभक्ताबहुशोव्रजदेशेविचरंति ३ मुक्तस्यवस्तुतःसुखदुःखादिद्वंद्वाभावात् ४ हयादीनामन्योन्यंभेदवदीश्वराद्भेदः जीवदेहविभागश्च ५ कामान्नीकामरूप्यनुसंचरन्नित्यादौकामरूपत्वश्रवणादाकारेनियतत्वं ६ आनंदस्यैश्वर्यादिधर्माणांच 

भा[1]वतोजातेऽक्षरत्वेतत्रैलीयते ॥ २०१ ॥ अंशोबृहतितद्धाम्निजलेसैंधव[3]खिल्यवत् ॥ तदोद्धृत्यकृपांभोधिःसायुज्ये[4]नानुभा
वयेत् ॥ २०२ ॥ लीलाःसर्वाःसदादेवो[5]गोपानुदधरद्यथा ॥ ( स्कंध १० ) ॥ दर्शयामासलोकंस्वंगोपानांतमसःपरं ॥
॥ २०३ ॥ सत्यं[6]ज्ञानमनंतंयद्ब्रह्मज्योतिःसनातनं ॥ यद्धिपश्यंतिमुनयोगुणापायेसमाहिताः ॥ २०४ ॥ तेतुब्रह्म[7]ह्रदंनी
तामग्नाःकृष्णेनचोद्धृताः ॥ गोस्वामिभिर्गिरिधरैरूपितारीतिरुद्धृतेः ॥ २०५॥ उद्धृतौपरमःक्लेशोविरहानलसंभवः ॥ यदा
देहादिनाशायसमर्थोजायतेतदा ॥ २०६ ॥ निजंश्रीमत्कृष्णचंद्रःस्वाधिकारानुसारतः ॥ परमा[8]नंदलीलांस्वामनुभावय
तिप्रभुः ॥२०७॥ शुद्धाद्वैतविचारार्कइदंश्लोकद्वयंस्थितं ॥(अ०२सू० ४४) शांडिल्यसूत्र्यां॥ संमानबहुमानप्रीतिविरहे
तरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनिचस्मरणेभ्योबाहुल्यात् ॥ विरहोभक्तिसू
त्रोक्तस्तथाऽतप्तंतनुश्रुतेः॥२०८॥तापक्लेशौप्रजायेतांततोऽसह्योयदातदा॥ क्रमादन्नमयाद्यात्माविशेद्देहा[10]दिपंचकं॥२०९॥
( अ० ४ पा० ४ सू० १) संपद्याविर्भावःस्वेनशब्दात् ॥ इत्यादिनासूत्रकृताऽक्षरसंपत्त्यनंतरं ॥ आविर्भावःपरेच्छातःक्री

---

१ अक्षरेअंशोजीवः २ लवणशकलवत् यथासैंधवखिल्यउदकेप्रास्तउकमेवानुविलीयेतेत्यादिश्रुतिभ्यः ३ अक्षरातपृथक्कृत्य ४ सोश्नुते सर्वान्कामान्सहेतिश्रुत्युक्तेन ५ नित्यक्रीडादिविशिष्टःपरः ६ सत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुत्युक्तमक्षर ७ अक्षररूपमगाधस्थान ८ यतोवाचइत्युक्तोऽगणितानंदः ९ अतप्ततनूर्नतदामोअश्नुतइत्यादि १० देहमन्नमयःप्राणंप्राणमयःमनइंद्रियाणिचमनोमयःतेनतेषांतत्तदात्मकत्वंजीवोऽक्षरात्मकत्वाद्विज्ञानमयः आनंदमयःपरःसहाशितापुरुषोत्तमःस्वतंत्रः

 ढाचोक्ताश्रुतौमता ॥२१०॥ अस्माल्लोकात्प्रेत्यलीनोऽक्षरेऽतःपुनरुद्धृतः ॥ तनूंचरणरेणूत्थांलब्ध्वाविरहतापितः ॥२११॥ 
उपसंक्रम्यान्नमयादीनानंदमयंपरं ॥ कामभोगीकामरूपीकामान्भुंक्तेपरेणसः ॥ २१२ ॥ तैत्तिरीयेब्रह्मभृगुवल्ल्योःसूत्रे
४९ षुचस्फुटं ॥ सर्वोपनिषदश्चाहुःशक्तोवक्तुंनमादृशः॥२१३॥ नातःपरतरंकिंचिन्नावृत्तिर्नगुणोद्भवः ॥ इदंश्रीवल्लभाचार्य्य
कृपयैवान्यथानहि ॥ २१४ ॥ दैवोद्धारप्रयत्नात्माभगवद्वदनानलः ॥ तस्याज्ञयाप्रादुरासीद्वस्तुतःकृष्णएवसः ॥ २१५॥
चरित्रचिंतामण्यादौपाद्मादिवचनैर्दृढम् ॥ सर्वाचार्य्यकथापूर्वंनिर्णीतंचानुभूयते ॥ २१६ ॥ नमोब्रह्मणेनमोअस्त्वग्नये
नमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोब्रह्मणेबृहतेकरोमि ॥ ब्रुवंतीत्यादयोवेदास्तत्स्वरूपंसनातन
म् ॥ इतिश्रुतिरहस्येतत्प्रकाशादिषुनिश्चयः ॥ २१७ ॥ प्रसंगाद्वैष्णवाचाराविविच्यंतेऽत्रकेचन ॥ धारयेत्सर्वदामाला
मोमंत्रग्रहणाद्गुरोः ॥ २१८ ॥ तुलसीकाष्ठजांकंठेक्षणार्धंनत्यजेत्तथा ॥ तन्मार्गशीर्षमाहात्म्येस्कांदेप्रावोचदच्युतः ॥
॥ २१९ ॥ तुलसीकाष्ठजांमालांकंठस्थांवहतेतुयः ॥ अप्यशौचोऽप्यनाचारोमामेवैतिनसंशयः ॥ २२० ॥ धारयंति
नयेमालांहैतुकाःपापबुद्धयः ॥ नरकान्ननिवर्त्तंतेदग्धाःकोपाग्निनामम ॥ २२१ ॥ इत्यधारणतःप्रत्यवायान्नित्यत्वमी
रितं ॥ मरणावसरेप्येषानत्याज्यामोक्षदायिनी ॥ २२२ ॥ काशीखंडेएकोनविंशाध्याये ॥ हरिनामाक्षरमुखंभाले ४५

१ भगवतः २ कथापूर्वकं ३ अद्यापितन्नामजपादिभ्योयथोक्तफललाभात् ४ आचार्यस्वरूपं ५ गोस्वामिगिरिधरैःकाश्यैःकृतेग्रंथे ६ मं त्रग्रहणमारभ्य ७ सदैवकंठेस्थितां अन्यथाकंठेवहतइत्येववदेत् वचनमिदंविष्णुधर्मोत्तरेप्यस्ति

गोपीमृदांकितम् ॥ तुलसीमालिकोरस्कंनस्पृशेयुर्यमोद्भटाः ॥ २२३ ॥ गारुडेमार्कंडेयः ॥ निवेद्यकेशवेमालांतुलसीकाष्ठसंभवां ॥ वहंतियेनराभक्त्यातेषांवैनास्तिपातकं ॥ २२४ ॥ तदाप्रीतमनास्तस्मिन्कृष्णोदेवकिनंदनः ॥ तुलसीकाष्ठसंभूतंशिरोबाहुविभूषणं ॥ २२५ ॥ तुलसीकाष्ठमालांतुप्रेतराजस्यदूतकाः ॥ दृष्ट्वानश्यंतिदूरेणवातोद्धूतंयथारजः ॥ २२६ ॥ तुलसीकाष्ठसंभूतेमालेकृष्णजनप्रिये ॥ बिभर्मित्वामहंकंठेकुरुमांकृष्णवल्लभम् ॥ २२७ ॥ तुलसीदलजामालानिषिद्धाकालपंचके ॥ हारीतेनशिवःपाद्मेविधत्तेतद्धृतिसदा ॥ २२८ ॥ स्नानकालेतुयस्यांगेदृश्यतेतुलसीशुभा ॥ गंगादिसर्वतीर्थेषुस्नातंतेननसंशयः ॥ २२९ ॥ तुलसीमालिकांधृत्वायोभुंक्तेगिरिनंदिनि ॥ सिक्थेसिक्थेसलभतेवाजपेयफलंशुभं ॥ २३० ॥ बहुनाकिमिहोक्तेनशृणुत्वंवरवर्णिनि ॥ विडुत्सर्गादिकालेपिनत्याज्याकंठमालिका ॥ २३१ ॥ तथा ॥ यत्कंठेतुलसीनास्तितेनरामूढमानसाः ॥ अन्नंविष्ठाजलंमूत्रंपीयूषंरुधिरंभवेत् ॥ २३२ ॥ ततःसर्वेषुकालेषुनत्याज्याकंठमालिका ॥ क्षणार्द्धंतद्विहीनोऽपिविष्णुद्रोहीनसंशयः ॥ २३३ ॥ स्कांदे ॥ तुलसीकाष्ठमालांयोधृत्वाभुंक्तेद्विजोत्तमः ॥ सिक्थेसिक्थेसलभतेवाजपेयफलंमुने ॥ २३४ ॥ तुलसीकाष्ठमालांयोधृत्वास्नानंसमाचरेत् ॥ पुष्करेचप्रयागेचस्नातंतेनमुनीश्वर ॥ २३५ ॥ तत्रैव ॥ यज्ञोपवीतवद्धार्याकंठेतुलसिमालिका ॥ नाशौचंधारणेतस्यायतःसाब्रह्मरूपिणी ॥ २३६ ॥

---

१ स्नानभोजनमैथुनमलमूत्रविसर्जनकालेषु २ स्वस्मृतौ ३स्नानभोजनादिकालेष्वपितत्काष्ठमालाधृतिं ४ आदिपदान्मैथुनमूत्रोत्सर्गादिसंग्रहः

पूजांगंशंखचक्रादिगोपीचंदनमृत्स्नया ॥ कुर्यान्निषेधस्तन्मायाःपूजाशून्येकचिन्मृदः ॥ २३७ ॥ आचारप्रकाशेऊर्ध्व
पुंड्रविधौहलायुधीये ॥ गोपीचंदनमुद्रांचकृत्वाभ्रमतिभूतले ॥ सोपिदेशोभवेत्पूतःकिंपुनर्यत्रसंस्थितः ॥ २३८ ॥ पाद्मे ॥
४६ कृष्णनामाक्षरैर्गात्रमंकयेच्चंदनादिना ॥ सलोकपावनोभूत्वातस्यलोकमवाप्नुयात् ॥ २३९ ॥ तथाभगवद्वचः ॥ म
माऽवतारचिन्हानिदृश्यंतेयस्यविग्रहे ॥ मर्त्योमर्त्योनविज्ञेयःसनूनंमामकीतनुः ॥ २४० ॥ नीलकंठान्हिकेचसनत्कुमा
रः ॥ कृष्णायुधांकितेदेहेतोयचंदनमृत्स्नया ॥ प्रयागादिषुतीर्थेषुसगत्वाकिंकरिष्यति ॥ २४१ ॥ यदायदाप्रपश्ये
तदेहंशंखादिचिन्हितं ॥ तदातदाजगत्स्वामीतुष्टोहरतिपातकम् ॥ २४२ ॥ पाद्मेभगवान् ॥ गोपीचंदनमृत्स्नायालिखि
तंयस्यविग्रहे ॥ शंखचक्रगदापद्मंतस्यदेहेभवाम्यहं ॥ २४३ ॥ सौवर्णराजतंताम्रंकांस्यंमृन्मयमेववा ॥ चक्रंकृत्वातुमे
धावीधारयेतविचक्षणः ॥ २४४ ॥ उपवीतादिवद्धार्य्याःशंखचक्रगदादयः ॥ ब्राह्मणस्यविशेषेणवैष्णवस्यविशेषतः ॥
॥ २४५ ॥ इत्थंविधीयतेमुद्रामृन्मयीधातुचक्रतः ॥ द्विजानामपिधर्मोयमुपवीतातिदेशतः ॥ २४६ ॥ मार्गशीर्षमाहा
त्म्येतृतीयाध्याये ॥ चक्रलांछनहीनस्यविप्रस्यविफलंभवेत् ॥ क्रियमाणंचयत्कर्मवैष्णवानांविशेषतः ॥ २४७ ॥ इ
त्यावश्यकतास्कांदेवर्णिताविप्रधर्म्मता ॥ प्रस्तुत्यमृन्मयींमुद्रांपूजांगत्वंयथोदितं ॥ २४८ ॥ शंखचक्रादिरहितःपूजांय
स्तुसमाचरेत् ॥ निष्फलंपूजनंतस्यहरिश्चापिनतुष्यति ॥ २४९ ॥ यस्तुसंतप्तशंखादिलिंगांकिततनुर्नरः ॥ ससर्वयातना ४६

भोगीचांडालोजन्मकोटिषु ॥ २५० ॥ इदंबृहन्नारदीयंपृथ्वीचंद्रोदयेस्थितं ॥ अंकेनंतप्तमुद्रास्याच्छूद्रतांत्रिकयोश्च सा ॥ ऊर्ध्वपुंड्रंतुभगवत्प्रसादद्रव्यतोमतं ॥ वैष्णवानांचशैवानांद्विजानांनित्यमुच्यते ॥ २५१ ॥ मदनपारिजातेच ब्राह्मे ॥ यागोदानंतपोहोमःस्वाध्यायःपितृतर्पणं ॥ भस्मीभवतितत्सर्वमूर्ध्वपुंड्रंविनाकृतं ॥ २५२ ॥ स्कांदेमार्गशीर्षमाहात्म्येऽपीदमेववाक्यम् ॥ धर्मप्रवृत्तौस्मृतिसारसमुच्चयेऊर्ध्वपुंड्रविधिप्रक्रम्य ॥ ललाटेतिलकंकृत्वाकुर्य्युःशैवाश्ववैष्णवाः ॥ तर्पणंचापिवैश्राद्धमन्यथानिष्फलंभवेत् ॥ २५३ ॥ आचारमयूखेचशौनकः ॥ ऊर्ध्वपुंड्रंशिवस्यैवंविष्णोःकुर्य्युश्चवाबुधाः ॥ मूर्ध्निमूलेनमंत्रेणशेषंद्वादशनामभिः ॥ २५४ ॥ धर्मप्रवृत्तौस्मृतिसारसमुच्चये ॥ ऊर्ध्वपुंड्रंद्विजातीनामग्निहोत्रसमोविधिः ॥ इत्यावश्यकतासिद्धासर्वथासांतरंतुतत् ॥ २५५ ॥ चतुर्विंशतिमतव्याख्यायांमदनपारिजातसंग्रहः ॥ एकांतिनोमहाभागाःसर्वभूतहितेरताः ॥ सांतरालंप्रकुर्वंतिपुंड्रंहरिपदाकृतिं ॥ २५६ ॥ इत्यादि ॥ पाद्मेऊर्ध्वपुंड्राध्याये ॥ ऊर्ध्वपुंड्रंतुसर्वेषांननिषिद्धंकदाचन ॥ धारयेयुःक्षत्रियाद्याविष्णुभक्ताभवंतिये ॥ २५७ ॥ इतिसर्वेषुवर्णेषुवैष्णवानांतदीरितं ॥ निषिध्यतेशिवेनैवपाद्मेभस्मत्रिपुंड्रकं ॥ २५८ ॥ विप्राणांनैवधार्य्यंस्यात्तिर्यक्पुंड्रादिधारणं ॥ नारायणात्परब्रह्मादन्येषामर्चनंनहि ॥ २५९ ॥ ब्राह्मणःकुलजोविद्वान्भस्मधारीभवेद्यदि ॥ वर्जयेत्तादृशंदेविमद्योच्छिष्टंघटंयथा ॥ ॥ २६० ॥ त्रिपुंड्रंशूद्रकल्पानांशूद्राणांचविधीयते ॥ त्रिपुंड्रधारणाद्विप्रःपतितःस्यान्नसंशयइति ॥ २६१ ॥ त्रिपुंड्र

१ नांकनंविद्महेवेदपंथानमाश्रितइत्यादौ वृषोत्सर्गादौतथाप्रसिद्धेः

२ विधिःशैवेनिषेधःसर्ववैष्णवे ॥ ३ अवैदिकेतुशैवेवार्तानिद्वौदशनामभिः ॥ २६२ ॥ अतआवश्यकंमालामुद्राव
त्तिलकंशुभं ॥ तत्पाद्मउत्तरेखंडएकीकृत्यप्रशंसितम् ॥ २६३ ॥ ( अध्याय १० ) येकंठलग्नतुलसीनलिनाक्ष
मालायेबाहुमूलपरिशोभितशंखचक्राः ॥ येवाललाटफलकेलसदूर्ध्वपुंड्रास्तेवैष्णवाभुवनमाशुपवित्रयंति ॥ २६४॥
४७ त्रयमेकैकवादेननिबंधस्यानुसारतः ॥ पुरुषोत्तमपादैःसप्रमाणौघंदृढीकृतम् ॥ २६५ ॥ तथाश्रुतिरहस्यादौमयाप्य
न्यंत्रचारितः ॥ संशयस्तिलकद्रव्येरुद्राक्षस्याप्यधारणे ॥ २६६ ॥ आचारैरीदृशैःशुद्धैःश्रौतैःस्मार्तैःपुराणजैः ॥ स
दाचाराऽऽगतैःशुद्धःसेवेतोक्तप्रकारतः ॥ २६७ ॥ लीलास्वादोऽनुभूत्येकवेद्योऽस्यस्यादनुग्रहात् ॥ ब्रह्मादिभिःप्रार्थ्य
मानोऽप्येषामत्यंतदुर्लभः ॥ २६८ ॥ नस्वमेऽप्यक्षरजुषांकेवलज्ञानिनामयं ॥ मन्वतेपरमंमोक्षंब्रह्माहंभानमेवते ॥
॥ २६९ ॥ अहंब्रह्मेतिसंसिद्धावक्षरत्वंभविष्यति ॥ नतेऽक्षरात्परंकंचिज्जानंतिपुरुषोत्तमं ॥ २७० ॥ इत्यात्मलाभसंतु
ष्टाःसात्विकाभक्तिवर्जिताः ॥ लीयंतेतेऽक्षरेज्ञानघनेसर्वेचिदंशकाः ॥ २७१ ॥ नावर्त्ततेपुनर्मग्नाःसुखेसंसुप्तवत्ततः ॥ ददा
तिभगवान्प्रायोमुक्तिंभक्तिःसुदुर्लभा ॥ २७२ ॥ भगवान्भजतांमुकुंदोमुक्तिंददातिकर्हिचित्स्मनभक्तियोगं ॥ अनिच्छतो ४७

१।२ उभयत्रवैषयिकमधिकरणं जात्यभिप्रायादेकवचनं सर्ववैदिकाऽवैदिकाः ३ शिवपूजादिकर्मभेदादिच्छातश्चतिर्यगूर्ध्वपुंड्रयोर्विकल्पः ४ऊ
र्ध्वपुंड्राणि ५ ललाटेकेशवंविद्यान्नारायणमथोदरइत्यादिनोक्तैर्बहुग्रंथप्रसिद्धैः ६ ग्रंथांतरेषु इदानींसत्सिद्धांतमार्त्तंडेप्ययंविषयोऽनेनकविनासम्यङ्नि
र्णीतः ७ नतुनिर्गुणाः सत्त्वात्संजायतेज्ञानं कैवल्यंसात्विकंज्ञानमित्यादिवचोभ्यः ८ जीवाः

गतिमण्वींप्रयुंक्ते ॥ भक्तस्यकृष्णसायुज्याद्रसपानंतटस्थवत् ॥ मग्नवज्ज्ञानिनांनैतेत्तापशांतिर्द्वयोःफलम् ॥ २७३ ॥ इतिश्रीवल्लभाचार्य्यचारुभास्वद्विकासितम् ॥ सिद्धांताब्जंभजध्वंभोदैवभृंगारसार्थिनः ॥ २७४ ॥ बालानांबोधनायेहदिङ्मात्रंदर्शितंमया ॥ प्राक्तनेषुप्रबंधेषुविस्तरस्तुविलोक्यताम् ॥ २७५ ॥ तदुच्छिष्टोपभोगेनशुद्धबुद्धेर्ममापिये ॥ चंद्रोदयादयोग्रंथाअनुगृण्हीततानपि ॥ २७६ ॥ प्रथमेयत्प्रकरणेप्रोक्तंसंक्षिप्यतत्पुनः ॥ प्रपंचितंप्रकरणैश्चतुर्दशभिरुज्वलं ॥ ॥ २७७ ॥ पीनपयोधरकांतौसद्वृंदावनविलासरुचौ ॥ राधायांश्रीकृष्णेरचयरतिंदर्पकोपमानपदे ॥ २७८ ॥ नोल्लासितेनदीनेकृतेऽपिभंगेनवांरिजातानां ॥ द्विजैंराजशब्दभाजोनमामिसंदिनोदयान्निजाचार्य्यान् ॥ २७९ ॥ श्रीमद्भक्तिसुधाब्धिवर्द्धनविधौसंपूर्णचंद्रायितंदुर्वादोत्कटकुंभिदंभदलनेशार्दूललीलायितं ॥ पादाब्जंभजतामशेषविदुषांमस्तेषुमालायितंयैर्वाचोविसराजयंतिरुचिरास्तेविठ्ठलेशप्रभोः ॥ २८० ॥ यःश्रीमद्व्रजवल्लभाभिधगुरोःस्पृष्टःकृपादृष्टिभिर्बाल्येऽगान्नि

---

१ जलंपिबतस्तीरस्थस्येव २ रसास्वादनं ३ भक्तज्ञानिनोःसंसारतापस्यतटस्थनिमग्नयोर्ग्रीष्मतापस्यचशांतिः ४ रसोभक्तिः पुरुषोत्तमोवापक्षेमरंदः ५ कुचौमेघाश्च ६ समीचीनंवृंदावनं सतांवृंदस्यावनंरक्षणंच ७ भक्ति ८ रूपादिगर्वरोषप्रणयकलहानां दर्पकस्यकामस्योपमायाश्च ९ नदीपतौसमुद्रे वस्तुतस्तुदैन्यवानेवोल्लासितोनत्वदीनः १० कमलानां वस्तुतस्त्वर्वाचीनदुर्वादरूपवैरिसमूहानाम् ११ चंद्रोब्राह्मणश्रेष्ठश्च १२ दिवसेयउदयस्तत्सहितानितिविरोधः वस्तुतस्तुसतांवेदानांइनस्यहरेरुदयःकलौप्रकाशोयेभ्यस्तान् ॥ ॥ आत्रेयगोत्रेजातेनगोपीनाथांगजन्मना ॥ देवकीनंदनाख्येनगोवर्द्धनगुरोर्मुखात् ॥ अधीत्यतत्कृतंग्रंथंस्वस्यैवस्मृतयेमया ॥ द्रुतंकृतंस्फुटंसूक्ष्मंसरलंटिप्पणंशुभम् ॥ श्रीरस्तुश्रीःशुभम् ॥

खिलाऽऽगमांश्चनिपुणंताताद्घनश्यामतः ॥ तूर्णंवर्णयतेबहूनियुगपच्छ्रोत्रिष्टवस्तूनियोनानाकाव्यनिबंधकृत्ससमभूद्गोवर्धनाख्यःकविः॥२८१॥ पंचनदान्वयजनुषातेनांधेनापिसत्कृपैकदृशा॥ भू१दृशि२दुर्गा८शशि१मितविक्रमवर्षेव्यधायिपंचदशी ॥ २८२ ॥ योगोवर्द्धनवाक्सुधोदधिभवःसद्वांछितार्थप्रदःस्वांतध्वांतनिवारकोगुरुघनश्यामोक्तिशाणोज्ज्वलः ॥ विद्वद्भिःकरुणापरैर्दृदिधृतःसोऽयंमहीमंडलेयावच्चंद्रदिवाकरंविजयतांवेदांतचिंतामणिः ॥ २८३ ॥ इतिश्रीमद्वेदव्यासविष्णुस्वामिमतपुंडरीकमंडलमंडनमार्तंडश्रीमद्वल्लभाचार्यचरणाब्जचंचरीकचित्तेन मोक्षगुरुस्वमातामहगोस्वामिश्रीव्रजवल्लभचरणैकतानेन तैलंगवेल्लनाटीज्ञातीयतित्तिरिशाखीयापस्तंबबाधूलसगोत्रोद्भवपंचनद्युपनामकघनश्यामभट्टात्मजेन स्वपितृसकाशाल्लब्धविद्येन गोवर्द्धनाशुकविना कृते वेदांतचिंतामणौ साधनफलादिविवेकोनाम पंचदशंप्रकरणंसंपूर्णं॥ संपूर्णश्चायंवेदांतचिंतामणिः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

हा ग्रंथ मुंबईंत गणपत कृष्णाजी यांच्या छापखान्यांत एग्झिक्युटरस्
यांच्या हुकमावरून ना० कृ० दुमाळे यांणी छापिला.

संवत् १९२६ शके १७९२ ज्येष्ठ वद्य ४ जून ता० १८ सन १८७०.

॥ इति वेदांतचिंतामणिःसमाप्तः ॥